

# जीवविचारादि-
# प्रकरणचतुष्टयम्

प्रेरक :- वैराग्यवारिधि आचार्य श्री कुलचन्द्रसूरीश्वरजी म.सा.

संपादक :- मुनिश्री हेमप्रभविजयजी म.सा.

વૈરાગ્યવારિધિ

# પૂ.આ. કુલચંદ્રસૂરિ મહારાજ

50

## સંયમ સુવર્ણ વર્ષ

૨૦૨૩ - ૨૦૭૩

ચૈત્ર વદ-૨

वृत्तिसमलङ्कृत

# जीवविचारादिप्रकरणचतुष्टयम्

-: प्रेरक :-

वैराग्यवारिधि आचार्य श्री कुलचन्द्रसूरीश्वरजी म.सा.

-: संपादक :-

मुनिश्री हेमप्रभविजयजी म.सा.

-: प्राप्तिस्थान :-

**दिव्यदर्शन ट्रस्ट**
३९, कलीकुंड सोसायटी, मु. धोळका,
जि. अमदावाद - ३८७८१०, फोन : ०२७१४-२२५९८१

•

**श्री शंखेश्वर पार्श्वनाथ श्वे.मू. तपा. जैन संघ**
मातुश्री जयालक्ष्मी आराधना भवन
११५, डॉ. मनुभाई पी. वैद्य मार्ग, तिलक रोड,
घाटकोपर (ई), मुंबई-४०००७७
मो. कीर्तिभाई - ९८२०७६५०९८,
रोहितभाई - ९८९२०८१४३९

**बाबुलाल सरेमलजी (बेडावाला)**
सिद्धाचल, सेन्ट एन्स स्कूल सामे, हीरा जैन सोसायटी.
साबरमती, अमदाबाद. मो. ९४२६५ ८५९०४

•

**डॉ. संजयभाई शाह**
मेघमयुर ग्रुप ओफ कंपनी
O/B/५, त्रिभुवन कोम्प्लेक्ष, घोडदोड रोड,
सुरत-३९५००७.
फोन : ०२६१-२६६१७१
मो. ९८२५१२१४५५

मुद्रक : भरत ग्राफिक्स, ७, न्यु मार्केट, पांजरापोळ, रिलीफ रोड, अमदावाद-३८०००१. फोन : ०७९-२२१३४१७६, मो. ९९२५०२०१०६

॥ श्रीप्रवचनाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥॥

# પ્રસ્તાવના

શ્રીસંઘમાં ચારપ્રકરણ તરીકે થયેલ જીવવિચાર/નવતત્ત્વ/દંડક/લઘુસંગ્રહણીનો વૃત્તિસહિત સમાવેશ કરવામાં આવેલ છે.

**જીવવિચાર સવૃત્તિ :** જૈન મહારાષ્ટ્રીમાં ૫૧ આર્યા છન્દોમાં આ કૃતિની રચના થઈ છે. આ કૃતિના મૂળકર્તા આચાર્ય શ્રી શાન્તિસૂરિ મહારાજ છે. જુદા જુદા ગચ્છમાં આજસુધીમાં શ્રી શાન્તિસૂરિ નામના અનેક આચાર્યો થયા છે, જેની નામાવલી આ પ્રસ્તાવનાના અંતે પ્રથમ પરિશિષ્ટમાં આપવામાં આવી છે. જીવના ૫૬૩ ભેદને વિસ્તારથી સમજાવતા આ પ્રકરણ ઉપર આજ સુધીમાં અનેક નાની/મોટી વૃત્તિ/અવચૂરિઓ તેમજ બાલાવબોધાદિની રચના થઈ છે.

**ક્ષમાકલ્યાણગણિ :** પ્રસ્તુત વૃત્તિના કર્તા ખરતરગચ્છીય અમૃતધર્મ વાચકના શિષ્ય ક્ષમાકલ્યાણ ગણિ છે. તેઓશ્રીએ બીકાનેર મુકામે સં. ૧૮૫૦ માં આ વૃત્તિની રચના કરી છે. આ સિવાય ગૌતમીયકાવ્યની ટીકા/પ્રશ્નોત્તર સાર્ધ શતક/ ચૈત્યવંદન ચતુર્વિંશતિકા આદિ ગ્રંથોની રચના કરી છે.

**નવતત્ત્વ સટીક :** જૈન મહારાષ્ટ્રીમાં-આર્યા છંદમાં રચાયેલ, જીવ/અજીવાદિ નવતત્ત્વના ભેદને વિસ્તારથી સમજાવતી આ કૃતિ અજ્ઞાતકર્તૃક છે. વર્તમાનમાં ૬૦ ગાથામાં બંધાયેલ આ પ્રકરણની ભિન્ન ભિન્ન કર્તૃક વૃત્તિઓને જોતાં મૂળ ગાથાઓનો કુલ સંખ્યાંક પણ ભિન્ન ભિન્ન જોવા મળે છે. ઉપાધ્યાય શ્રી સમયસુંદર મહારાજે પ્રસ્તુત વૃત્તિમાં ૪૯ ગાથા ઉપર વિવરણ કર્યું છે. આ પ્રકરણના કદમાં આવો ફેરફાર થવાનું કારણ એ સંભવી શકે કે જેમ જેમ આ પ્રકરણનો સ્વાધ્યાય વધતો ગયો તેમ તેમ આ પ્રકરણમાં નવતત્ત્વને લગતી અન્ય ઉપયુક્ત ગાથાઓને પણ સમાવી લેવામાં આવી.

નવતત્ત્વ પ્રકરણના મૂળકર્તા અંગે શ્રી જૈન ગ્રન્થ પ્રકાશક સભા તરફથી પ્રકાશિત થયેલ નવતત્ત્વવિસ્તરાર્થ નામના પુસ્તકમાં બે બોલમાં જે વિચાર કર્યો છે તે અક્ષરશઃ અત્રે આપીએ છીએ.

"નવતત્ત્વના પ્રણેતાની ગવેષણા કરતાં હજુ સુધી કાંઈ નિર્ણય લઈ શક્યો નથી. નવતત્ત્વ ટબાવાળી એકજ પ્રાચીન પ્રતિમાં સાઠમી એક ગાથા

**इय नवतत्तविचारो अप्पमहनाणजाणणा जा हेउं ।**
**संखितो उद्धरिओ लिहिओ सिरिधम्मसूरीहिं ॥**

દેખવામાં આવવાથી શ્રી ધર્મસૂરિ મહારાજ આ પ્રકરણના કર્તા હોય તેમ જણાય છે, ધર્મસૂરિજી મહારાજનો સમય નિર્ણય કરવો અશક્ય છે. વૃત્તિ-અવચૂર્ણિ-બાલાવબોધકરો આ ગાથા જણાવતા નથી. જેથી જણાય છે જે મૂળ સત્તાવીશ ગાથાઓ અન્યકર્તૃક હોવી જોઈએ અને તેના પ્રણેતા તેરમા સૈકાની પૂર્વે થયેલા હોવા જોઈએ તેમ તેની વૃત્તિઓ ઉપરથી અનુમાન થાય છે, વળી બીજા એક પ્રાચીન પુસ્તકમાં "इति श्री वादिदेवसिरिविरचित नवतत्त्वप्रकरणम्" એ પ્રમાણે વાક્ય જોવામાં આવ્યું હતું જે ઉપરથી સ્યાદ્વાદરત્નાકરગ્રન્થ નિર્માતા જે અપૂર્વગ્રન્થમાં સ્ત્રીનિર્વાણસિદ્ધિ માટે લગભગ ૪૨ હજાર શ્લોક પ્રમાણનો ભાગ હતો, મહારાજ સિદ્ધરાજની સભામાં કુમુદચન્દ્ર જેવા દિગંબરવાદીઓને જીતનાર અઢારદેશમાં

અમારિના પ્રવર્તક, પરમાર્હત મહારાજા કુમારપાલ નૃપપ્રતિબોધક, કલિકાલસર્વજ્ઞ, ભગવાન્ હેમચંદ્રાચાર્ય મહારાજ વિગેરેના વિદ્યાગુરુ, ભગવાન્ વાદિદેવસૂરિ મહારાજ આ પ્રકરણના રચયિતા હોય તેમ પણ અનુમાન થાય છે. ઉપરની ગાથા તથા વાક્ય એ બંને તરફ વિચાર કરતા એકવાક્યતા વિષયક એવું પણ અનુમાન થઈ શકે કે મૂલગાથા ૨૭ ના કર્તા શ્રી વાદિદેવસૂરિ મહારાજ અને પ્રક્ષિપ્તગાથાઓના સંગ્રાહક શ્રી ધર્મસૂરિ મહારાજ હોય."

નવતત્ત્વને લગતા અનેક મૌલિક ગ્રન્થોની રચના થઈ છે તેમજ નવતત્ત્વ પ્રકરણ ઉપર પણ આજ સુધીમાં અનેક વૃત્તિ/અવચૂરિ આદિની રચના થઈ છે.

**ઉપાધ્યાય શ્રી સમયસુંદર મહારાજ :** પ્રસ્તુત નવતત્ત્વની વૃત્તિના કર્તા ખરતરગચ્છના આચાર્ય શ્રી જિનચંદ્રસૂરિના હસ્તે દિક્ષિત, સકલચંદ્રગણિના શિષ્ય સમયસુંદરગણિ છે. વાદી હર્ષનંદન વગેરે અનેક શિષ્ય/પ્રશિષ્યના તેઓ ગુરુ હતા. સંયમના અનેક યોગોમાં સ્વાધ્યાય તેઓશ્રીનો પ્રિયયોગ હતો. સંસ્કૃત/ગુજરાતી/હિન્દી/રાજસ્થાની આદિ ભાષામાં તેઓશ્રીએ અનેક રચનાઓ કરી છે. શ્રી અભય જૈન ગ્રંથમાલાના ૧૫માં પુષ્પ તરીકે પ્રગટ થયેલ "સમયસુંદર કૃતિ કુસુમાંજલિ" માં તેઓની સંસ્કૃત-ગુજરાતી-હિન્દી આદિ ભાષામાં રચાયેલ ૫૬૩ લઘુરચનાઓનો સંગ્રહ પ્રગટ થયો છે.

એ સિવાય સંસ્કૃત અને ગુજરાતી ભાષાની અનેક દીર્ઘરચનાઓ પણ તેઓશ્રીએ કરી છે. જે જોતાં તેઓશ્રીનો સ્વાધ્યાય પ્રેમ પરખાઈ આવે છે. પોતાના શિષ્યો વિદ્વાન્ બને તે માટે પણ તેઓ ખૂબ જ પરિશ્રમ કરતા. પોતાના શિષ્યોનો જ્ઞાન પર આદર વધે તે માટે તેઓશ્રીએ એક કવિતા બનાવેલ. જે આ પ્રમાણે છે-

**"ભણો રે ચેલાભાઈ ભણો રે ભણો,**
**ભણ્યા માણસને આદર ઘણો;**
**ભણ્યાને હુએ ભલો વહરાવણો,**
**સખરવસ્ત્ર પહિર ઓઢણો;**
**પદ હુવે વાચક પાઠક તણો,**
**બાજોઠ ઉપર બેસણો;**
**ભણિયા પાખે (વિના) દુઃખ દેખાણો,**
**ખાંધે જોલી હાથ મેં દોહણો (ઘડો);**

સમયસુંદરો શબ્દ માનણો,
ઈહ પરલોક સુહાવણો;''



રાજસ્થાનના સાંચોરમાં પોરવાડ જ્ઞાતિના રૂપસિંહના ધર્મપત્ની લીલીદેવીની કુક્ષિથી જન્મી યુવાવસ્થામાં ચારિત્ર લઈને સત્તરમી સદીના સાહિત્યાકાશમાં જાજ્વલ્યમાન નક્ષત્ર બનેલા મહોપાધ્યાય શ્રી સમયસુંદરજી ગુજરાત, રાજસ્થાન, ઉત્તરપ્રદેશ આદિ અનેક ક્ષેત્રોમાં વિચરી સં.૧૭૦૨માં ચૈત્ર સુદ ૧૩ના દિવસે અમદાવાદ મુકામે સમાધિપૂર્વક કાળધર્મ પામી સ્વર્ગે સંચર્યા[1].

પ્રસ્તુત નવતત્ત્વની શબ્દાર્થ વૃત્તિ સં.૧૬૮૮ના અમદાવાદ, હાજા પટેલની પોળમાં વૃદ્ધ ઉપાશ્રય મધ્યે મુનિ સહજવિમલ તથા પં.મેઘવિજય નામના પોતાના શિષ્યો માટે રચી છે. પ્રશસ્તિના અંતે આપવામાં આવેલ એક શ્લોક વાંચતા આશ્ચર્ય કરાવે તેવો છે.





૧. મહોપાધ્યાય સમયસુંદરજીના જીવન-કવનનું નીચેના બે લેખમાં વિસ્તૃત આલેખન થયું છે. (૧) મોહનલાલ દલીચંદ દેસાઈ લિખિત 'કવિવર સમયસુન્દર' જે આનંદકાવ્ય મહોદધિ મૌક્તિક ૭માંની પ્રસ્તાવનામાં મુદ્રિત થયો છે. (૨) મહો. વિનયસાગર લિખિત 'મહોપાધ્યાય સમયસુન્દર' જે સમયસુન્દર કૃતિ કુસુમાંજલિમાં પ્રકાશિત થયેલ છે.

શ્લોક આ મુજબ છે -

**वृत्ति लिखित्वा मात्सर्यात् प्रशस्ति न लिखिष्यति ।**
**जिनाज्ञालोपकृत् पापी नरके स पतिष्यति ॥**

**દંડક સટીક :** વિચારષટ્ત્રિંશિકા તથા લઘુસંગ્રહણીના નામથી ઓળખાતું આ પ્રકરણ ધવલચંદ્રના શિષ્ય ગજસારમુનિએ રચેલું છે. આ પ્રકરણમાં ૨૪ દ્વારમાં ૨૪ દંડકને ઉતારવામાં આવ્યા છે.

વર્તમાનમાં ૪૨ ગાથામાં પ્રાપ્ત થતું આ પ્રકરણ રત્નચંદ્ર મ.ની વૃત્તિમાં ૪૩ ગાથા પ્રમાણ મળે છે તો સમયસુંદર મ.ની વૃત્તિમાં ૩૮ ગાથા પ્રમાણ મળે છે જ્યારે સ્વોપજ્ઞ અવચૂરિમાં ૩૯ ગાથા પ્રમાણ મળે છે.

સોળમાં સૈકામાં રચાયેલ આ પ્રકરણની વૃત્તિ સમયસુંદર મહારાજે સં.૧૬૯૬માં અમદાવાદ-હાજાપટેલની પોળના ઉપાશ્રયમાં રચી છે.

દંડક પ્રકરણ ઉપર ભિન્ન ભિન્ન કર્તૃક વૃત્તિ-અવચૂરિ તેમજ અનેક બાલાવબોધાદિની રચના થઈ છે.

**જંબુદ્વીપસંગ્રહણી** - આ ૨૯ ગાથાના ગ્રંથના રચયિતા પ.પૂ.આ.શ્રી.વિ.હરિભદ્રસૂરિ મ.સા. દ્વારા જૈન ધર્મના ભૂગોળ વિષયક જ્ઞાન અને ભવ્યજીવોના ઉપકાર માટે રચાયો છે. આ ગ્રંથ ઉપર શ્રીકૃષ્ણગચ્છના પ.પૂ.આ.શ્રી પ્રભાનંદસૂરિ મ.સા. એ વિ.સં.૧૩૯૦માં રચેલ છે. આ ગ્રંથમાં જંબુદ્વીપના પદાર્થોનું વર્ણન ખંડાદિ દશ દ્વારથી કરવામાં આવેલ છે. લઘુસંગ્રહણીના આ ગ્રન્થમાં જંબુદ્વીપનું સંક્ષિપ્ત વર્ણન છે. વિસ્તૃત વર્ણન જ્ઞાન માટે લઘુક્ષેત્રસમાસ તથા બૃહદ્ક્ષેત્રસમાસ વિ. જોવા જરૂરી છે.

આ ચાર પ્રકરણની ટીકાઓ પ્રથમ વૈરાગ્યદેશનાદક્ષ પ.પૂ.આ.શ્રી હેમચંદ્રસૂરિ મ.સા. તરફથી પ્રકરણત્રયી અને જંબુદ્વીપસંગ્રહણી એમ અલગ-અલગ પુસ્તક અને પ્રતરૂપે પ્રકાશિત થયેલ હતી. પરંતુ ચારેય પ્રકરણની ટીકા વાંચવામાં સરળ બને તથા પ્રાકૃત-સંસ્કૃતના અભ્યાસીઓનું ભાષાજ્ઞાન સમૃદ્ધ બને અને વિશેષ પદાર્થોનો બોધ થાય તે માટે **પ.પૂ.સિદ્ધાંતમહોદધિ આ.શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મ.સા.ના ચરમશિષ્યરત્ન વૈરાગ્યવારિધિ પ.પૂ.આ.શ્રીમદ્ વિજય કુલચંદ્રસૂરીશ્વરજી મ.સા. તથા પ.પૂ.આ.શ્રી.વિ. રશ્મિરાજસૂરીશ્વરજી મ.સા.ની પાવન પ્રેરણાથી** સંસ્કૃત ટીકા સહિત ચાર પ્રકરણોનું એક ગ્રંથમાં પ્રકાશન કરતા અમો અત્યંત આનંદ અનુભવીએ છીએ.

**અનુમોદના... અનુમોદના... અનુમોદના...**

સિદ્ધાંત મહોદધિ કર્મસાહિત્યનિષ્ણાત પ. પૂ. આચાર્યદેવ
**શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મ.સા.ની**
**સ્વર્ગારોહણ અર્ધશતાબ્દિ**
(૨૦૨૪-૨૦૭૪) નિમિત્તે તથા
વૈરાગ્યવારિધિ, આયડ તીર્થોદ્ધારક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્ વિજય કુલચંદ્રસૂરીશ્વરજી મ. સા. ના**
**૫૦ વર્ષના સંયમ જીવન**
ના (૨૦૨૩-૨૦૭૩) સુવર્ણ અવસરે આ ગ્રંથના લાભાર્થી

## શ્રી શ્વે. મૂ. પૂ. જૈન સંઘ, નાનપુરા, સુરત

श्रीप्रवचनाय नमः ॥

नमो नमः श्रीगुरुप्रेमसूरये ॥

श्रीक्षमाकल्याणगणिविरचितवृत्तिसहितम्

श्री शान्तिसूरिविरचितम्

# ॥ जीवविचारप्रकरणम् ॥





**ध्यात्वा जैनं महः श्रीमत्सद्गुरुं प्रणिपत्य च ।**
**वृत्तिं जीवविचारस्य कुर्वे संक्षेपतः स्फुटाम् ॥१॥**



इह हि संसारसागरे निमज्जतां जन्तूनामुपकाराय प्रवहणकल्पं तत्त्वोपदेशं दातुकामः **श्रीशान्तिस्तावत्स्वेष्ट-**

देवप्रणतिपूर्विकामभिधेयादिसूचिकामादिमां गाथामाह -

**भुवणपईवं वीरं नमिऊण भणामि अबुहबोहत्थं ।**
**जीवसरूवं किंचिवि जहभणियं पुव्वसूरीहिं ॥१॥**

**भुवणेति**-अत्र भणामीति क्रियाभिसंबन्धादहमिति कर्तृपदमध्याहार्यं । ततश्चायमन्वयः-अहं **वीरं श्रीवर्द्धमानजिनं** नत्वा किंचिदल्पं **जीवस्वरूपं** सिद्धसांसारिकादिभेदभिन्नं **भणामि** ब्रवीमि । कीदृशं वीरं ? **भुवनप्रदीपं** भुवने विश्वे प्रदीप इव भुवनप्रदीपः जीवाजीवादिसकलपदार्थसार्थप्रकाशकः तं । किमर्थम् ? **अबुधबोधार्थं**-अबुधा अज्ञातजीवाजीवाद्यर्थाः तेषां बोधार्थं तद्विज्ञापनायेत्यर्थः । कथं भणामीत्याह - **यथा पूर्वसूरिभिः गौतमसुधर्मादिभिः** पूर्वाचार्यैर्**भणितं** तथा भणामि न तु स्वमनीषिकयेत्यर्थः ॥१॥ अथ तावज्जीवभेदानाह -

**जीवा मुत्ता संसारिणो य तस थावरा य संसारी ।**
**पुढविजलजलणवाऊवणस्सई थावरा नेया ॥२॥**

जीवन्ति कालत्रयेऽपि प्राणान् धारयन्तीति जीवाः । ते च द्विधा - एके मुक्ताः सिद्धा इत्यर्थः । च पुनरर्थे अन्ये संसारिणः चतुर्गतिरूपसंसारस्था इत्यर्थः । ते च संसारिणो द्विधा-एके त्रसाः त्रसनामकर्मोदयवर्त्तिनः द्वीन्द्रियादयः । च पुनरन्ये स्थावराः स्थावरनामकर्मोदयवर्त्तिन एकेन्द्रिया इत्यर्थः । तत्र प्रथमं स्थावरभेदानाह –

पुढवीत्यादि-पृथ्वी १ जल २ ज्वलन ३ वायु ४ वनस्पतयः ५ पृथिव्यप्तेजःपवनवनस्पतयः एते पञ्चापि स्थावरा ज्ञेया ज्ञातव्याः ॥२॥

अथ गाथाद्वयेन पृथिवीभेदानाह –

**फलिहमणिरयणविद्दुम, हिंगुलहरियालमणसिलरसिंदा ।**
**कणगाइधाउसेढी, वन्निअ अरणेट्टय पलेवा ॥३॥**

**अब्भयतूरीऊसं, मट्टीपाहाणजाइओणेगा ।**
**सोवीरंजणलूणाइ पुढविभेआइ इच्चाई ॥४॥**

स्फटिकः प्रसिद्धः, मणयश्चन्द्रकान्तादयः, रत्नानि वज्रकर्केतनादीनि यद्वा समुद्रोद्भवाः मणयः, खनिसमुद्भवानि रत्नानि, विद्रुमः प्रवालः, हिंगुलहरितालमनःशिलाः प्रसिद्धा एव, रसेन्द्रः पारदः । तथा कनकादयः सप्त धातवः ते चामी-स्वर्ण १ रुप्य २ ताम्र ३ लोह ४ त्रपु ५ सीसक ६ जसदाः ७ । एषामग्निसंयोगात्पूर्वं पृथ्वीकायत्वं अग्निसंयोगे त्वग्निकायत्वं । सेढीत्ति खटिका, वर्णिका रक्तमृत्तिका, अरणेटकः पाषाणखंडमिश्रितश्वेतमृत्तिकारूपो देशविशेषप्रसिद्धः, पलेवकः पाषाणभेदः ॥३॥

अभ्रकाणि पञ्चवर्णानि, तूरी वस्त्राणां पाशहेतुर्मृत्तिकाविशेषः, उषः क्षारभूमिः यत्रांकुरोत्पत्तिर्न भवति तथा मृत्तिकाजातयः पाषाणजातयश्चानेकाः, सौवीराञ्जनं श्वेतकृष्णादिभेदभिन्नमञ्जनं, लवणं सैन्धवादि प्रसिद्धमेव, आदिशब्दादन्येऽपि पृथिवीभेदा ग्राह्या इत्यादयः पृथ्वीकायभेदाः स्युः ॥४॥ अथाप्कायभेदानाह –

**भोमंतरिक्खमुदगं, ओसाहिमकरगहरितणूमहिया ।**
**हुंति घणोदहिमाई, भेआणेगा य आउस्स ॥५॥**

भौममुदकं कूपवाप्यादिजलं, आन्तरीक्षमुदकं मेघजं पयः, ओसत्ति अवश्यायस्नेहजलं, हिमं तुषारः, करको घनोपलः, हरितणुत्ति-स्नेहकाले दर्भाग्रेषु जलबिन्दवः, महिमा घूमरी, घनोदधिः विमानपृथिव्याधारभूतासंख्येययोजनप्रमाणपयः-पिण्डरूपः, इत्यादयः अनेकेऽप्कायस्य भेदाः भवन्ति ॥५॥ अथाग्निकायभेदानाह –

**इंगालजालमुम्मुर, उक्कासणिकणगविज्जुमाईया ।**
**अगणिजियाणं भेया, नायव्वा निउणबुद्धिए ॥६॥**

अंगारो ज्वालारहितः काष्ठाद्यग्निः, ज्वाला प्रसिद्धा, मुर्मुरः विरलाग्निकणभस्म लोके कारिषोऽग्निरिति प्रसिद्धः, उल्का आकाशाग्निरुत्पातकारणं व्योम्नि विविधाकारयुक्तरेखारूपा, अशनिः आकाशात्पतिता भुवि वह्निकणाः, कणगत्ति-गगनात्तारकवत् कणरूपः पतन्नग्निर्दृश्यते, विद्युत् प्रसिद्धैव, आदिशब्दात् सूर्यकान्तादेर्वंशघर्षणादेश्च समुत्पन्नो वह्निर्निरिन्धनः शुद्धाग्निश्च ग्राह्यः । इत्यादयो अग्निकायजीवानां भेदा निपुणबुद्ध्या ज्ञातव्याः ॥६॥ अथ वायुकायभेदानाह –

**उब्भामग उक्कलिया, मंडलिमहसुद्धगुंजवाया य ।**
**घणतणुवायाईया, भेया खलु वाउकायस्स ॥७॥**

उद्भ्रामकवातः–यस्तृणादिकमूर्ध्वं भ्रामयति, उल्कलिकावातः यः स्थित्वा स्थित्वा वाति येन धूलिषु रेखाः समुत्पद्यन्ते, मंडलीवातः यो मंडल्या वाति पत्रादिकं मंडलाकारेण भ्रामयतीत्यर्थः, महावातः–अतिप्रबलवातः ।

क्वचिन्मंडलिमुहत्ति पाठस्तत्र मुहत्ति मुखं वात इत्यर्थः, शास्त्रान्तरे तु वायुकायभेदेष्वयं प्रायो न दृश्यते ।

शुद्धवातो–मन्दवातः, गुंजवातः प्रसिद्ध एव, घनवाततनुवातौ घनोदधिवद्रत्नप्रभादीनां सौधर्मादीनां चाधारभूतौ तयोराद्यः स्त्यानघृतसदृशः अन्यस्तु तापितघृतवददृढस्वरूपः । इत्यादयो वायुकायस्य भेदा ज्ञेयाः, खलु निश्चये ॥७॥ अथ वनस्पतिकायभेदानाह –

**साहारणपत्तेया, वणस्सइजीवा दुहा सुए भणिया ।**
**जेसिमणंताणं तणु एगा साहारणा तेऊ ॥८॥**

श्रुते सिद्धान्ते वनस्पतिजीवा द्विधा भणिता उक्ताः । तत्रैके साधारणाः अन्ये प्रत्येकाः । तत्र तावत्साधारणस्वरूपं दर्शयति एसित्ति एषां वनस्पतिजीवानामनंतानामेका तनुरेकं शरीरं ते साधारणा अनंतकायिका ज्ञेया, एषां निगोद इत्यपि संज्ञाऽस्ति ॥८॥ अथ लोकप्रसिद्धान् कतिचिदनन्तकायान्नामग्राहमाह –

**कंदा अंकुर किसलय, पणगा सेवाल भूमिफोडा अ ।**
**अल्लयतिय गज्जर मोत्थ, वत्थुला थेग पल्लंका ॥९॥**

**कोमलफलं च सव्वं, गूढसिराइं सिणाइ-पत्ताइं ।**
**थोहरि कुंआरि गुग्गुलि, गलोय पमुहाइ छिन्नरुहा ॥१०॥**

कंदाः भूमध्यगाः वृक्षाद्यवयवास्ते चार्द्रा एव गृह्यन्ते शुष्काणां निर्जीवत्वात् एवमग्रेऽपि, अंकुरा उद्गमनावस्थायाम-व्यक्तपत्राद्यवयवाः, किशलयानि उद्गच्छन्नूतनकोमलदलानि, पनका पञ्चवर्णा फुल्लिः, शेवालं प्रसिद्धम्, भूमिस्फोटानि ग्रीष्मवर्षाकालभावीनि छत्राकाराणि, अल्लयतियत्ति-आर्द्रकत्रिकं आर्द्रार्द्रकं श्रृंगबेरं १ आर्द्रा हरिद्रा २ कर्चूकश्च तिक्तद्रव्यविशेषः

३, गर्जराणि प्रसिद्धानि, मुस्ता सूकरप्रिया, वत्थूलः शाकविशेषः स च प्रथमोद्‌गत एव, थेगः कन्दभेदः, पल्लंकः शाकविशेषः ॥९॥

तथा सर्व कोमलफ्लमवृद्धास्थिकं, गूढसिराणि अप्रकटसन्धीनि सिनादिपत्राणि सिनशब्देन देशविशेषे क्षारपीलुवृक्ष उच्यते, थोहरी प्रसिद्धा, कुमारी मांसलप्रणाल्याकारपत्रा, गुग्गुलः प्रसिद्धः, गिलोयत्ति गडूचील्लयाऽपि प्रसिद्धैव । एतेषु थोहरी-कुमारी-गुग्गुल-गडूचीप्रमुखाः साधारणवनस्पतयः छिन्नरुहा ज्ञेयाः, छिन्ना अपि पुनारोहंतीत्यर्थः । एते सर्वेऽप्यनन्तकायिकाः । एवमन्येऽपि वंशकरेल्लक-लवणवृक्षत्वगमृतवल्ली-कोमला-चाम्लिका-गिरिकर्णावल्लीप्रभृतयोऽनन्त-कायिकभेदाः ज्ञेयाः ॥१०॥ अथैतावंत एव अनंतकाया उताधिका इत्याशङ्कानिरासार्थमाह –

**इच्चाइणो अणेगे, हवंति भेया अणंतकायाणं ।**
**तेसिं परिजाणणत्थं, लक्खणमेयं सुए भणियं ॥११॥**

एते सूत्रोक्ता एव भेदा न, किन्तु इत्यादयः अनेके अनन्तकायिकानां भेदाः भवन्ति । तेषां परिज्ञापनार्थं एतल्लक्षणं श्रुते भणितम् ॥११॥ तदेव दर्शयति –

**गूढसिरसंधिपव्वं, समभंगमहीरुगं च छिन्नरुहं ।**
**साहारणं सरीरं, तव्विवरीअं च पत्तेयं ॥१२॥**



गूढानि-गुप्तानि प्रकटतयाऽज्ञायमानानि सिराः स्नसाः संधयः पर्वाणि च यस्य पत्रनालादेस्तद्गूढसिरासन्धिपर्व । तथा यस्य त्रौट्यमानस्य पत्रादेः समोऽदन्तुरो भंगश्छेदो भवति तत्समभंगम् । तथा छिद्यमानस्य न विद्यते हीरकाः तन्तुलक्षणा मध्ये यस्य तदहीरकम् । तथा यस्य छिन्नमपि खण्डं जलादिसामग्रीं प्राप्य गडूच्यादिवदन्यत्र पुनः प्ररोहति तच्छिन्नरुहम् । तदेतैर्लक्षणैः साधारणमनन्तकायिकशरीरं ज्ञेयम्। तल्लक्षणविपरीतं पुनः प्रत्येकं शरीरं बोध्यम् ॥१२॥ अथ प्रत्येक-वनस्पतेर्लक्षणादिकमाह –



**एगसरीरे एगो, जीवो जेसिं तु ते य पत्तेया ।**
**फलफूल्लछल्लिकट्ठा, मूलगपत्ताणि बीयाणि ॥१३॥**



येषां तरूणामेकस्मिन् शरीरे एको जीवः स्यात् ते प्रत्येका वनस्पतयः उच्यन्ते । चः समुच्चये, तुरेवार्थे ते एवेत्यर्थः ।

प्रत्येकवृक्षाणां सप्तसु स्थानेषु पृथग्जीवाः सन्ति । तानि स्थानानि दर्शयति-फलानि १ पुष्पाणि २ छल्लयः ३ काष्ठानि ४ मूलानि ५ पत्राणि ६ बीजानि ७ चेति । इह प्रत्येकवनस्पतीनां नाममात्रमुपदर्शितं, भेदविशेषविचारस्तु प्रज्ञापनादिभ्योऽवसेयः ॥१३॥ अथ सर्वैकेन्द्रियानाश्रित्य पृथ्व्यादयः पंचापि क्व क्व सन्तीति तद्विशेषमाह –



**पत्तेयतरुं मुत्तुं पंचवि पुढवाइणो सयललोए ।**
**सुहुमा हवंति नियमा अंतमुहुत्ताउ अद्दिस्सा ॥१४॥**

प्रत्येकतरुं मुक्त्वा पंचापि पृथिव्यादयः सूक्ष्मैकेन्द्रिया नियमात् निश्चयेन-सकललोके चतुर्दशरज्जुप्रमाणे लोके भवन्ति विद्यन्ते । परं ते कीदृशाः ? नियमादन्तर्मुहूर्तायुषः । पुनः कीदृशाः ? अदृश्याश्चर्मचक्षुषामगोचराः केवलिनां ज्ञानगोचराः इत्यर्थः । अत एव वह्निशस्त्रादिभ्यः तेषामुपघातो न भवति ॥१४॥ उक्ताः स्थावरभेदाः, सांप्रतं क्रमायातास्त्रसाः ते च द्वित्रिचतुःपंचेन्द्रियभेदाच्चतुर्धा, तेषु तावद् द्वीन्द्रियभेदानाह –

**संखकवड्डयगंडुल, जलोयचंदणगअलसलहगाई ।**
**मेहरि किमि पूअरगा, बेइंदियमाईवाहाई ॥१५॥**

शंखः प्रसिद्धः, कपर्दको वराटः, गंडोला उदरान्तर्बृहत्कृमयः, जलौकसः प्रसिद्धाः, चंदनकाः समयभाषयाऽक्षत्वेन प्रतीताः, अलसा भूनागाः ये वर्षाकाले वृष्टौ सत्यां भुव्युत्पद्यन्ते, लहका लालीयकजीवाः ये कूथितपूयिकादौ लालारूपाः समुत्पद्यन्ते, केचित्तु लहुगा इति पठन्ति लघुगात्रीति तस्यार्थः, अत्रापि पाठे त एव जीवा ज्ञेयाः, मेहरत्ति काष्ठकीटविशेषाः, कृमय उदरान्तर्वर्तिजीवाः, हर्षा मूलगुदप्रदेशकंडूकरा स्त्रीयोन्यन्तर्गता वा गडूत्पन्ना वा अनेकधा ज्ञेयाः, पूतरका जलान्तर्वर्तिनो रक्तवर्णाः कृष्णमुखजीवाः, मातृवाहिका गुर्जरदेशप्रसिद्धाः चूडेलित्तिनाम्ना विख्याताः, आदिशब्दात् शुक्त्यादयो वालकादयश्च द्वीन्द्रियभेदा अनुक्ता अपि ग्राह्याः । बालका ये मनुष्यांगे करपादादिषूत्पद्यन्ते। इहोभयत्रादिपदग्रहणाद् द्वीन्द्रिया जलजस्थलजभेदभिन्ना अनेकधा ग्राह्याः । एवं सर्वेऽपि द्वीन्द्रिया जीवा ज्ञेयाः । एषां देहवदनरूपमिन्द्रियद्वयमस्तीत्यर्थः ॥१५॥ अथ गाथाद्वयेन कतिचित् त्रीन्द्रियभेदानाह –

**गोमी मंकण जूआ, पिपीलि उद्देहिया य मक्कोडा ।**
**इल्लिय घयमिल्लिओ, सावयगोकीडजाईओ ॥१६॥**

**गद्दहय चोरकीडा, गोमयकीडा य धन्नकीडा य ।**
**कुंथु गोवालिय इलिया तेइंदिय इंदगोवाइ ॥१७॥**

गुल्मिः कर्णशृगाली, मत्कुणयूके प्रसिद्धे उपलक्षणाल्लिक्षाऽपि, पिपीलिका कीटिका, उपदेहिका वाल्मीकजीवाः, चः समुच्चये, मत्कोटकाः प्रतीताः, इल्लिका धान्येषूत्पन्ना, घयमिल्लित्ति घृतेलिकाः प्राकृतत्वान् मकारागमः, सावयत्ति **लोकभाषायां सावाः नाम चर्मजूकाः ते च भाविकष्टसूचका मनुष्याणां शरीरावयवेषु प्रागेवोत्पद्यन्ते** । गोकीटिकाः प्रसिद्धा एव जातिग्रहणेन सर्वतिरश्चां कर्णाद्यवयवेषूत्पन्नाश्चिच्चिडादयो ग्राह्याः ॥१६॥

गर्दभकाः लोकप्रसिद्धाः, चोरकीटाः भूमावधःसंक्षिप्तमुखा विस्तीर्णा वृत्ताच्छिद्रकारकाः, गोमयकीटाश्छगणोत्पन्नाः, धान्यकीटाः घुणादयः, कुन्थुः प्रसिद्धः, गोपालिका जीवविशेषः, ईलिका लहजातिः, इन्द्रगोपाः रक्तवर्णकीटाः ये वर्षासु प्रथमवृष्टावुत्पद्यन्ते

लोके ममोलात्वेन प्रसिद्धा आदिशब्दादन्येऽपि ग्राह्याः । एते सर्वेऽपि त्रीन्द्रिया जीवा ज्ञेयाः । एषां देहमुखनासिकाः स्युरित्यर्थः ॥१७॥ अथ कियतश्चतुरिन्द्रियभेदानाह –

**चउरिंदिया य विच्छू ढिंकुण भमरा य भमरिया तिड्डा ।**
**मच्छिय डंसा मसगा कंसारी कविलडोलाइ ॥१८॥**

च पुनर्वक्ष्यमाणा जीवाश्चतुरिन्द्रिया उच्यन्ते । एषां देहमुखघ्राणचक्षूंषि स्युरित्यर्थः । तान्दर्शयति–वृश्चिकः प्रसिद्धः, ढिंकुणा जीवविशेषाः, भ्रमराः कृष्णवर्णाः, भ्रमरिकाः पीतादिविविधवर्णाः विविधाकारवत्यश्च, तिडाः प्रसिद्धाः, मक्षिका अपि प्रतीता एवोपलक्षणान्मधुमक्षिकादयोऽपि ग्राह्याः, दंशाः सिन्धुदेशप्रसिद्धा वर्षोद्भवाः, मशकास्तु दंशकाकारवन्तः सर्वर्त्तुभाविनश्च, कंसारिका प्रसिद्धा, कपिलडोलका जीवविशेषः, खडमांकडीति प्रसिद्धः, आदिशब्दात् पतंगढिढणादयो ग्राह्याः । एवमन्येऽप्यनेके चतुरिन्द्रिया जीवा ज्ञेयः ॥१८॥ अथ पञ्चेन्द्रियभेदानाह –

**पंचिंदिया य चउहा, नारयतिरियामणुस्सदेवा य ।**
**नेरइया सत्तविहा नायव्वा पुढविभेएणं ॥१९॥**

पञ्च स्पर्शनरसनघ्राणचक्षुःश्रोत्रनामकानीन्द्रियाणि येषां ते पञ्चेन्द्रिया जीवाः । ते चतुर्धा-नारकाः १ तिर्यंचो २ मनुष्याः ३ देवाश्च ४ । तत्र नैरयिका रत्नप्रभापृथ्वीभेदेन सप्तविधाः ज्ञातव्याः । पृथ्वीनां नामानि यथा-रत्नप्रभा १ शर्कराप्रभा २ वालुकाप्रभा ३ पंकप्रभा ४ धूमप्रभा ५ तमःप्रभा ६ तमस्तमःप्रभा ७ चेति । एतत् स्थानसप्तकोत्पन्नत्वान्नारका अपि सप्तधोच्यन्ते ॥१९॥ पञ्चेन्द्रियेषु नारकभेदानुक्त्वा अथ गाथाचतुष्टयेन पञ्चेन्द्रियतिरश्चां मनुष्याणां च भेदानाह –

**जलयरथलयरखयरा तिविहा पंचिंदिया तिरिक्खा य ।**
**सुसुमार मच्छ-कच्छव-गाहा-मगरा य जलचारी ॥२०॥**

**चउपय उरपरिसप्पा भुजपरिसप्पा य थलयरा तिविहा ।**
**गोसप्पनउलपमुहा बोधव्वा ते समासेणं ॥२१॥**

**खयरा रोमयपक्खी चम्मयपक्खी य पायडा चेव ।**
**नरलोगाओ बाहिं समुग्गपक्खी वियपक्खी ॥२२॥**

च पुनः पञ्चेन्द्रियाः तिर्यञ्चस्त्रिविधाः जलचराः १ स्थलचराः २ खचराः ३ । तत्र तावज्जलचारिणः पञ्चधा-शिंशुमारा-महिषसदृशाः १ मत्स्याः २ कच्छपाश्च प्रसिद्धा एव तत्र मत्स्या वलयाकारं वर्जयित्वा विविधाकारवन्तो भवन्ति, ३ ग्रहास्तंतुकतया प्रसिद्धाः ४ मकरा महामत्स्याः ५ । एते जलचरा उक्ताः जले चरन्तीति व्युत्पत्तेः जलं विना विपद्यन्ते इत्यर्थः ॥२०॥

तथा स्थलचरास्त्रिविधाः चतुष्पदाः १ उरःपरिसर्पाः २ भुजपरिसर्पाश्च ३ । ते समासेन संक्षेपेण गोसर्पनकुलप्रमुखा बोद्धव्याः ज्ञातव्याः। अयम्भावः-चत्वारः पादा येषां ते चतुष्पदाः गोमहिषादयः १, उरसा परिसर्पन्ति गच्छन्ति ये ते उरःपरिसर्पाः कृष्णसर्पादयः २ भुजाभ्यां परिसर्पन्ति ये ते भुजपरिसर्पाः नकुलगृहगोधादयः २ एते स्थलचरा ज्ञेयाः ॥२१॥

तथा खे आकाशे चरन्तीति खचराः पक्षिणः । ते द्विधा-रोमजपक्षिणः १ चर्मजपक्षिणश्च २ । तत्र रोमभिर्जाता ये पक्षाः ते सन्त्येषामिति रोमजपक्षिणः सुकहंससारसादयः, चर्मणो जाताः पक्षाः सन्त्येषामिति चर्मजपक्षिणः वल्गुलीचर्मचटिकादय

ते उभयेऽपि प्रकटा एव । चः पूरणे । तथा जम्बूद्वीपो धातकीखण्डः पुष्करवरद्वीपादर्धं चेति सार्धद्वीपद्वयं लवणः कालोदश्चेति द्वौ समुद्रावेतत्समुदितं स्वर्णमयमानुषोत्तरगिरि परिवेष्टितं पञ्चचत्वारिंशल्लक्षयोजनप्रमाणं क्षेत्रं नरलोक उच्यते । अत्रैव मनुष्याणां जन्ममरणसम्भवात् । तस्मान्नरलोकान्मनुष्यक्षेत्राद्बहिः समुद्गपक्षिणो-विततपक्षिणश्चेति द्विविधाः पक्षिणो भवन्ति । तत्र समुद्गवत् संपुटीभूता मिलिताः पक्षाः सन्त्येषामित्याद्याः १, वितता विस्तीर्णा एव पक्षाः सन्त्येषामिति द्वितीयाः २ । एते सर्वे खचरा ज्ञेयाः । उक्ताः त्रिविधास्तिर्यञ्चः ॥२२॥ अथ गाथार्द्धेन तेषां प्रत्येकं द्वैविध्यमन्यप्रकारेणाह—

**सव्वे जलथलखयरा सम्मुच्छिमा गब्भया दुहा हुंति ।**

सर्वे जलचराः स्थलचराः खचरास्तिर्यञ्चः संमूर्च्छिमा गर्भजाश्चेति द्विधा भवन्ति । तत्र मातृपितृनिरपेक्षोत्पत्तयः संमूर्च्छिमाः । गर्भाज्जाताः गर्भजा इति । एक-द्वि-त्रि-चतुरिन्द्रियास्तिर्यञ्चः संमूर्च्छिमा एव स्युः, पञ्चेन्द्रियाः द्विधापीति विवेकः । उक्तास्तिरश्चां भेदाः। अथ गाथार्द्धेन मनुष्यभेदानाह —

**कम्माकम्मगभूमि अंतरदीवा मणुस्सा य ॥२३॥**

कर्मभूमिजाः १ अकर्मभूमिजाः २ अन्तर्द्वीपवासिनश्चेति त्रिविधा मनुष्या भवन्ति । तत्र कृषिवाणिज्यादिकर्मप्रधानभूमयः कर्मभूमयः। ताश्च सार्द्धद्वीपद्वये पञ्च भरतानि पञ्चैरावतानि पञ्च महाविदेहाश्चेति पञ्चदश भवन्ति । तासु जाताः कर्मभूमिजा मनुष्या उच्यन्ते । प्रागुक्तं कर्म यत्र नास्ति ता अकर्मभूमयः त्रिंशत् । तथाहि–हैमवत १ ऐरण्यवत २ हरिवर्ष ३ रम्यक् ४ देवकुरु ५ उत्तरुकुरु ६ संज्ञाः षड् भूमयः पञ्चभिर्मेरुभिगुणितास्त्रिंशद् भवन्ति । तासु जाता अकर्मभूमिजा उच्यन्ते । ते च युगलधार्मिका एव ज्ञेयाः । अथान्तरद्वीपाः षट्पञ्चाशत् ते च लवणसमुद्रे हिमवद्गिरेः शिखरिगिरेश्चोभयप्रान्ताभ्यां निर्ग़तयोर्द्वयोर्द्वयोर्दंष्ट्रयोरुपरि सप्त सप्त विद्यन्ते । तद्द्वीपवासिनो युगलिनो मनुष्याः पल्योपमासंख्येयभागवर्षायुषोऽष्ट-शतधनुरुच्छ्रिताश्च सन्ति । एते सर्वे त्रिविधा अपि मनुष्या गर्भजाः संमूर्च्छिमाश्चेति द्विधा बोध्याः ॥२३॥ अथ चतुर्विधदेवभेदानाह–

**दसहा भवणाहिवई अट्ठविहा वाणमंतरा हुंति ।**
**जोइसिया पंचविहा दुविहा वेमाणिया देवा ॥२४॥**

देवा हि भवनपति १ व्यन्तर २ ज्योतिष्क ३ वैमानिक ४ भेदाच्चतुर्धा । तत्र भवनाधिपतयो दशधा–असुर १ नाग २ सुवर्ण ३ विद्युत् ४ अग्नि ५ द्वीप ६ उदधि ७ दिग् ८ वायु ९ स्तनिताः १० कुमारान्ता ज्ञेयाः । तथा वानमन्तरा व्यन्तरा अष्टविधा अष्टप्रकारा भवन्ति । ते चामी–पिशाचाः १ भूताः २ यक्षाः ३ राक्षसाः ४ किंनराः ५ किम्पुरुषाः ६ महोरगाः ७ गान्धर्वा ८ इत्यष्टौ । पुनरन्येऽपि अणपन्नीप्रभृतयो व्यन्तरभेदा ज्ञेयाः । तथा ज्योतिष्काः पञ्चविधाः–चन्द्र १ सूर्य २ ग्रह ३ नक्षत्र ४ तारा ५ रूपाः । ते पुनर्द्विधा–मनुष्यक्षेत्रे चराः १ तद्बहिः स्थिराः २ इति । तथा वैमानिका देवा द्विविधाः कल्पोपपन्नाः १ कल्पातीताश्च २ । तत्र सौधर्म १ ईशान २ सनत्कुमार ३ माहेन्द्र ४ ब्रह्मलोक ५ लान्तक ६ शुक्र ७ सहस्रार ८ आनत ९ प्राणत १० आरण ११ अच्युत १२ द्वादशकल्पवासिनो देवाः कल्पोपपन्ना उच्यन्ते । इन्द्रसामानिकादिव्यवस्थावन्त इत्यर्थः । तथा सुदर्शन १ सुप्रबुद्ध २ मनोरम ३ सर्वतोभद्र ४ विशाल ५ सुमनः ६ सौमनस ७ प्रियंकर ८ नंदिकर ९ नाम नवग्रैवेयकविमानवासिनः, विजय १ वैजयन्त २ जयन्त ३ अपराजित ४ सर्वार्थसिद्ध ५ नाम पञ्चानुत्तरविमानवासिनश्च देवाः कल्पातीता उच्यन्ते । एते सर्वेऽपि अहमिन्द्रत्वात् प्रागुक्तव्यवस्थाशून्या इत्यर्थः ॥२४॥

**॥ इत्युक्ताः संसारिजीवाः ॥**

अथ सिद्धजीवभेदानाह –

**सिद्धा पनरसभेया, तित्थातित्थाइसिद्धभेएणं ।**
**एए संखेवेणं जीवविगप्पा समक्खाया ॥२५॥**



सिद्धाः सर्वकर्मनिर्मुक्ता जीवाः । तीर्थकरातीर्थकरादिसिद्धभेदेन पञ्चदशभेदा ज्ञेयाः । अत्र सूत्रे प्राकृतत्वात्करपदलोपः । तत्र तीर्थकराः सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः १ अतीर्थकराः सामान्यकेवलिनः सन्तो ये सिद्धास्तेऽतीर्थकरसिद्धाः २ । आदिपदात्तीर्थसिद्धा अतीर्थसिद्धादिपञ्चदशभेदाः **नवतत्त्वादिभ्यो** ज्ञातव्याः । इत्थं संक्षेपेण एते जीवानां विकल्पाः भेदाः समाख्याताः कथिताः ॥२५॥ अथ यद्वक्तव्यं तत्स्वयमेव सूत्रकृदाह –



**एएसिं जीवाणं सरीरमाऊठिईसकायंमि ।**
**पाणा जोणिपमाणं जेसिं जं अत्थि तं भणिमो ॥२६॥**



एतेषां पूर्वोक्तैकेन्द्रियादीनां जीवानां शरीरमिति प्रमाणशब्दस्य सर्वत्राभिसम्बन्धात् शरीरप्रमाणं १, आऊत्ति–जघन्योत्कृष्टायुः–

प्रमाणं २, तथा एकेन्द्रियादेर्मृत्वा पुनर्या तत्रैवोत्पत्तिः सा स्वकाये स्थितिः तत्प्रमाणं ३, तथा प्राणा दश तत्प्रमाणं ४, योनिश्चतुरशीतिलक्षास्ततप्रमाणं ५ येषां जीवानां यदस्ति तद्वयं भणिमोत्ति भणिष्याम इत्यर्थः ॥२६॥ अथैषां शरीरप्रमाणं तावदाह –

**अंगुल असंखभागो, सरीरमेगिंदियाण सव्वेसिं ।**
**जोयणसहस्समहियं नवरं पत्तेयरुक्खाणं ॥२७॥**

सर्वेषां सूक्ष्मबादरपृथिव्यादिभेदभिन्नानामेकेन्द्रियाणां शरीरं अंगुलस्यासंख्येयभागप्रमाणं स्यात् । नवरं ति अयं विशेषः– प्रत्येकवृक्षाणां प्रत्येकवनस्पतीनां शरीरं योजनसहस्रमधिकं किञ्चिदधिकसहस्रयोजनप्रमाणमित्यर्थः । एतच्च समुद्रादिषु उत्सेधांगुलेन योजनसहस्रावगाहजले पद्मनालादीनां बहिर्द्वीपेषु लतादीनां च बोध्यम् । किञ्चिदत्र यद्यपि सामान्यतः सर्वेषां पृथ्व्यादीनां शरीरमंगुलासंख्येयभागमुक्तं तथापि संग्रहिण्यादिभ्यो विशेषतया ज्ञातव्यम् । अंगुलासंख्येयभागस्यासंख्यभेदत्वात् ॥२७॥ एवमेकेन्द्रियाणां देहप्रमाणमुक्त्वा द्वीन्द्रियादीनां तदाह –

**बारस जोयण तिन्नेव गाउआ जोयणं च अणुकमसो ।**
**बेइंदिय तेइंदिय चउरिंदिय देहमुच्चत्तं ॥२८॥**

द्वादशयोजनानि द्वीन्द्रियाणां बहिः समुद्रवर्त्ति शंखादीनां, तथा त्रीण्येव गव्यूतानि त्रीन्द्रियाणां बहिर्द्वीपवर्त्तिकर्णश्रृगाल्यादीनां, तथा योजनं चैकं चतुरिन्द्रियाणां बहिर्द्वीपवर्त्तिभ्रमरादीनां । अनुक्रमशः अनुक्रमेण । देहमुच्चत्तंत्ति प्राकृतत्वेन विभक्तिव्यत्ययात् देहस्योच्चत्वम् । यद्वा देहं शरीरमुच्चत्वेन भगवता भणितमिति शेषः ॥२८॥ अथ पञ्चेन्द्रियाणां नारकादीनां देहप्रमाणमाह—

**धणुसयपंचपमाणा, नेरइया सत्तमाइपुढवीए ।**
**तत्तो अद्धद्धूणा, नेया रयणप्पहा जाव ॥२९॥**

सप्तम्यां पृथिव्यां तमस्तमःप्रभायां धनुःपञ्चशतप्रमाणा नैरयिका ज्ञेयाः ७ । ततः परं व्युत्क्रमेणार्द्धार्द्धोनाः कायप्रमाणमाश्रित्य नारका ज्ञेयाः यावत् रत्नप्रभा नाम प्रथमा पृथ्वी स्यात् । अयम्भावः-षष्ठयां पृथिव्यां सार्द्धे द्वे धनुःशते देहप्रमाणं ६, पञ्चम्यां सपादशतधनूंषि ५, चतुर्थ्यां सार्द्धद्वाषष्टिर्धनूंषि ४, तृतीयस्यां सपादैकत्रिंशद्धनूंषि ३, द्वितीयस्यां सार्द्धपञ्चदशधनूंषि द्वादश

चांगुलानि २, प्रथमायां पृथ्व्यां सप्तधनूंषि त्रयो हस्ताः षडंगुलानि देहमानं १ इदं स्वाभाविकदेहप्रमाणमुक्तम् । उत्तरवैक्रियं त्वस्माद् द्विगुणं ज्ञेयम् ॥२९॥

॥ इत्युक्तं नारकाणां देहमानम् ॥

अथ पञ्चेन्द्रियतिरश्चां तदाह –

**जोयणसहस्समाणा, मच्छा उरगा य गब्भया हुंति ।**
**धणुअपुहुत्तं पक्खिसु भुयचारी गाउअपुहुत्तं ॥३०॥**

**खयराधणुअपुहुत्तं भुयगा उरगा य जोयणपुहुत्तं ।**
**गाउअपुहुत्तमित्ता समुच्छिमा चउप्पया भणिया ॥३१॥**

गर्भजाः संमूर्च्छिमाश्चेति सामान्यतो द्विविधास्तिर्यञ्चः । तत्र गर्भजा मत्स्याः च पुनर्गर्भजा उरगाः उरःपरिसर्पा योजनसहस्रप्रमाणा देहमानेन भवन्ति । एतत्प्रमाणा मत्स्या स्वयंभूरमणसमुद्रे उरगा बहिर्द्वीपेषु बोध्याः । तथा गर्भजाः पक्षिणो धनुःपृथक्त्वं नवधनुःप्रमाण देहा इत्यर्थः । द्विप्रभृतिरानवभ्यः पृथक्त्वमुच्यते । तथा भुजपरिसर्पा गोधादयो गर्भजाः

गव्यूतपृथक्त्वं देहमानेन भवन्ति ॥३०॥

तथा संमूर्च्छिमाः खचराः पक्षिणो भुजगाः भुजपरिसर्पाश्च धनुःपृथक्त्वं देहमानेन भवन्ति । संमूर्च्छिमा उरगा योजनपृथक्त्वं देहमानेन स्युः । तथा संमूर्च्छिमाश्चतुष्पदा गव्यूतपृथक्त्वमात्रा नवगव्यूतप्रमाणदेहा भणिता उक्ताः । इह बहुषु पुस्तकेषु "उरगा भुयगा य जोयण पुहुत्तं" इति पाठो दृश्यते स चिन्त्यः **प्रज्ञापनासंग्रहिण्यादिभि**विरोधात् ॥३१॥

अथावशिष्टगर्भजचतुष्पदतिरश्चां मनुष्याणां च देहमानमाह –

**छच्चेव गाउआइं, चउप्पया गब्भया मुणेयव्वा ।**
**कोसतिगं च मणुस्सा, उक्कोससरीरमाणेणं ॥३२॥**

गर्भजाः चतुष्पदा उत्कर्षतः षड्गव्यूतान्येव मन्तव्याः । चः समुच्चये । एतद्देवकुर्वादौ गर्भजगजानाश्रित्य बोद्धव्यम् । तथा गर्भजा मनुष्या उत्कृष्टशरीरप्रमाणेन कोशत्रिकोच्चा मन्तव्याः । इदमपि देवकुर्वादौ युगलिकनरानाश्रित्य ज्ञेयम् ॥३२॥

अथ देवानां स्वाभाविकदेहमानमाह –

ईसाणंतसुराणं रयणीओ सत्त हुंति उच्चत्तं ।
दुगदुगदुगचउगेविज्जणुत्तरे इक्किक्क परिहाणी ॥३३॥

अत्रेशानान्तग्रहणेन भवनपतिव्यन्तरज्योतिष्कसौधर्मेशाना ग्राह्याः । तेनेशानान्तं ईशान नाम द्वितीयदेवलोकं यावत् सुराणां देवानां सप्त रत्नयः सप्त हस्ताः शरीरस्योच्चत्वं भवति । ततः परं द्विक १ द्विक २ द्विक २ चतुष्क ४ ग्रैवेयक ५ अनुत्तरेषु ६ एकैकस्य हस्तस्य परिहारः न्यूनत्वं स्यात् । अयमर्थः-सनत्कुमारमाहेन्द्रद्विके षट् हस्ताः । ब्रह्मलान्तकद्विके पञ्च । शुक्रसहस्रारद्विके चत्वारः । आनतादिचतुष्के त्रयः । नवग्रैवेयकेषु द्वौ हस्तौ । पञ्चानुत्तरेषु एक एको हस्तः । देहमानं सर्वेषां जीवानां देहप्रमाणमुत्सेधांगुलेन ज्ञेयम् ॥३३॥

इत्युक्तं देहमानद्वारम् ।

साम्प्रतमायुर्द्वारमाह –

बावीसा पुढवीए, सत्त य आउस्स तिन्नि वाउस्स ।
वाससहस्सा दस तरुगणाण तेउत्तिरत्ताउ ॥३४॥

पृथिव्याः पृथिवीकायस्य द्वाविंशतिवर्षसहस्राः उत्कृष्टायुःस्थितिः, एवमप्कायस्य सप्तवर्षसहस्राः, वायुकायस्य त्रयो वर्षसहस्राः, तरूणां प्रत्येकवनस्पतिसमूहानां दश वर्षसहस्राः उत्कृष्टायुःस्थितिः, तेजस्कायस्य त्रीण्यहोरात्राण्युत्कृष्टायुःस्थितिः। जघन्या तु सर्वेषामप्यान्तर्मुहूर्तिकी बोध्या ॥३४॥ इत्युक्तं बादरस्थावरपञ्चकायुः । अथ द्वीन्द्रियादीनां तदाह—

**वासाणि बारसाऊ बिइंदियाणं तिइंदियाणं तु ।**
**अउणापन्नदिणाइं चउरिंदीणं तु छम्मासा ॥३५॥**

द्वीन्द्रियाणां द्वादशवर्षाण्यायुः उत्कृष्टा स्थितिः, त्रीन्द्रियाणां चैकोनपञ्चाशद्दिनानि आयुः, चतुरिन्द्रियाणां तु षण्मासाः, जघन्यं तु सर्वेषां प्राग्वत् ॥३५॥ अथ चतुर्विधपञ्चेन्द्रियाणामुत्कृष्टायुर्मानमाह—

**सुरनेरइयाणठ्ठिइ, उक्कोसा सागराणि तित्तीसं ।**
**चउपय तिरिय मणुस्सा, तिन्नि य पलिओवमा हुंति ॥३६॥**

**जलयरउरभूयगाणं परमाऊ होइ पुव्वकोडिओ ।**
**पक्खीणं पुण भणिओ असंखभागो य पलियस्स ॥३७॥**

**सव्वे सुहुमा साहारणा य संमुच्छिमा मणुस्सा य ।**
**उक्कोसजहन्नेणं अंतमुहुत्तं चिय जियंति ॥३८॥**

सुराणां नैरयिकाणां चोत्कृष्टा स्थितिः त्रयस्त्रिंशत्सागरोपमाणि भवन्ति, इयं चानुत्तरेषु सप्तमनरके च बोध्या । तथा लुप्तषष्ठीनिर्देशात् चतुष्पदतिरश्चां मनुष्याणां चोत्कृष्टा स्थितिः त्रिपल्योपमप्रमाणा इयं च देवकुर्वादौ ज्ञेया । इह पल्योपमसागरोपमे सूक्ष्माद्धाविशेषेण विशिष्टे ग्राह्ये । देवनारकाणां जघन्यायुर्दशवर्षसहस्रमानं बोध्यम् । नरतिरश्चां तु **प्राग्वत्** ॥३६॥

जलचराणां गर्भजसंमूर्च्छिमभेदाद् द्विविधानामुरगाणां भुजगानां च गर्भजानामेव परमायुरुत्कृष्टायुः पूर्वकोटिर्भवति । सप्ततिर्लक्षकोटयः षट्पञ्चाशच्च सहस्रकोटयो वर्षाणि एकं पूर्वमुच्यते, ईदृक्कोटिपूर्वाणीत्यर्थः, तथा गर्भजपक्षिणां पुनरुत्कृष्टायुः पल्योपमस्यासंख्येयभागो भणित उक्तः । इह सूत्रे संमूर्च्छिमस्थलचरखचरादिपञ्चेन्द्रियाणामुत्कृष्टायुर्नोक्तं तद् ग्रन्थान्तरगतैतद्

गाथाया बोध्यम् -

"समुच्छि पणिंदि थलयर, खयर उरग भुयय जिट्ठुट्ठिइकमसो । वाससहस्सा चुलसी बिसत्तरी तिपन्न बायाला ॥१॥" इति । (बृहत्संग्रहणी गाथा-२६३)

सर्वे सूक्ष्मा: पृथ्व्यप्तेजोवायुवनस्पतयश्च पुन: साधारणा: बादरनिगोदरुपा अनंतकायिकाश्च । पुन: संमूर्च्छिमा मनुष्या ये एकोत्तरशतक्षेत्रोत्पन्नगर्भजनराणां मलमूत्रवातादिषूत्पद्यन्ते ते सर्वेऽप्युत्कर्षेण जघन्येन च अन्तर्मुहूर्तमेव जीवन्ति अन्तर्मुहूर्तायुष इत्यर्थ: । अन्तर्मुहूर्तस्यासंख्यभेदत्वान्नानात्वमवसेयम् ॥३८॥ अथोक्तं द्वारद्वयं निगमयन्नाह –

**ओगाहणाऽऽउ माणं एवं संखेवओ समक्खायं ।**
**जे पुण इत्थ विसेसा विसेससुत्ताउ ते नेया ॥३९॥**

अवगाहन्ते अवतिष्ठन्ते जीवा अस्यामित्यवगाहना देह:, तस्या आयुषश्च मानं प्रमाणं एवमुक्तप्रमाणेन संक्षेपत: समाख्यातं कथितं । ये पुनरत्र विशेषदेवलोकादौ प्रतराद्याश्रित्य अवगाहनायुर्भेदादय: सन्ति ते विशेषसूत्रात् **संग्रहणीप्रज्ञापनादेर्ज्ञेया** ज्ञातव्या: ॥३९॥ अथ तृतीयं स्वकायस्थितिद्वारमाह –

**एगिंदिया य सव्वे, असंख उस्सप्पिणी सकायंमि ।**
**उववज्जंति चयंति य, अणंतकाया अणंताओ ॥४०॥**

सर्वे एकेन्द्रियाः पृथिव्यप्तेजोवायुप्रत्येकवनस्पतयः असंख्येयोत्सर्पिण्यवसर्पिणीर्यावत् स्वकाये पृथिव्यादावुत्पद्यन्ते च पुनश्चव्यन्ते म्रियन्ते पुनः पुनस्तत्रैवोत्पत्तिविनाशौ लभन्ते इत्यर्थः । तथा अनंतकायवनस्पतिजीवाः अनंता उत्सर्पिण्यवसर्पिणी-र्यावत् स्वकाये उत्पद्यन्ते विपद्यन्ते च ॥४०॥ इत्युक्ता एकेन्द्रियाणां कायस्थितिः । अथ द्वीन्द्रियादीनां तामाह –

**संखिज्ज समा विगला, सत्तट्ठ भवा पणिंदितिरिमणुया ।**
**उववज्जंति सकाए नारय देवा य नो चेव ॥४१॥**

विकला द्वित्रिचतुरिन्द्रियाः संख्येयसमाः संख्यातवर्षसहस्राणि यावत् स्वकाये उत्पद्यन्ते तथा पञ्चेन्द्रियास्तिर्यंचो मनुष्याश्च सप्ताष्टौ भवान् यावत् स्वकाये उत्पद्यन्ते । तत्र सप्तभवाः संख्येयवर्षायुषः अष्टमस्त्वसंख्यातवर्षायुष्क एव ज्ञेयः । अत्राष्टभवेषूत्कर्षतः पूर्वकोटिपृथक्त्वाधिकानि त्रीणि पल्योपमानि कालो बोध्यः । जघन्या तु सर्वत्रापि कायस्थितिरन्तर्मुहूर्तमेवेति ।

तथा नारका देवाश्च मृत्वा नोत्पद्यन्ते अतस्तेषां सा नोक्ता ॥४१॥ अथ चतुर्थं प्राणद्वारमाह –

**दसहा जियाण पाणा, इंदियउसासाउबलरूवा ।**
**एगिंदिएसु चउरो, विगलेसु छ सत्त अट्ठेव ॥४२॥**

**असन्निसन्निपंचिंदिएसु, नवदसकमेण बोधव्वा ।**
**तेहिं सह विप्पओगो जीवाणं भण्णए मरणं ॥४३॥**

दशधा दशप्रकारा जीवानां प्राणाः । ते चेन्द्रियोच्छ्वासायुर्योगबलरूपाः स्युः । तत्रेन्द्रियाणि स्पर्शनादीनि पञ्च ५ उच्छ्वासशब्देनोच्छ्वासनिश्वासो गृह्यते ६ आयुर्जीवितम् ७ योगानां मनोवाक्कायानां बलानि त्रीणि मनोबल ८ वचनबल ९ कायबल १० रूपाणि एवं दश स्युः । 'इहि इंदियऊसासआउबलरूवत्ति' पाठान्तरं । तत्र बलशब्देन मनोबलादित्रयं ग्राह्यम् । अथ येषां यावन्तः प्राणास्तदाह–एकेन्द्रियेषु पञ्चसु चत्वारः प्राणाः स्पर्शनेन्द्रियोच्छ्वासायुःकायबलरूपाः स्युः । विकलेन्द्रियेषु त्रिषु षट् सप्त अष्टैव प्राणाः स्युः । तथाहि–द्वीन्द्रियेषु प्रागुक्ताश्चत्वारो रसनेन्द्रियवाग्बलयुताः षट् स्युः । त्रीन्द्रियेषु त एव

षट् घ्राणेन्द्रिययुताः सप्त स्युः । चतुरिन्द्रियेषु त एव सप्त चक्षुरिन्द्रिययुता अष्टौ प्राणाः स्युः ॥४२॥

असन्नित्ति-असंज्ञिपञ्चेन्द्रियेषु संज्ञिपञ्चेन्द्रियेषु च क्रमेण नव दश प्राणा बोद्धव्याः । तत्रासंज्ञिपञ्चेन्द्रियेषु त एवाष्टौ श्रोत्रेन्द्रिययुता नव स्युः । तथा संज्ञिपञ्चेन्द्रियेषु त एव नव मनोबलयुत्ता दश प्राणाः स्युः । तैः प्राणैः सह विप्रयोगो जीवानां मरणं भण्यते । अत्र देवनारकगर्भजतिर्यग्मनुष्याः संज्ञिन उच्यन्ते । संमूर्च्छिमतिर्यग्मनुष्यास्तु असंज्ञिन उच्यन्ते । तत्र संमूर्च्छिममनुष्याणां वाग्बलादिवर्जिताः सप्ताष्टौ प्राणा बोध्याः ॥४३॥ अथोक्तस्वरूपं मरणं जीवैः कतिवारान् प्राप्तमित्याशंका निरासार्थमाह –

**एवं अणोरपारे संसारे सायरंमि भीमंमि ।**
**पत्तो अणंतखुत्तो जीवेहिं अपत्तधम्मेहिं ॥४४॥**

अप्राप्तधर्मैं र्जीवैः एवं अणोरपारत्ति-अवारपारवर्जिते अत एव भीमे भयंकरे संसारे सागरे संसाररूपसमुद्रे एवं प्राणवियोगलक्षणप्रकारेणानन्तकृत्वः अनन्तवारान् पत्तोत्ति प्राप्तम् प्रसंगान्मरणमिति संबध्यते । प्राकृतत्वात्पुंलिंगनिर्देशः । क्वचित्तु 'पत्तं' पाठो दृश्यते ॥४४॥ अथ पञ्चमं योनिद्वारमाह –

तह चउरासीलक्खा संखा जोणीण होइ जीवाणं ।
पुढवाईण चउण्हं, पत्तेयं सत्त सत्तेव ॥४५॥

दसपत्तेयतरूणं चउदस लक्खा हवंति इयरेसु ।
विगलिंदिएसु दो दो चउरो पंचिंदि तिरियाणं ॥४६॥

चउरो चउरो नारयसुरेसु मणुआण चउदस हवंति ।
संपिंडिया य सव्वे चुलसीलक्खा उ जोणीणं ॥४७॥



तथा चतुरशीतिर्लक्षा जीवानां योनीनां संख्या भवन्ति । जीवानामुत्पत्तिस्थानं योनिरुच्यते । तत्र पृथिव्यादीनां चतुर्णां प्रत्येकं सप्त सप्तैव लक्षा योनयः स्युः । एतेन पृथिव्यप्तेजोवायूनामष्टाविंशतियोनिलक्षा जाताः ॥४५॥



दसेति प्रत्येकतरूणां प्रत्येकवनस्पतीनां दशयोनिलक्षाः स्युः । इतरेषु साधारणवनस्पतिकायेषु चतुर्दशलक्षा योनयो भवन्ति । तथा विकलेन्द्रियेषु द्वित्रिचतुरिन्द्रियेषु द्वे द्वे लक्षे योनीनां भवतः । तथा पञ्चेन्द्रियतिरश्चां चतुर्लक्षा

यानयः स्युः ॥४६॥

चउरो इति–नारकेषु सुरेषु च चतस्रश्चतस्रो लक्षा योनयः स्युः । तथा मनुजानां मनुष्याणां चतुर्दशलक्षा योनयो भवन्ति । एवं सर्वे योनिभेदाः संपिण्डिता एकत्रकृताः सन्तो योगीनां चतुरशीतिलक्षा भवन्ति । तु शब्दौ पूरणार्थौ ॥४७॥ इत्युक्तं संसारिजीवानाश्रित्य शरीरादिद्वारपञ्चकम् ॥ साम्प्रतं सिद्धानाश्रित्य तदाह –

**सिद्धाणं नत्थि देहो न आउ कम्मं न पाणजोणीओ ।**
**साइअणंता तेसिं, ठिई जिणंदागमे भणिया ॥४८॥**

सिद्धानां सिद्धपरमात्मनां देहः शरीरं नास्ति । अत एवायुःकर्मापि नास्ति । यतो नायुस्तत एव प्राणा योनयश्चापि न सन्ति । एतदभावान्मरणकायस्थित्याद्यभावोऽपि दर्शितः । एवं च सर्वकर्मोपाधिमुक्तानां लोकाग्रे स्वरूपस्थितानां तेषां सिद्धानां सादिरनन्ता स्थितिर्जिनेन्द्रागमे जिनेन्द्रप्रणीतसिद्धान्ते भणिता प्रोक्ता । इतस्तत्र गमनसद्भावात् सादित्वं । ततश्च्यावनाभावादनंतत्वं च समवसेयम् ॥४८॥ इत्युक्तं सिद्धस्वरूपम् ॥ अथ पुनः संसारिस्वरूपमाह –

**काले अणाइनिहणे जोणीगहणंमि भीसणे इत्थ ।**
**भमिया भमिहिंति चिरं, जीवा जिणवयणमलहंता ॥४९॥**



आदिः प्रारम्भः निधनं, नाशः आदिश्च निधनं चादिनिधने ते न विद्येते यस्य स अनादिनिधनस्तस्मिन् अनाद्यनन्ते काले जिनवचनं हितोपदेशरूपं अलभमाना अप्राप्नुवन्तः जीवाः योनिभिश्चतुरशीतिलक्षसंख्याभिर्गहने अतिसंकुले अत एव भीषणे भयंकरेऽत्रास्मिन् संसारे भ्रान्ता अतीतकाले पर्यटनं कृतवन्तः पुनश्चिरं बहुकालं भ्रमिष्यन्त्यागामिकालेऽपि पर्यटिष्यन्तीत्यर्थः। वर्तमानकालस्यैकसामयिकत्वेनाल्पत्वान्नात्र विवक्षा कृतेति ॥४९॥ अथ ग्रन्थकारः स्वनाम सूचयन् धर्मोपदेशमाह –



**ता संपइ संपत्ते मणुअत्ते दुल्लहे वि सम्मत्ते ।**
**सिरिसंतिसूरिसिट्ठे करेह भो उज्जमं धम्मे ॥५०॥**



तत्तस्माद् भो भव्याः सम्प्रति इदानीं दशभिर्द्रष्टान्तैर्दुर्लभे मनुजत्वे सम्प्राप्ते च पुनस्तत्रापि दुर्लभतरे सम्यक्त्वे

जिनोक्ततत्वरुचिरूपे सम्प्राप्ते सति **श्री शान्तिसूरिशिष्टे** धर्मे उद्यमं कुरुत । यूयमिति शेषः । श्रीः ज्ञानादिलक्ष्मीः शान्तिः रागाद्युपशमः ताभ्यां सूरयः पूज्याः तीर्थकरा गणधरा वा तैः शिष्टे उपदिष्टे इत्यर्थः । अनेन स्वनामापि सूचितम् । तथाहि– श्रीशान्तिसूरिरुपदिशति शिष्टे शिष्टपुरुषाचीर्णे धर्मे उद्यमं कुरुतेत्यन्वयः । यद्वा **श्रीशान्तिसूरिणा** शिष्टे भगवद्वचनानुसारेणोपदिष्टे धर्मे इति वाच्यम् ॥५०॥ अथ प्रस्तुतसूत्रं निगमयन्नाह –

**एसो जीववियारो संखेवरूईण जाणणा हेउ ।**
**संखित्तो उद्धरिओ रुद्दाओ सुयसमुद्दाओ ॥५१॥**

साक्षादुक्तो जीवानां विचारः संक्षेपरुचीनां स्वल्पमतीनां मनुष्याणां ज्ञापनाहेतु ज्ञापननिमित्तं, रुन्द्रात् अनवगाह्यविस्तारात् श्रुतसमुद्रात् संक्षिप्त उद्धृत संक्षेपेणोद्धृत निबद्ध इत्यर्थः । एतेन न स्वमनीषया कल्पित इति सूचितम् ॥५१॥

**इति जीववियारलघुवृत्तिः ॥**

बृहद्वृत्त्यादिकं त्वस्य यद्यप्यस्ति पुरातनम् ।
तथापि सुखबोधार्थं वृत्तिकेयं विनिर्मिता ॥१॥

प्रमादाद्वा मतेर्मान्द्यात् प्रोक्तमुत्सूत्रमत्र यत् ।
तन्मिथ्यादुष्कृतं मेऽस्तु शोधनीयं च धीधनैः ॥२॥

संवद्व्योमशिलीमुखाष्टवसुधा (१८५०) संख्ये नभस्ये सिते ।
पक्षे पावनसप्तमीसुदिवसे बीकादिनेराभिधे ॥
द्रंगे श्रीमति पूर्णतामभजत् व्याख्या सुबोधिन्यसौ ।
सम्यक् श्रीजिनचन्द्रसूरीमुनिपे गच्छेशतां बिभ्रति ॥१॥
श्रीमन्तो जिनभक्तिसूरिगुरवश्चान्द्रे कुले जज्ञिरे ।
तच्छिष्या जिनलाभसूरिमुनिपाः श्रीज्ञानतः सागराः ॥

तच्छिष्यामृतधर्मवाचकवरास्तेषां विनेयः क्षमा-
कल्याणः स्वपरोपकारविधयेऽकार्षीदिमां वृत्तिकाम् ॥२॥

**श्रीजीवविचारप्रकरणं सवृत्तिकं समाप्तम् ॥**

श्री शंखेश्वरपार्श्वनाथाय नमः ॥

उपाध्यायश्री समयसुंदरकृतवृत्त्या संवलितं

# श्रीनवतत्त्वप्रकरणम्

शांतिनाथं जिनं नत्वा गणिः समयसुंदरः ।
श्रीनवतत्त्वसूत्रस्य शब्दार्थं कुरुते स्फुटम् ॥

**जीवाऽजीवा पुण्णं पावासवसंवरो अ निज्जरणा ।**
**बंधो मुक्खो अ तहा नवतत्ता हुंति नायव्वा ॥१॥**



नव तत्त्वानि भवन्ति, तानि धर्मार्थिभिर्ज्ञातव्यानि । तत्त्वमिति कोऽर्थः ? पदार्थस्वरूपम्, तानि नवतत्त्वानि कानि ? नामत आह –

जीवतत्त्वं १ अजीवतत्त्वं २ पुण्यतत्त्वं ३ पापतत्त्वं ४ आश्रवतत्त्वं ५ संवरतत्त्वं ६ च पुनः निर्जरातत्त्वं ७ बन्धतत्त्वं ८ मोक्षतत्त्वं ९ चकारात् **केषांचिन्मते** सप्ततत्त्वानि सन्ति । तथा पुनरत्र जीवादिनवपदार्थानां व्युत्पत्तिकरणे शिष्यस्य व्यामोहो भवतीति हेतोर्व्युत्पत्तिर्न कृता शब्दार्थमात्रस्य साधारणत्वात् ॥१॥ अथ जीवादिनवतत्त्वानां भेदान् गाथया आह–

**चउदस चउदस बायालीसा बासीय हुंति बायाला ।**
**सत्तावन्नं बारस चउ नव भेया कमेणेसिं ॥२॥**

एसिं इति–एतेषां जीवादिनवतत्त्वानां क्रमेण–अनुक्रमेण भेदा भवन्ति ।

जीवतत्त्वस्य चतुर्दश भेदा भवन्त्यग्रे वक्ष्यमाणाः १ अजीवतत्त्वस्य चतुर्दश भेदाः २ पुण्यतत्त्वस्य द्विचत्वारिंशद्भेदा भवन्ति ३ पापतत्त्वस्य द्व्यशीतिभेदाः ४ आश्रवतत्त्वस्य द्विचत्वारिंशद्भेदाः ५ संवरतत्त्वस्य सप्तपञ्चाशद्भेदाः ६ निर्जरातत्त्वस्य द्वादश भेदाः ७ बन्धतत्त्वस्य चत्वारो भेदाः ८ मोक्षतत्त्वस्य नव भेदाः एते सर्वेऽपि नवतत्त्वानां भेदा मीलिताः सन्तः द्वे शते षट्सप्ततिश्च ॥२॥ अथ जीवतत्त्वस्याभिप्रायान्तरेण प्रक्षेपगाथयैकादिक्रमेण षड्विधजीवभेदानाह –

**एगविहदुविहतिविहा चउव्विहा पंचछव्विहा जीवा ।**
**चेयणतसइयरेहिं वेयगइकरणकाएहिं ॥३॥**

प्रथमद्वितीयपदाभ्यां कृत्वा तृतीयचतुर्थपदयोरर्थयोजना कर्तव्या । सा चैवं-चेअणत्ति-चेतनालक्षणो जीवः इति जीवस्य लक्षणं क्रियते तदैक एव जीवस्य भेदः । यतः सूक्ष्मनिगोदजीवेष्वपि श्रीप्रज्ञापनादिसूत्रेष्वक्षरस्यानंततमो भागः प्रतिपादितोऽस्ति १।

द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियजीवाः त्रसाः । इयरित्ति इतरे अपरे पृथिव्यप्तेजोवायुवनस्पतिजीवा एकेन्द्रिया इति विवक्षया जीवा द्विविधाः २ ।

केचित्पुरुषवेदाः केचित्स्त्रीवेदाः, केचिन्नपुंसकवेदाः तत्र देवाः पुरुषवेदाः स्त्रीवेदाश्च । मनुष्याः पञ्चेन्द्रियतिर्यञ्चश्च केचित् पुरुषवेदाः केचित् स्त्रीवेदाः केचिन्नपुंसकवेदाश्च । तेभ्यः शेषाः पृथिव्यप्तेजोवायुवनस्पतिद्वींद्रियत्रीन्द्रियचतुरिंद्रियनारका नपुंसका एवं विवक्षया त्रिविधा जीवाः ३ ।

गतिमाश्रित्य चतुर्विधा जीवाः-केचिन्मनुष्यगतिगताः १ केचिद्देवगतिगताः २ केचिन्नरकगतिगताः ३ केचित्तिर्यग्गतिगताः

४ इति विवक्षया चतुर्विधा जीवाः ४ ।

करणत्ति-करणानीन्द्रियाणि तान्याश्रित्य पंचविधा जीवाः पृथिव्यप्तेजोवायुवनस्पतिजीवा एकेन्द्रियाः १ शंखकपर्दकादयो द्वीन्द्रियाः २ गोमीमत्कुणादयस्त्रीन्द्रियाः ३ वृश्चिकादयश्चतुरिन्द्रियाः ४ नारकादयः पञ्चेन्द्रियाः ५ इति विवक्षया पञ्चविधा जीवाः ५ ।

काएहिं इति-कायमाश्रित्य षड्विधा जीवाः, केचित् पृथिवीकायगताः १ केचिदप्कायगताः २ केचित्तेजःकायगताः ३ केचिद्वायुकायगताः ५ केचित् त्रसकायगताः ६ इति विवक्षया षड्विधा जीवाः ॥३॥ अथ मूलत उक्तान् चतुर्दशजीवभेदानाह–

**एगिंदियसुहुमियरा सन्नियरपणिंदिआ य सबितिचऊ ।**
**अपज्जत्ता पज्जत्ता कमेण चउदस जियट्ठाणा ॥४॥**





एतानि क्रमेण-अनुक्रमेण चतुर्दश जियठाणा इति-जीवस्थानानि जीवभेदा भवन्ति, तान् १४ भेदानाह –

एकेन्द्रियाः सूक्ष्माः, सूक्ष्मा ये चतुर्दशलोकव्यापिनः पञ्चापि पृथिव्यादयो वर्तन्ते १ । इयरे इति-इतरे अपरे बादराः

पृथिव्यादयो व्यवहारराशिगताः छद्मस्थैर्दृश्यमानाः इति भेदद्वयं २ पुनः संज्ञिनो येषां मनो वर्तते ३ इयरत्ति-इतरे अपरे येषां पञ्चेन्द्रियाणां मनो नास्ति ते के ? ये **श्रीप्रज्ञापनासूत्रे** उच्चारादिस्थानेषूत्पद्यमानाः संमूर्च्छिमाः पञ्चेन्द्रियाः मनुष्याः इतरे संमूर्च्छिमतिर्यञ्चश्च प्रोक्ताः सन्ति ते ४ एवं भेदचतुष्टयं जातमेते सबितिचऊ इति-द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियसहिता कार्याः, जाताः सप्तैते अपर्याप्ताश्च पर्याप्तित्रयं विना पर्याप्तिरहिताः ५-६-७ । पर्याप्ताश्च स्वस्वपर्याप्तिसहिताः द्विगुणिताश्चतुर्दशजीवभेदा भवन्ति ॥४॥ अथ प्रकारान्तरेण जीवलक्षणं प्रक्षेपगाथयाह –

**नाणं च दंसणं चेव चरित्तं च तवो तहा ।**
**विरिअं उवओगो य एअं जीवस्स लक्खणं ॥५॥**

एवं जीवस्य लक्षणं भवति । एवं किं ? तत्राह-ज्ञानं १ दर्शनं २ च पुनः चारित्रं ३ च पुनः तपः ४ तथा वीर्यं ५ च पुनरुपयोगः ६ एतानि षडपि समुदितानि न तु पृथक् पृथक् यत्र भवन्ति स जीवः । एतत्षट्करहितोऽजीव इत्यर्थः।

अत्राह शिष्यः-ननु पञ्चेन्द्रियमनुष्यादौ केवलिपर्यन्तैतानि षडपि दृश्यन्ते परं ये सूक्ष्मैकेन्द्रिया वर्तन्ते तेषु कथं तेषां सम्भवः ? उच्यते-सूक्ष्मेष्वेकेन्द्रियेषु ज्ञानमक्षरस्यानन्ततमभागरूपं **श्रीप्रज्ञापनादौ** प्रोक्तं वर्तत एवान्यथा तद्विना जीवस्याजीवत्वं

स्यात् १ ।

पुनर्दर्शनस्य नवभेदाः सन्ति तन्मध्येऽचक्षुर्दर्शनरूपं निद्रारूपं च दर्शनमपि वर्तत एव २ ।

पुनश्च चारित्रमपि कर्मग्रन्थाभिप्रायेणाविरतिरूपं वर्तते ३ ।

तपोऽपि कायक्लेशादिरूपं वर्तते ४ ।

वीर्यमपि कायवीर्यं वर्तते स्वकायस्य विद्यमानत्वात् ५ ।

उपयोगा द्वादश वर्तन्ते, पञ्चज्ञानानि त्रीण्यज्ञानानि चत्वारि चक्षुर्दर्शनादीनि दर्शनानि । तन्मध्ये तेष्वज्ञानमचक्षुर्दर्शनं चैतद् द्वयं तु वर्तत एव तत्रैकेन्द्रियादिषु पञ्चेन्द्रियान्तेषु सर्वेष्वपि जीवेष्वेतत्षड्करूपं लक्षणं लभ्यत एव ।

अत्र केचित् प्रतिपादयन्ति-एतत्षड्कं न सर्वजीवेषु किन्तु पृथक् पृथक्जीवभेदेषु लक्षणं ज्ञानादिकं लभ्यते न ते सिद्धान्तमर्मज्ञा न ते गीतार्थगुरुचरणसेविनश्च ॥५॥ अथ कस्मिन् जीवे कतिपर्याप्तयः लभ्यन्ते तदाह –

**आहारसरीरिंदियपज्जत्तीआणपाणभासमणे ।**

**चउपंचपंचछप्पिय इगविगलासन्निसन्नीणं ॥६॥**

आहारपर्याप्तिः १ शरीरपर्याप्तिः २ इन्द्रियपर्याप्तिः ३ आणपाणत्ति–श्वासोच्छ्वासपर्याप्तिः ४ भाषापर्याप्तिः ५ मनःपर्याप्तिश्च ६।

ननु पर्याप्तिः किमुच्यते ? पर्याप्तिर्जीवस्य कोऽपि शक्तिविशेषः, येनोत्पत्तिस्थानेऽन्तर्मुहूर्तमध्ये जीवः पुद्गलानाहारादितया परिणमयति ।

अथ तृतीयपदस्य चतुर्थपदेन समं योजना कर्तव्या । कथमित्याह–एकेन्द्रियेषु आहारपर्याप्तिः १, शरीरपर्याप्तिः २, इन्द्रियपर्याप्तिः ३, श्वासोच्छ्वासपर्याप्तिश्च ४, ताश्चतस्रः पर्याप्तयो लभ्यन्ते । विकलेषु द्वित्रिचतुरिन्द्रियेष्वसंज्ञिषु संज्ञिषु चानुक्रमेण पञ्च पञ्च षट् च ज्ञेयाः । अर्थात्ता एव पूर्वोक्ताश्चतस्रः भाषासहिताः पञ्चपर्याप्तयोः विकलेन्द्रियेषु लभ्यन्ते एवं ता एव पर्याप्तयोऽसंज्ञिषु संमूर्च्छिममनुष्यादिषु लभ्यन्ते, कथं ? तेषां मनोरहितत्वात् । ता एव पञ्चपर्याप्तयो मनः– पर्याप्तिसहिताः षडपि संज्ञिषु मनुष्यदेवतानारकतिर्यक्षु लभ्यन्ते, तेषां मनःसंज्ञासहितत्वात् ।

ननु **श्री भगवत्यादि**सिद्धान्तेषु देवानां पञ्च एव पर्याप्तयः कथं प्रतिपादिताः ? उच्यते-तत्र भाषामनःपर्याप्त्योरुत्पत्तेः समये जायमानत्वादेकत्वेन विवक्षाकरणान्न दोषः ॥६॥ अथ कतिप्राणाः ? ते प्राणाः केषु जीवेषु कति लभ्यन्ते तदाह –

**पणिंदिअत्तिबलुसा साउ-दस पाणचउ छ सगं अट्ठ ।**
**इग-दु-ति-चतुरिंदिणं, असन्नि-सन्नीण नव दस य ॥७॥**

जीवानां प्राणा दशधा-दशप्रकारा भवन्ति । ते के इत्याह-पञ्च, स्पर्शन-१ रसन-२ घ्राण-३ चक्षुः-४ श्रोत्र-५ रुपाणीन्द्रियाणि, श्वासोच्छ्वासः-६ आयुः-७ मनोबलं-८ वचनबलं-९ कायबलं-१० चैते दश प्राणाः । तत्रैकेन्द्रियेषु स्पर्शनेन्द्रियः-१ श्वासोच्छ्वासः-२ आयुः-३ कायबलं-४ चैते चत्वारः प्राणा लभ्यन्ते ।

विकलेन्द्रियेषु द्वित्रिचतुरिन्द्रियेष्वनुक्रमेण षट्सप्ताष्टौ च लभ्यन्ते । अयमर्थः – त एव पूर्वोक्ताश्चत्वारः प्राणा रसनेन्द्रियवचनबलसहिताः षट् द्वीन्द्रियेषु भवन्ति । एते एव षट् घ्राणेन्द्रियसहिताः सप्त त्रीन्द्रियेषु भवन्ति । एते एव सप्त चक्षुरिन्द्रियसहिता अष्टौ चतुरिन्द्रियेषु भवन्ति ॥७॥

तथाऽसंज्ञिपञ्चेन्द्रियेषु संमूर्च्छिममनुष्यादिषु पूर्वोक्ता एवाष्टौ श्रोत्रेन्द्रियसहिता नव भवन्ति । तथा संज्ञिषु मनुष्यादिषु मनःसहिता दश प्राणा भवन्ति ते बोद्धव्याः-ज्ञातव्याः ।

अथ मरणं किमुच्यते इत्याह –

तैस्तैः स्वकैः प्राणैः समं विप्रयोगः छुटनं मरणमिति जीवानां भण्यते परं शाश्वतो जीवो न म्रियते तस्यामरत्वात्, नित्यत्वात्, अजीवत् जीवति जीविष्यतीति जीव इति व्युत्पत्तिसद्भावाच्च । इत्यष्टगाथाभिः कृत्वा जीवतत्त्वं निरुपितम् १ ॥७॥ अथाजीवतत्त्वस्य चतुर्दशभेदानाह –

**धम्माऽधम्मागासा तियतिय भेया तहेव अद्धा य ।**
**खंधा देसपएसा परमाणु अजीव चउदसहा ॥८॥**

धर्मास्तिकायः, अधर्मास्तिकायः आकाशास्तिकायः एते त्रयोऽपि तियतियभेया-त्रिकत्रिकभेदाः । कथमित्याह- धर्मास्तिकायस्कन्धः १ धर्मास्तिकायदेशः २ धर्मास्तिकायप्रदेशः ३ एवमधर्मास्तिकायस्कन्धः ४ अधर्मास्तिकायदेशः ५

अधर्मास्तिकायप्रदेशः ६ जाताः षडेवमाकाशास्तिकायस्कन्धः ७ आकाशास्तिकायदेशः ८ आकाशास्तिकायप्रदेशः ९ जाता नव तथैवाद्धा-कालः १० जाता दश पुनः पुद्गलास्तिकाय स्कन्धः ११ पुद्गलास्तिकायदेशः १२ पुद्गलास्तिकायप्रदेशः १३ परमाणुश्च १४ एतेऽजीवतत्त्वस्य चतुर्दश भेदा ज्ञातव्याः ।



पूर्वोक्ता धर्मास्तिकायस्कन्धादयः कालपर्यन्ता भेदा अरूपिणः पुद्गलास्तिकायस्य चत्वारो भेदा रूपिणस्तत्रापि परमाणुः सूक्ष्मत्वात् केवलिप्रत्यक्षो न छद्मस्थगम्यः ।

पुनः शिष्यहितार्थं व्यामोहत्रोटनार्थं च किञ्चिदुच्यते-धर्मास्तिकायो लोकव्यापी तत्रापि यत्र स्कन्धस्तत्र देशविवक्षा न क्रियते, **श्रीभगवतीसूत्रवृत्त्यादौ** तथैव प्रतिपादितत्वादेवमधर्मास्तिकायोऽपि लोकव्याप्याकाशास्तिकायस्तु लोकालोकव्यापी, कालस्तु पञ्चचत्वारिंशल्लक्षयोजनप्रमितमनुष्यक्षेत्रे एव विवक्षितोऽस्ति, पुद्गलभेदाश्चत्वारोऽपि लोकव्यापिनः ।



केनापि पृष्टं देवलोके कत्यजीवभेदाः ? तथा (दा) प्रोच्यते-दश । कथं ? धर्मास्तिकायस्याधर्मास्तिकायस्याकाशस्य च स्कन्धो न तथा कालोऽपि तत्र नैवं दशैव भेदा लभ्यन्तैवं मेरुचूलिकायामप्येवं नरकादावपि मनुष्यक्षेत्राद्बहिः सर्वत्र कालस्याभावात् दश भेदा एव। मनुष्यक्षेत्रे सर्वत्र सर्वस्थानपृच्छायामेकादश भेदा लभ्यन्ते, कालस्य विद्यमानत्वात् ।

लोकमध्ये धर्मास्तिकायदेशः अधर्मास्तिकायदेशः आकाशास्तिकायस्कन्धः एते त्रयो, न शेषा एकादश भेदा लभ्यन्ते । अलोकमध्ये त्वाकाशास्तिकायस्य स्कन्धो न, किन्तु देशप्रदेशाविति भेदद्वयमेव ।



ननु यद्यलोकमध्ये आकाशं वर्तते, तस्य लक्षणं 'अवगाहो आगासं' इति ततः कोऽपि देवादिः पुद्गलमलोकमध्ये क्षिपेत्तदा याति? उच्यते-न हि, कथं ? तत्र 'चलणसहावो धम्मो' इति धर्मास्तिकायस्याभावेन पुद्गलस्यागमनेनाप्रवेशात् ॥८॥ अथ प्रकारान्तरेणाजीवस्य पञ्चैव भेदान् धर्मास्तिकायादीनां च लक्षणानि गाथाद्वयेनाह –

**धम्माधम्मापुग्गल नह कालो पंच हुंति अजीवा ।**
**चलणसहावो धम्मो थिरसंठाणो अहम्मो य ॥९॥**



**अवगाहो आगासं पुग्गलजीवाण पुग्गला चउहा ।**
**खंधा देसपएसा परमाणु चेव नायव्वा ॥१०॥**



अजीवा पञ्च भवन्ति, के ते इत्याह-धर्मास्तिकायः १ अधर्मास्तिकायः २ पुद्गलास्तिकायः ३ 'नह' इति-नभ आकाशं

तेनाकाशास्तिकायः ४ कालः ५ । अथ लक्षणान्याह –

धर्मो धर्मास्तिकायश्चलनस्वभावः यस्य बलेन जीवाजीवौ चलतः १ । अधर्मः अधर्मास्तिकायः स्थिरसंस्थानः, कोऽर्थः? यस्य बलेन जीवाजीवौ स्थिरसंस्थानेन निश्चलतया तिष्ठतः २ ॥९॥

आगासं-अवकाशः, कोऽर्थः ? स्तंभादौ यस्य बलेन कीलकः क्षिप्तः सन् प्रविशति तदाकाशं पुद्गलानां जीवानां चावकाशदायकम् ३ । ते पुद्गलाश्चतुर्धा चतुःप्रकारा-स्कन्धाः १ देशाः २ प्रदेशः ३ परमाणुश्च ४ ।

ननु प्रदेशपरमाण्वोः परस्परं को भेदः ? उच्यते-प्रदेशोऽपि निर्विभागः परमाणुरपि निर्विभागः, परं स्कन्धलग्नः प्रदेशः स्कन्धात् पृथग्भूतः परमाणुरिति वृद्धाः ॥४॥ ॥१०॥ अथ कालस्य भेदानाह –

**समयावली मुहुत्ता दीहा पक्खा य मासवरिसा य ।**
**भणिओ पलिया सागर उसप्पिणीसप्पिणीकालो ॥११॥**



समयः-परमसूक्ष्मो, यस्य विभागो न भवति, आवलिका-असंख्यातसमयरूपा, मुहूर्तं-घटीद्वयप्रमाणं, दिवसाः

त्रिंशन्मुहूर्तप्रमाणा अहोरात्रिरूपाः, पक्षाः-पञ्चदशदिनमानाः, प्रायिकं चेदं यतः शिवटिप्पनकानुसारेण कदाचित्तिथिहान्या चतुर्दशदिनप्रमाणः कदाचित्तिथिवृद्धया षोडश दिवसप्रमाणः पक्षो जायमानो दृश्यते। **जैनमतटिप्पने** तु श्रावण १ आश्विन २ मृगशीर्ष ३ माघ ४ चैत्र ५ ज्येष्ठ ६ मासेषु कृष्णपक्षे एकैकतिथिहानिर्नासीत्..... **तज्जैनटिप्पनं** तु व्यवच्छिन्नं, मासाः पक्षद्वयरूपाः, वर्षाणि-द्वादशमासरूपाणीदमपि प्रायिकं वचो यतोऽधिकमासे जाते तृतीयवर्षे त्रयोदशमासरूपं भवति, मासानां मध्येऽन्यतममासवर्धनेन यः कोऽपि वर्धते, **जैनटिप्पनके** तु पोषो वाऽऽषाढो वा वर्धमानोऽभूत्, पुनर्भणितः पल्योपमरूपः कालः स कूपदृष्टान्तेन ज्ञातव्यः, पुनर्दशकोटाकोटीपल्योपमप्रमाणं सागरोपमं, दशकोटाकोटीसागरोपमप्रमाणैवोत्सर्पिणी तावत्प्रमाणैव अवसर्पिणी, एषः कालः सूर्यगतिक्रियापरिगम्यः ॥११॥ अथैकस्मिन्मुहूर्ते कत्यावलिका भवन्ति तदाह –

**एगाकोडी सत्तसट्ठि लक्खा सत्तहुत्तरी सहस्सा य ।**
**दो य सया सोलहिया आवलिया इग मुहुत्तम्मि ॥१२॥**

एका कोटि सप्तषष्टिर्लक्षाः सप्तसप्ततिः सहस्रा द्वे शते षोडशाधिके आवलिकानामेकस्मिन्मुहूर्ते ॥१२॥ अथ कतिभिः

श्वासोच्छ्वासैर्मुहूर्तो भवति तदाह –

**तिन्नि सहस्सा सत्त य सयाणि तेहुत्तरिं च उसासा ।**
**एस मुहुत्तो भणिओ सव्वेहिं अणंतनाणिहिं ॥१३॥**

सर्वैरनन्तज्ञानिभिरेष मुहूर्तः कालो भणितः, एषः क इत्याह–त्रीणि सहस्राणि सप्तशतानि त्रिसप्ततिरुच्छ्वासाः, एतावता एतैः श्वासोच्छ्वासैर्मुहूर्तो भवति ५ । इत्यजीवतत्त्वं प्ररुपितम् २ ॥१३॥ अथ पुण्यतत्त्वस्य द्विचत्वारिंशद्भेदानाह–

**सा उच्चगोअमणुदुग सुरदुग, पंचिंदि जाइ पणदेहा ।**
**आइतितणूणुवंगा आइमसंघयणसंठाणा ॥१४॥**

**वन्नचउक्काऽगुरुलहु परघा ऊसास आयवुज्जोअं ।**
**सुभखगइनिमिणतसदस सुरनरतिरिआउ तित्थयरं ॥१५॥**

**तसबायरपज्जत्तं पत्तेअथिरं सुभं च सुभगं च ।**
**सुसरआइज्जजसं तसाइदसगं इमं होइ ॥१६॥**

सातं-सातावेदनीयं कर्म येन जीवः सातसौख्यानि लभते १ उच्चैर्गोत्रं यस्मिन्नुत्पन्नो जीवः सर्वलोकमान्यो भवति २ मनुष्यद्विकं-मनुष्यगतिः, मनुष्यानुपूर्वी च, यया कर्मप्रकृत्या जीवो मनुष्यगतिं लभते सा मनुष्यगतिः ३ यया कर्मप्रकृत्या मनुष्यगतिबद्धायुर्जीवः प्रान्तेऽन्यत्र गच्छन् मनुष्यगतावानीयते सा मनुष्यानुपूर्वी ४ तथा सुरद्विकं सुरगतिः ५ सुरानुपूर्वी ५ चार्थस्तु पूर्ववत् । पञ्चेन्द्रियजातिर्यया जीवस्य पञ्चेन्द्रियत्वं स्यात् ७ पणदेहत्ति-पञ्च देहाः पञ्च शरीराणि औदारिकं १ वैक्रियं २ आहारकं ३ तैजसं ४ कार्मणं च ५ तत्रोदारैः प्रधानैः पुद्गलैर्निष्पन्नं यच्छरीरं तिर्यग्मनुष्याणां तदौदारिकमुदारत्वं च तीर्थकरगणधरापेक्षं ज्ञेयं ८ विविधयाऽणुत्वगुरुत्वादिक्रियया निष्पन्नं देवनारकाणां शरीरं वैक्रियं लब्धिमतां वा शरीरं ९ यच्चतुर्दशपूर्वधरैः संदेहोच्छेदनाय तीर्थंकराणामृद्धिदर्शनाय वा महाविदेहक्षेत्रे गमनायैकहस्तप्रमाणमत्यन्तरूपसंपन्नं शरीरं क्रियते तदाहारकं १० येन शरीरेण जीवैराहारो गृहीतः सन् खलरसादिधातुरूपतया परिणतिं नीयते यद्वा यद्वशात् तपोलब्ध्या तेजोलेश्याविनिर्गमश्च क्रियते तत्तैजसं ११ कार्मणशरीरमष्टविधकर्मविकाररूपं, शरीराणां चेदं कारणभूतं १२ तैजसकार्मणशरीरे

सर्वसंसारिजीवानामनादिकालसंबद्धे भवतः, मोक्षगमनं विना तयोः कदाऽपि वियोगो न स्यादादित्रितनूनामौदारिक १३ वैक्रिय १४ आहारक १५ शरीराणामुपांगान्यादिमं संहननं वज्रऋषभनाराचरूपं १६ आदिमं संस्थानं समचतुरस्त्ररूपम् १७ ॥१४॥

वर्णचतुष्कं प्रस्तावात् शुभं ज्ञेयं ततः शुभं रूपं १ शुभो रसः २ शुभो गन्धः ३ शुभः स्पर्शः ४ एवं २१ येन कर्मणा जीवानां शरीरं न गुरु न लघु स्यात् तदगुरुलघु २२ (यदुदयात् परेषां दुष्प्रघर्षः महौजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा महाभूपसभामपि गतः सभ्यानामपि क्षोभमुत्पादयति प्रतिपक्षप्रतिभाप्रतिघातं च करोति तत् पराघातनाम २३ यदुदयादुच्छ्वसनलब्धिरात्मनो भवति तदुच्छ्वासनाम २४) येन कर्मणा जीवशरीरं स्वयमनुष्णमप्युष्णप्रकाशसंयुक्तं स्यात् यथा सूर्यमण्डले पृथिवीकायजीवानां, इदं सूर्यमण्डले एव नान्यत्र तदातपनामकर्म २५ येन कर्मणाऽनुष्णप्रकाशसंयुक्तं स्याद्यथा चन्द्रमण्डले तदुद्योतनामकर्म २६ शुभखगतिः शुभा प्रशस्ता खे-आकाशे गतिः शुभखगतिर्हंसवृषभगजादीनामिव २७ येन कर्मणा जीवशरीरे अंगप्रत्यंगानां नियतव्यवस्थापनं क्रियते यथा सूत्राधारेण पुत्तलिकादौ तन्निर्माणनामकर्म २८ त्रसदशकमग्रे वक्ष्यते ३८ सुराणां ३९ नराणां ४० तीरश्चां चायुः ४१ चतुस्त्रिंशदतिशययुक्तं केवल्यवस्थायामुदयभूतं त्रिभुवनपूज्यं

तीर्थंकरनाम ४२ ॥१५॥

त्रसनामकर्म–द्वीन्द्रियादीनां १ बादरनामकर्म येन जीवाः स्थूलाश्च ग्राह्या भवन्ति २ येन जीवाः स्वस्वपर्याप्तियुक्ता भवन्ति तत्पर्याप्तिनामकर्म ३ प्रत्येकनामकर्म–येनैकस्मिन्शरीरैकजीवः ४ येन जीवानां दन्तास्थिप्रमुखं स्थिरं स्यात्तत् स्थिरनामकर्म ५ येन नाभेरूर्ध्वं शरीरं शुभं स्यात्तत् शुभनामकर्म ६ येन जीवः सौभाग्यवान् स्यात् तत् सुभगनामकर्म ७ येन माधुर्यादिगुणसहितः स्वरो भवति तत् सुस्वरनामकर्म ८ येन सर्वजनमान्यवचनो जीवः स्यात्तदादेयनामकर्म ९ येन जीवो कीर्तियुक्तो भवति तद्यशःकर्म १० इदं त्रसादिदशकमिति पुण्यतत्त्वस्य द्विचत्वारिंशद्भेदाः ॥१६॥ अथ पापतत्त्वस्य द्व्यशीतिभेदान् गाथात्रयेणाह –

**नाणंतरायदसगं नव बीए नीयसायमिच्छत्तं ।**
**थावरदसनरयतिगं कसाय पणवीसतिरियदुगं ॥१७॥**

**इगबितिचउजाईओ कुखगइ उवघाय हुंति पावस्स ।**
**अपसत्थं वण्णचउ अपढमसंघयणसंठाणा ॥१८॥**

**थावरसुहुमअपज्जं साहारणमथिरमसुभदुभगाणि ।**
**दुसरअणाइज्ज जसं थावरदसगं विवज्जत्थं ॥१९॥**

एते द्व्यशीतिभेदाः पापतत्त्वस्य हुंतीति-भवन्ति । के ते इत्याह-ज्ञानान्तरायदशकं-ज्ञानावरणपञ्चकमन्तरायपञ्चकं च ।

तत्र ज्ञानान्तरायपञ्चकं किमुच्यते ?

तत्राह-मतिज्ञानावरणं १ श्रुतज्ञानावरणं २ अवधिज्ञानावरणं ३ मनःपर्यायज्ञानावरणं ४ केवलज्ञानावरणं ५ तत्र पञ्चभिरिन्द्रियैः षष्ठेन मनसा जीवस्य यत् ज्ञानं स्यात् तन्मतिज्ञानं तस्यावरणं मतिज्ञानावरणं १ श्रुतज्ञानावरणं तत्र श्रुतं द्विविधं-द्रव्यश्रुतं भावश्रुतं च द्रव्यश्रुतं द्वादशांगीरुपं १ भावश्रुतं द्वादशांगीतः समुत्पन्नं उपयोगरूपं तस्यावरणं श्रुतज्ञानावरणं २ अवधिज्ञानं द्विप्रकारं-भवहेतुकं गुणहेतुकं च । भवहेतुकं देवनारकाणां, गुणहेतुकं तु श्राद्धसाधूनां स्यात् तस्यावरणमवधिज्ञानावरणं ३ मनःपर्यायज्ञानं सार्द्धद्वयद्वीपसमुद्रस्थितसंज्ञिपञ्चेन्द्रियमनोविषयं तदपि द्विभेदं ऋजुमति-विपुलमतिभेदादिदं च साधूनामेव भवति तस्यावरणं मनःपर्यायज्ञानावरणं ४ तथा घनघातिकर्मचतुष्टयक्षयेन समुत्पन्नं सकललोकालोकप्रकाशकं केवलज्ञानं तस्यावरणं केवलज्ञानावरणं ५ ।

अन्तरायपञ्चकं चेदं-दानान्तरायः १ लाभान्तरायः २ भोगान्तरायः ३ उपभोगान्तरायः ४ वीर्यान्तरायः ५ येन कर्मणा चित्ते वित्ते पात्रे च प्राप्ते सति दानफले जानन्नपि न ददाति तद्दानान्तरायकर्म ६ येन कर्मणोद्यमे क्रियमाणेऽपि सामग्रीसमायोगेऽपि लाभो न स्यात् तल्लाभान्तरायकर्म ७ येन कर्मणा भोगवस्तुप्राप्तावपि भोक्तुं न शक्यते तद्भोगान्तरायकर्म ८ येन कर्मणोपभोग्यवस्तुषु विद्यमानेष्वपि भोक्तुं न शक्यते तदुपभोगान्तरायकर्म ९ ।

ननु भोगोपभोगयोः को विशेषः ? उच्यते-सकृद्भोगो-यद्वस्तु पुष्पमालाचन्दनविलेपनादिकमेकवारमेव भोक्तुं शक्यते, उपभोगो-वारंवारं तदेव वस्त्वाभरणगृहस्त्रीप्रमुखं भोक्तुं शक्यते । येन कर्मणा नीरोगोऽपि प्रधानावयवस्थोऽपि हीनबलः स्यात्तद्वीर्यान्तरायकर्म १० पञ्चकद्वयमीलने जाता दश ।

अथ द्वितीये कर्मणि दर्शनावरणे नव भेदास्ते चेमे-चत्वारि दर्शनावरणानि निद्रापञ्चकं च, तत्र येन कर्मणा चक्षुर्दर्शनमाव्रियते तच्चक्षुर्दर्शनावरणं ११ येन कर्मणा चक्षुर्दर्शनं विनाऽन्यानि चत्वारीन्द्रियदर्शनान्याव्रियन्ते तदचक्षुर्दर्शनावरणं १२ येन कर्मणाऽवधिदर्शनमाव्रियते तदवधिदर्शनावरणं १३ येन कर्मणा केवलदर्शनमाव्रियते तत् केवलदर्शनावरणं १४ ।

ननु दर्शनज्ञानयोर्को विशेषः ?

घटपटादिपदार्थसामान्याकारपरिज्ञानं दर्शनं, घटपटादिपदार्थविशेषपरिज्ञानं तु ज्ञानमिति ज्ञानदर्शनयोः परस्परं भेदः । निद्रापञ्चकं त्विदं-निद्रा १ निद्रानिद्रा २ प्रचला ३ प्रचलाप्रचला ४ स्त्यानर्द्धिश्च ५ तत्र यस्यां सत्यां सुप्तः सन् सुखेन मनुष्यो जागर्ति सा निद्रा १५ यस्यां सत्यां दुःखेन जागर्ति सा निद्रानिद्रा १६ या स्थितस्योपविष्टस्य समुपगच्छति सा प्रचला १७ या मार्गे गच्छतः समागच्छति सा प्रचलाप्रचला १८ या दिनचिंतितकार्यं रात्रौ करोति वासुदेवबलादर्द्धबला स्यात् सा स्त्यानर्द्धिनिद्रा १९ एवं दर्शनचतुष्कनिद्रापञ्चकमीलने नव भेदा जाताः पूर्वोक्तदशमीलने जाता एकोनविंशतिः ।

तथा येन कर्मणा नीचकुले जन्म स्यात्तन्नीचर्गोत्रम् २० असातवेदनीयं-येन जीवो दुःखपरंपरां लभते तच्च प्रायस्तीर्यक्नरकेषु स्यात् २१ मिथ्यात्वं –

"अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या ।
अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तन्निगद्यते ॥१॥ (योगशास्त्र/द्वितीयप्रकाश/श्लोक ३)

इति लक्षणं २२ । स्थावरदशकमग्रे व्याख्यास्यते ३२ नरकत्रिकं नरकगतिः ३३ नरकानुपूर्वी ३४ नरकायुश्च ३५ जाताः । ३५

पञ्चविंशतिः कषायास्तत्र क्रोध १ मान २ माया ३ लोभ ४ रूपाश्चत्वारः कषायास्ते च प्रत्येकमनन्तानुबन्धि १ अप्रत्याख्यानिक २ प्रत्याख्यानिक ३ सञ्ज्वलन ४ भेदैः षोडश भवन्ति तेषां स्वरूपं चेदं तत्रानंतानुबन्धिनः आजन्माऽवधिभाविनो नरकगतिदायिनः सम्यक्त्वघातिनः पर्वतरेखासमानाश्च १ । अप्रत्याख्यानिका वर्षपर्यन्तभाविनस्तिर्यग्गतिदायिनो देशविरतिघातिनश्च २ । प्रत्याख्यानिका मासचतुष्टयमनुष्यगतिदायिनः साधुधर्मघातिनश्च ३ । सञ्ज्वलनाः पुनः पक्षावधयो देवगतिदायिनः केवलज्ञानघातिनश्च ४ ।

नवनोकषायाः ते चामी–हास्यरत्यरतिभयशोकजुगुप्सापुरुषवेदस्त्रीवेदनपुंसकवेदरूपास्तेषां स्वरूपं चेदं–येन कर्मणा सनिमित्तं निर्निमित्तं वा जीवानां हास्यमायाति तद् हास्यमोहनीयं १ येन मनोहरेषु शब्दरूपादिषु रागः स्यात् तद् रतिमोहनीयं २ येनामनोहरेषु शब्दरूपादिषु विरागः स्यात् तदरतिमोहनीयं ३ येन जीवानां नानाविधनिमित्तैर्भयमुत्पद्यते तद् भयमोहनीयं ४ येनाभीष्टवियोगे दुःखं ध्रियते तच्छोकमोहनीयं ५ येन बीभत्सवस्तुदर्शने निंदा क्रियते तज्जुगुप्सामोहनीयं ५ येन स्त्रियं प्रत्यभिलाषः स्यात् स पुंवेदस्तृणदाहसमः ७ स्त्रीवेदः करीषदाहसमः ८ नपुंसकवेदो नगरदाहसमः ९ एवं षोडशकषायैः नवनोकषायैश्च कृत्वा कषायाः पञ्चविंशतिर्जाताः । पूर्वोक्त ३५ मीलने जाताः षष्टिः ६० तथा 'तिरिअदुगं' तिर्यग्गतिः ६१

तिर्यगानुपूर्वी ६२ च तिर्यगायुषः पुण्यभेदे प्रतिपादितत्वात् 'सुरनरतिरिआउ' इत्यनेन, दृश्यते च राजादीनां पट्टहस्तितुरंगमादीनां सुखमनुभवतां शुभमायुः ॥१७॥

यया जीवानां चतुरिन्द्रियहान्या एकेन्द्रियत्वं भवति सैकेन्द्रियजातिः ६३ एवमेव द्वि-त्रि-चतुरिन्द्रियजातयो ज्ञेयाः जाताः ६६ या जीवानां खरोष्ट्रादीनामिवाशुभगतिः सा कुखगतिः ६७ येन कर्मणा जीव स्वशरीरावयवैः प्रतिजिह्वा-गलकण्ठिका-चोरदन्तादिभिरुपहन्यते तदुपघातनामकर्म ६८ अप्रशस्तं वर्णचतुष्कं-अशुभो वर्णः १ अशुभो रसः २ अशुभो गन्धः ३ अशुभः स्पर्शश्च ४ जाताः ७२

प्रथमसंहननं विना पञ्च संहननानि प्रथमसंहननस्य पुण्यभेदे गणितत्वात्, पञ्च संस्थानानि प्रथमं संस्थानमपि पुण्यभेदे गणितमस्ति । संहनननामानीमानि-वज्रऋषभनाराचं १ ऋषभनाराचं २ नाराचं ३ अर्धनाराचं ४ कीलिका ५ सेवार्तं ६ चैतेषां लक्षणं, यथा-यस्मिन् अस्थिसन्धावुभयतो मर्कटबन्धस्तस्योपरि कीलिकावज्रं तद् वज्रऋषभनाराचं १ कीलिकारहितं ऋषभनाराचं २ यत्रास्थिसन्धावुभयतो मर्कटबन्धः पट्टकीलिके न भवतः तन्नाराचं ३ यत्रैकपार्श्वे मर्कटबन्धोऽपरपार्श्वे च कीलिका स्यात्तदर्धनाराचं ४ यत्रास्थीनि कीलिकामात्रबद्धानि स्युस्तत्कीलिकाख्यं ५ यत्र पुनरस्थीनि पृथक्स्थितानि परस्परं संलग्नानि

भवन्ति तत्सेवार्तं नित्यं तैलाभ्यंगादिसेवया ऋतं व्याप्तं सेवार्तमिति नामार्थः ६ प्रथमं विना पञ्च संहनननान्यत्र ततो जाता भेदाः ७७ ।

संस्थानानि षट् नामानि यथा-समचतुरस्रं १ न्यग्रोधं २ सादि ३ वामनकं ४ कुब्जं ५ हुंडं ६ चेत्यर्थो यथा-समचतुरस्रं-पर्यंकासनोपविष्टजिनबिम्बमिव ज्ञेयं तत्पुण्यभेदे उक्तमिति हेतोरत्र न ग्राह्यं १ न्यग्रोधो वटः उपरि संपूर्णावयवोऽधस्तु हीनस्ततो नाभेरुपरिलक्षणोपेतं संपूर्णमधस्तु यद्धीनं तत्संस्थानं न्यग्रोधं २ सहाऽऽदिना वर्तते यत्तत्सादि नाभेरधो यथोक्तलक्षणसहितमुपरि तु हीनं तत्सादिसंस्थानं ३ यत्र पादपाणिशीरोग्रीवादिकं प्रमाणलक्षणसहितं उरउदरादि च कुब्जं तत्कुब्जसंस्थानं ४ तद्विपरीतं वामनसंस्थानं ५ सर्वावयवैरशुभं हुंडसंस्थानं ६ साम्प्रतं प्रायो मनुष्याणां हुण्डमेव वर्तते, प्रथमं विना शेषपञ्चसंस्थानमीलने पूर्वोक्तभेदा जाता द्व्यशीतिः ८२ ॥१८॥

अथ स्थावरदशकमाह-तिष्ठन्त्युष्णाद्यभितापिता अपि तत्परिहारेऽसमर्थाः इति स्थावरास्त एकेन्द्रिया ज्ञेयाः, स्थावरत्वदायकं कर्म स्थावरनामकर्म १ येन जीवाश्चर्मचक्षुषामदृश्या भवन्ति यथा निगोदादयस्तत्सूक्ष्मनामकर्म २ येन कर्मणा जीवा अपर्याप्ता एव म्रियन्ते यथा निगोदास्तदपर्याप्तनामकर्म ३ येन कर्मणैकस्मिन्शरीरेऽनंतानां जीवानां निवासो भवति यथा कन्दाद्यनंतकाये

तत् साधारणनामकर्म ४ येन जीवानामोष्ठजिह्वादंतादयोऽवयवाऽस्थिरा भवन्ति तदस्थिरनामकर्म ५ येन नाभेरधः शरीरमशुभं स्यात् तदशुभनामकर्म ६ येन जीवा दौर्भाग्यवन्तो भवन्ति तद् दुर्भगनामकर्म ७ दुःस्वरनामकर्म-येन जीवानां स्वरः कर्णकटुरमनोज्ञश्च स्यात् ८ येन जीवानां वचनं न केनाऽपि मन्यते तदनादेयनामकर्म ९ येन जीवानामयशोऽकीर्तिश्च स्यात् तदयशोनामकर्म १० इति पापतत्त्वस्य द्व्यशीतिभेदाः, इति पापतत्त्वं ४ ॥१९॥ अथाऽऽश्रवतत्त्वस्य पञ्चमस्य द्विचत्वारिंशद्भेदानाह गाथाचतुष्टयेन –

**इंदियकसायअव्वय, जोगा पंच चउ पंच तिन्नि कमा ।**
**किरियाओ पणवीसं इमा उ ताओ अणुक्कमसो ॥२०॥**

**काइअ अहिगरणीया पाउसिया पारितावणी किरिया ।**
**पाणाइवायरंभिअ परिग्गहिया मायवत्तीया ॥२१॥**

**मिच्छादंसणवत्ती अप्पच्चक्खाणा य दिट्ठी पुट्ठी य ।**
**पाडुच्चिय सामंतोवणीअ नेसत्थि साहत्थि ॥२२॥**

**आणवणि विआरणिआ अणभोगा अणवकंखपच्चइआ ।**
**अन्नापओगसमुदाण पिज्जदोसेरिआ वहिआ ॥२३॥**

प्रथमं पदं द्वितीयपदेन समं योजनीयं, तथाहि-इन्द्रियाणि पञ्च, कषायाश्चत्वारः, अव्रतानि पञ्च, योगास्त्रयः जाताः १७।

इन्द्रियाणि-स्पर्शन १ रसन २ घ्राण ३ चक्षुः ४ श्रोत्र ५ नामानि । तेषां स्वरूपं चेदं-तानीन्द्रियाणि द्विप्रकाराणि-द्रव्येन्द्रियाणि १ भावेन्द्रियाणि २ च । द्रव्येन्द्रियाणि पुद्गलद्रव्यरूपाणि, भावेन्द्रियाणि लब्ध्युपयोगरूपाणि, जीवस्य ज्ञानावरणादिकर्मक्षयोपशमभावात् स्पर्श १ रस २ गन्ध ३ रूप ४ शब्द ५ विषयग्रहणे या शक्तिः सा लब्धिः, यः पुनः स्पर्शादिग्रहणे परिणामो जायते स उपयोगः, एतद् द्वयरूपाणि भावेन्द्रियाणि पञ्च ।

कषायाः क्रोध ६ मान ७ माया ८ लोभ ९ रूपाश्चत्वारस्तेषां स्वरूपं पूर्वं व्याख्यातं ।

अव्रतानि–प्राणातिपात १० मृषावाद ११ अदत्तादान १२ मैथुन १३ परिग्रह १४ रूपाणि ।

योगास्त्रयः–मनोयोग १५ वचनयोग १६ काययोग १७ रूपा जाताः सप्तदश भेदाः ।

क्रियाश्च पञ्चविंशतिरिमाश्च ताः क्रियाः अनुक्रमशोऽनुक्रमेण ज्ञातव्याः ॥२०॥

अथ पञ्चविंशतिक्रिया आह–कायेनायतमानेन निर्वृत्ता जाता कायिकी पापक्रिया १ अधिकरणेन पशुवधादिप्रवृत्तेन खड्गादिनिर्वर्तनेन च निर्वृत्ता अधिकरणिकी २ जीवाजीवयोरुपरि प्रद्वेषकरणेन भवा प्राद्वेषिकी ३ क्रोधादिना स्वपरयोः परितापेन निर्वृत्ता पारितापनिकी ४ प्राणातिपातेन जीववधेन भवा प्राणातिपातिकी ५ कृष्याद्यारंभेन भवाऽऽरम्भिकी ६ धनधान्यादिनवविधपरिग्रहेण भवा पारिग्रहिकी ७ मायया परवञ्चनेन जाता मायाप्रत्ययिकी ८ ॥२१॥

मिथ्यादर्शनेन जिनवचनविपरीतपरिणामरूपेण प्रत्ययेन जाता मिथ्यादर्शनप्रत्ययिकी ९ अप्रत्याख्यानेनाविरत्या जाताऽप्रत्याख्यानिकी १० दृष्ट्वा कौतुकनिरीक्षणादि जाता दृष्टकी ११ रागाद्वा द्वेषाद्वा वृषभादिबालादिविशिष्टवस्तूनां हस्तस्पर्शनेन जाता स्पृष्टिकी १२ जीवाजीवादिकं प्रतीत्याश्रित्य कर्मबन्धनेन जाता प्रातित्यकी १३ स्वकीयगजतुरंगम-वृषभादिविशिष्टपदार्थं विलोकयितुं लोकं सर्वतः समागच्छन्तं प्रशंसाकुर्वन्तं वा दृष्ट्वा हर्षकरणेनाथवाऽनाच्छादितस्नेहादिभाजने

त्रसाणां जीवानां निपातेन जाता सामन्तोपनिपातिकी १४ राजाद्यादेशान्नितरां यन्त्रशस्त्राद्याकर्षणेन संजाता नैशस्त्रिकी १५ जीवेन श्वानादिनाऽजीवेन शस्त्रादिना शशकादिकं स्वहस्तेन मारयतः स्वाहस्तिकी १६ ॥२२॥

जीवाजीवयोराज्ञापनेन स्वेच्छया व्यापाररूपेणानयनेन वाऽऽज्ञापनिक्यानयनिकी वा १७ जीवाजीवयोर्विदारणे स्फोटनेन जाता वैदारणिकी १८ अनाभोगेन शून्यचितत्तया वस्तूनामादानग्रहणेन जाताऽनाभोगिकी १९ इहलोकविरुद्धाचरणेनानव-कांक्षप्रत्ययिकी २० अन्याऽपरा एकविंशतितमा प्रयोगेण मन-वचन-काययोगेन दुःप्रणिधानरूपेण जाता प्रायोगिकी २१ अष्टानां कर्मणां समुदायेन जाता सा सामुदायिकी, मार्यमाणचौरं वा पश्यतां च भवतीति वृद्धाः २२ प्रेमेण मायालोभरूपेण जाता प्रेमिकी २३ क्रोधमानरूपेण जाता द्वेषिकी २४ केवलिनां केवलकाययोगेन जातैर्यापथिकी २५ ।

पूर्वोक्तसप्तदशभेदानां पञ्चविंशतिक्रियाणां च मीलने जाता आश्रवतत्त्वस्य द्विचत्वारिंशद्भेदाः ४२ । व्याख्यातं पञ्चममाश्रवतत्त्वम् ५ ॥२३॥ अथ संवरतत्त्वं षष्ठं तस्य सप्तपञ्चाशद्भेदास्तानाह –

**समिइगुत्तीपरीसह जइधम्मो भावणा चरित्ताणि ।**
**पण ति दुवीस दस बार पंच भेएहिं सगवन्ना ॥२४॥**

प्रथमपदद्वयस्य तृतीयचतुर्थपदाभ्यां सह योजना कार्या सा चैवं-समितयः पञ्च, गुप्तयस्तिस्त्रः, परीषहाः द्वाविंशतिः, यतिधर्मो दशविधः, भावना द्वादश, चारित्राणि पञ्चैतैर्भेदैः कृत्वा सप्तपञ्चाशद्भेदाः संवरतत्त्वस्य भवन्ति ।

पञ्चसमितिनामानि यथा-ईर्यासमितिः १ भाषासमितिः २ एषणासमितिः ३ आदानभंडनिक्षेपणासमितिः ४ पारिष्ठापनिकासमितिः । अथैतेषां स्वरूपमाह-सं-सम्यक् जिनप्रवचनानुसारेण इतिः गमनचेष्टासमितिः ईयाया गमनस्य समितिरीर्यासमितिः, मार्गे गच्छन् साधुर्युगप्रमाणभूमौ दत्तदृष्टिः समस्तजीवानां रक्षां कुर्वन् यद् याति सेर्यासमितिः कथ्यते १ । भाषाया निरवद्यवचनस्य समितिर्भाषासमितिः २ । एषणा-भिक्षादोषविलोकने तस्या एषणायाः समितिरेषणासमितिः, यतः साधुभिर्द्विचत्वारिंशद्दोषरहित आहारो गृह्यते सैषणासमितिः ३ । आदानं-वस्तूनां ग्रहणं निक्षेपो-वस्तूनां स्थापनं मुञ्चनं तयोरादाननिक्षेपयोः समितिः यद्वस्तूनां ग्रहणं मोचनं च प्रथमं वीक्ष्य रजोहरणादिना प्रमार्ज्य विधीयते साऽऽदाननिक्षेपणासमितिः ४ । परिष्ठाप्यते सा पारिष्ठापनिका तस्याः समितिः पारिष्ठापनिकासमितिः ५ ।

गुप्तित्रयस्वरूपमिदं-१ मनोगुप्तिस्त्रेधा-आर्तरौद्रध्यानात् वधबन्धकल्पनाजालपरिहारः, २-धर्मध्यानानुबन्धिनी माध्यस्था परिणतिः ३-केवलज्ञानिनां योगनिरोधावस्थायां सकलमनोवृत्तिनिरोधश्च ६ वचनगुप्तिर्द्वेधा-१ भ्रूसंज्ञादिपरिहारेण मौनाऽभिग्रहः

२-वाचनापृच्छनादिषु मुखवस्त्रिकाच्छादितमुखस्य भाषमाणस्यापि वाग्नियन्त्रणं च ।

ननु वचनगुप्ति-भाषासमित्योः परस्परं को भेदः ? उच्यते-वचनगुप्तिः सर्वथा वचननिरोधरूपा, निरवद्य-सम्यक्-वचनभाषणरूपा च द्वेधा । भाषासमितिः पुनः सम्यग्वचनप्रवृत्तिरूपैकभेदैव, ७ कायगुप्तिर्द्वेधा-१ उपसर्गादिसद्भावे कायोत्सर्गादचलनं, २-केवलिनां योगनिरोधावस्थायां सर्वथा शरीरचेष्टापरिहारश्च ८ इति गुप्तित्रयम् ॥२४॥ अथ द्वाविंशतिपरीषहानाह –

**खुहापिवासासिउण्हं दंसाचेलारइत्थिओ ।**
**चरिआ निसीहिया सिज्जा अक्कोस वह जायणा ॥२५॥**

**अलाभरोगतणफासा मलसक्कारपरीसहा ।**
**पन्नाअन्नाण सम्मत्तं इअ बावीस परीसहा ॥२६॥**

क्षुधापरीषहः-निरवद्याहारालाभे क्षुधा सहनीया न पुनः सावद्याहारग्रहणं कार्यमित्येवंरूपः १ । पिपासापरीषहः-तृषा

सहनीया न पुनस्तृषापीडितेनापि सचित्तं जलं पेयं २ । शीतपरीषहः-कायोत्सर्गविहारादि कुर्वतां साधूनां शीतं लगति तत्सहनीयं न पुनरग्नेः सेवनं चिन्तनं वा कार्यं ३ । उष्णपरीषहः-आतापनादिकष्टं सहनीयं न पुनः ग्रीष्मे तापाक्रान्तैरपि स्नानवायुव्यजनवातायनाश्रयणं कार्यं ४ । कायोत्सर्गादिषु दंशमशकादिकृता पीडा सहनीया इति दंशपरीषहः ५ । मानप्रमाणोपेतैर्वस्त्रैर्मलिनजीर्णैरपि मनसि खेदो न कार्य इत्यचेलपरीषहः ६ । अमनोज्ञेषूपाश्रयेष्वाहारादिषु चारतिर्न कार्येत्यरतिपरीषहः ७ । स्त्रीणां मनोहररूपविभूषाविलासवचनचातुरीहावभावादिकं दृष्ट्वा चित्तक्षोभो न कार्य इति स्त्रीपरीषहः ८ । वायुवदप्रतिबद्धतया विहारः कार्य न पुनरेकत्र वासे स्थेयमिति चर्यापरीषहः ९ । श्मशानशून्यागारसर्पबिलसिंहगुहादिषु कायोत्सर्गकरणेनोपसर्गाः सहनीया न पुनरयोग्या चेष्टा कार्येति नैषेधिकीपरीषहः १० उच्चावच्चशय्यासु शीतोष्णकालादौ मनस्युद्वेगो न कार्य इति शय्यापरीषहः ११ । अज्ञानिलोकानां दुर्वचनश्रवणे कोपो न कार्यो **दृढप्रहारिवदित्याक्रोशपरीषहः** १२ । कोऽपि दुरात्मा साधूनां वधं करोति तथापि साधुभिस्तस्योपरि कोपो न कार्यः **स्कन्धकसूरि४९९शिष्यवदिति** वधपरीषहः १३ । भिक्षाकाळे परगृहेषु भ्रमणे याचने दुःखं न कार्यमिति याचनापरीषहः १४ ॥२५॥

अन्तरायकर्मोदये निर्दोषभिक्षालाभस्याभावेऽपि चित्ते उद्वेगो न कार्यो **ढंढणकुमारवत्** १५ । उग्ररोगसंभवेऽप्यार्तध्यानं

न कार्यं सम्यक् सह्यं **सनत्कुमारराजर्षिवत्** १६ । संस्तारकादौ दर्भादितृणव्यापारे देहपीडायामपि दुःखं चिन्त्यमिति तृणस्पर्शपरीषहः १७ । मलस्वेदादिकं शरीरान्न स्फेटनीयं किन्तु यावज्जीवं सम्यक् सहनीयं १८ । बहुलोकैः क्रियमाणेषु स्तुतिवन्दनादिषु चित्तोत्साहो न कार्य इति सत्कारपरीषहः १९ । बहुज्ञानसम्भवेऽप्यात्मीये चित्ते गर्वो न कार्य इति प्रज्ञापरीषहः २० । ज्ञानावरणीयकर्मोदयात्पठतामपि पाठो नागच्छति तथाऽपि दुःखं मनसि नानेयं किन्तु कर्मविपाक एव चिन्त्य इत्यज्ञानपरिषहः २१ । जिनशासनविषये मुक्तिदेवगुरुधर्मविषये च संदेहो न कार्य इति सम्यक्त्वपरीषहः २२ इति द्वाविंशतिपरीषहाः ३० ॥२६॥ अथ यतिधर्मस्य दशभेदानाह –

**खंतिमद्दवअज्जव मुत्ती तव संजमे अ बोधव्वे ।**
**सच्चं सोअं आकिंचणं च बंभं च जइधम्मो ॥२७॥**

क्षमा–उपशमेन क्रोधजयः १ मार्दवं मृदोर्भावो मार्दवं मानजयः २ आर्जवं–ऋजोर्भाव आर्जवं मायाजयः ३ मुक्तिः–निर्ममत्वं लोभजयः ४ तपो बाह्यमभ्यन्तरं चेति द्वादशधा ५ संयमः प्राणातिपातादिविरमणरूपः ६ सद्भ्यो जीवेभ्यो हितं पथ्यं सत्यं सर्वजीवेषु सुखकारिवचनं ७ शौचं–अदत्तादानपरिहारः ८ न विद्यते किञ्चनास्य भाव आकिञ्चन्यं सर्वपरिग्रहत्यागः

९ औदारिकवैक्रियसम्बन्धिमैथुनपरित्यागो ब्रह्मचर्य १० इति क्षान्त्यादिको दशप्रकारो यतिधर्मः ४० ॥२७॥ अथ भावनाया द्वादशभेदानाह –

**पढममणिच्चमसरणं संसारो एगया य अन्नत्तं ।**
**असुइत्तं आसव संवरो य तह निज्जरा नवमी ॥२८॥**

**लोगसहावो बोहीदुल्लहा धम्मस्स साहगा अरिहा ।**
**एआओ भावणाओ भावेयव्वा पयत्तेणं ॥२९॥**

नामानि यथा–अनित्यभावना १ अशरणभावना २ संसारभावना ३ अनित्यभावना ४ एकत्वभावना ५ अशौचभावना ६ आश्रवभावना ७ संवरभावना ८ निर्जराभावना ९ लोकस्वभावभावना १० बोधिभावना ११ धर्मसाधकभावना १२ अथैतासां भावनानां स्वरूपं कथ्यते–सर्वेऽपि पदार्था अनित्या इति चिन्तनं प्रथमाऽनित्यभावना १ देहिनां मरणादिसमये संसारे शरणं किमपि नास्तीति चिन्तनमशरणभावना २ चतुरशीतिलक्षयोनिजीवाः कर्मणा सर्वत्र भ्रमन्तीति चिन्तनं संसारभावना

३ एकाक्येव जीव आगच्छत्येकाक्येव च याति परभवमेकाक्येव कर्माणि शुभान्यशुभानि चोपार्जयति भुङ्क्ते चेति चिन्तनमेकत्वभावना ४ जीवानां देहोऽपि पृथग्भूतो वर्तते ततः पुत्रकलत्रधनादिपदार्था विशेषतः पृथग्भूतास्ततः परमार्थवृत्त्या नान्यः कोऽपि कस्यापि सम्बन्धी वर्तते इति चिन्तनमन्यत्वभावना ५ देहस्य सप्तधातुमयस्य नवश्रोतांसि नारीजनापेक्षया स्तनद्वयसद्भावेनैकादश श्रोतांसि निरन्तरं वहन्ति मलमूत्रश्लेष्मादीनि महाबीभत्सानि सहचारीणि सन्ति अशुचित्वं न किमपि शुचित्वमिति चिंतनमशौचभावना ६ मनोवाक्काययोगैः शुभाशुभकर्मार्जनमाश्रवः ७ मिथ्यात्वादीनां बन्धहेतुभूतानां संवरणस्योपायाः सम्यक्त्वादयो वर्तन्ते इति चिन्तनं संवरभावना ८ निर्जरा-कर्मनिर्जरणं सा द्वेधा-सकामनिर्जरा १ अकामनिर्जरा २ च सकामनिर्जरा साधूनामकामाऽज्ञानिजीवानां, तत्र सकामा द्वादशप्रकारतपोभिः कर्मक्षयरूपा, अकामा पुनः तिर्यगादिजीवानां तृषा-बुभुक्षा-छेदन-भेदन-ताडन-तर्जन-भारोद्वहनादिना कष्टसहनेन यः कर्मक्षयस्तद्रूपा इति चिन्तनं निर्जराभावना ९ ॥२८॥

चतुर्दशरज्ज्वात्मको लोकः कटिसंस्थापितकरेण तिर्यक्प्रसारितपादेन पुरुषाकारेण सदृशो वर्तते पुनर्धर्माधर्माकाशास्तिकायकालपुद्‌गलजीवरूपैः षड्भिर्द्रव्यैः परिपूर्णो वर्तत इति चिन्तनं लोकस्वभावभावना १० अनंतानंतकालेन दुर्लभा मनुष्यभवादिसामग्री, तस्याः प्राप्तावपि दुर्लभा बोधिर्जिनधर्मप्राप्तिरितिचिन्तनं बोधिभावना ११ संसारसमुद्रतारणे

प्रवहणसमस्य जिनधर्मस्य साधका एवार्हा योग्या नान्ये इति चिन्तनं धर्मभावना १२ । एताश्च द्वादशभावना धर्मिमनुष्येण प्रयत्नेन भावयितव्या इति द्वादशभावनाः पूर्णा ५२ ॥२९॥ अथ चारित्रस्य पञ्च भेदानाह –

**सामाइअत्थ पढमं छेओवट्ठावणं भवे बीअं ।**
**परिहारविसुद्धिअं सुहुमं तह संपरायं च ॥३०॥**

**तत्तो अ अहक्खायं खायं सव्वम्मि जीवलोगम्मि ।**
**जं चरिऊण सुविहिया वच्चंति अयरामरं ठाणं ॥३१॥**

सामायिकं १ छेदोपस्थापनीयं २ परिहारविशुद्धिकं ३ सूक्ष्मसंपरायं ४ यथाख्यातं ५, च तेषां स्वरूपं चेदं– सर्वसावद्यव्यापारपरित्यागरूपं निरवद्यव्यापारासेवनरूपं च सामायिकं १ प्राणातिपातविरमणादिपञ्चमहाव्रतरूपं छेदोपस्थापनीयं २ नव साधवो गच्छाद् बहिर्निर्गत्याष्टादशमासान् यावत् सिद्धान्तोक्तरीत्या तपः कुर्वन्ति तत्परिहारविशुद्धिकं ३ सूक्ष्मसंपरायनाम्नि दशमे गुणस्थानके वर्तमानानां साधूनां यच्चारित्रं भवति तत्सूक्ष्मसंपरायं ४ ॥३०॥

सर्वेषु कषायेषु क्षयं प्राप्तेषु साधूनां यच्चारित्रं तत्, यच्चारित्रं चरित्वाऽऽसेव्य सुविहिताः साधवो बहुविधा अजरामरं मोक्षं प्राप्ताः ५-५७ इति पञ्च समितयः, तिस्रो गुप्तयो, द्वाविंशतिः परीषहाः, दशविधो यतिधर्मः, द्वादश भावनाः, पञ्च चारित्राणि सर्वमीलने सप्तपञ्चाशद्भेदाः संवरतत्त्वस्य जाता इति संवरतत्त्वं षष्ठम् ६ ॥३१॥ अथ निर्जरातत्त्वं सप्तमं व्याख्यानयति–

**बारसविहं तवो निज्जरा य बंधो चउविगप्पो अ ।**
**पयइठिइअणुभागपएसभेएहिं नायव्वो ॥३२॥**

द्वादशविधतपो निर्जरातत्त्वमुच्यते ॥३२॥

(बन्धतत्त्वटीका निर्जरातत्त्वटीकानन्तरं लिखिता) तस्य तपसो द्वादश भेदानाह –

**अणसणमूणोदरिया वित्तिसंखेवणं रसच्चाओ ।**
**कायकिलेसो संलीणया य बज्झो तवो होइ ॥३३॥**

**पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।**
**झाणं उस्सग्गो वि य अब्भितरओ तवो होइ ॥३४॥**

इदं बाह्यं तपो भवति, तस्य षड्भेदास्तथाहि-अनशनं १ ऊनोदरता २ वृत्तिसंक्षेपः ३ रसत्यागः ४ कायक्लेशः ५ संलीनता च ६ तेषामर्थो यथा-अनशनमाहारत्यागरूपं तच्च द्वेधा-इत्वरं १ यावत्कथिकं च २ तत्रेत्वरं-चतुर्थषष्टाष्टमादि, यावत्कथिकं च प्रान्तावस्थायामनशनग्रहणरूपं १ । ऊनोदरता-एकद्वित्रिचतुरादिकवलादिहान्या ज्ञेयाः २ । वृत्तिसंक्षेपः-द्रव्य-क्षेत्र-काल-भावविषयाभिग्रहेणानेकधारूपो यथा-**श्रीमहावीरस्य** चतुर्विधाभिग्रह**श्चंदनबालया** पूरितः ३ । रसत्यागो विकृतित्यागरूपः ४ । कायक्लेशो-लोचयोगासनादिकष्टसहनं ५ । संलीनता चतुर्विधा-इन्द्रिय १ कषाय २ योग ३ निवारणेन स्त्र्यादिवर्जितस्योपाश्रयस्य निवसनेन ४ च ६ । एवं बाह्यं तपः लोकप्रसिद्धं षड्विधं ज्ञेयं ॥३३॥



अथाभ्यन्तरतपसः षड्भेदानाह-प्रायश्चित्तं १ विनयः २ वैयावृत्त्यं ३ स्वाध्यायः ४ ध्यानं ५ उत्सर्गनामकं ६ च । तेषामर्थो यथा-तत्र प्रायश्चित्तं तद्यत् यथा स्वकीयानि पातकानि लग्नानि भवन्ति तथैव गुरूणामग्रे मनःशुद्ध्याऽऽलोच्यते गुरुदत्तं तपश्च समाचर्यते १ । विनयः सप्तधा-ज्ञान १ दर्शन २ चारित्र ३ मनो ४ वचन ५ काय ६ लोकोपचार ७ भेदैर्ज्ञेयः

२ । वैयावृत्त्यं-आचार्योपाध्यायतपस्विशिष्यग्लानादीनामन्नपानादिसंपादनविश्रामणरूपं ज्ञेयं ३ । स्वाध्यायो-वाचना १ पृच्छना २ परावर्तना ३ अनुप्रेक्षा ४ धर्मकथारूपः ५ पञ्चभेदो ज्ञेयः ४। ध्यानं-आर्त्तध्यानरौद्रध्यानधर्मध्यानशुक्लध्यानरूपं तत्र आर्त्तध्यानरौद्रध्यानयोः परिहारो धर्मध्यानशुक्लध्यानयोश्च स्वीकारः ५ । उत्सर्गो द्रव्य-भावभेदेन द्विधा-द्रव्योत्सर्गो गण-देहोपधि-भक्तत्यागेन चतुर्धा, भावोत्सर्गः पुनः क्रोधादिपरित्यागेन ज्ञातव्यः ६ । एवं षट्प्रकारमाभ्यन्तरं तपः १२ ।

नन्वभ्यन्तरं कथमधिकम् ? उच्यते-मोक्षप्राप्ताविदमंतरंगकारणं ततोऽधिकमिति निर्जरातत्त्वं सप्तमं ७ ॥३४॥

अथाष्टमं बन्धतत्त्वं-बन्धः-कर्मभिः सह जीवानां संश्लेषो, यथा क्षीरनीरयोरग्न्ययःपिण्डयोर्वा, स बन्धश्चतुर्विकल्पः प्रकृति १ स्थिति २ अनुभाग ३ प्रदेश ४ भेदैर्ज्ञातव्यः । अथैतानेव चतुरो भेदान् प्रक्षेपगाथयाऽऽह –

**पयइ सहावो वुत्तो ठिई कालावहारणं ।**
**अणुभागो रसो णेओ पएसो दलसंचओ ॥३५॥**

प्रकृतिः-स्वभावः परिणामः १ स्थितिबन्धः कालपरिमाणं २ अनुभागो रसः ३ प्रदेशबन्धः-पुद्गलदलसञ्चयः ४ ते

चत्वारोऽपि बन्धभेदा मोदकदृष्टान्तेन ज्ञेयाः ।

यथा–कश्चिन्मोदको बहुविधद्रव्यसंयोगनिष्पन्नो वातं पित्तं श्लेष्माणं च येन स्वरूपेण हन्ति स स्वभावः कथ्यते १ । तथा स एव मोदकः पक्षं मासं द्विमासं त्रिमासं चतुर्मासादि यावत्तेनैव रूपेण तिष्ठति सा स्थितिः कथ्यते २ । यथा पुनः स एव मोदकः कश्चित्कटुर्भवति कश्चित्तीव्रो भवति स रसो ज्ञेयः ३ । यथा पुनः स एव मोदकः कश्चिदल्पपरिमाणनिष्पन्नः कश्चित् पुनर्बहुदलनिष्पन्नः कश्चिद्बहुतरदलनिष्पन्नः एवं मोदकेषु यद्दलपरिमाणं स्यात् स प्रदेशबन्धः ४ ।

एवं कर्मणां बन्धोऽपि चतुष्प्रकारो ज्ञेयस्तथाहि–कानिचित् ज्ञानावरणीयादीनि कर्माणि ज्ञानं दर्शनं चारित्रं वा घ्नन्ति येन स्वभावेन स प्रकृतिबन्ध उच्यते १ । तान्येव कर्माणि कानिचिज्जघन्यतोऽन्तर्मुहूर्तस्थितिकानि भवन्ति कानिचित्पुनः सप्ततिकोटाकोटीसागरोपमस्थितिकानि भवन्त्येव यावन्तं कालं बद्धानि कर्माणि तिष्ठन्ति स स्थितिबन्धः कथ्यते २ । एषामेव कर्मणां केषांचिन्मधुररसः केषांचित् कटुरसः केषांचित्तीव्ररसः स्यात् स रसबन्धः ३ । तेषामेव कर्मणां यत् पुद्गलपरिमाणं भवति स प्रदेशबन्धः ८ । एवं बन्धतत्त्वस्य चत्वारो भेदाः ॥३५॥ पुनः प्रकारान्तरेण प्रक्षेपगाथया कर्मणां स्वभावमाह –

**पडपडिहारसिमज्ज हडचित्तकुलालभंडागारिणं ।**
**जह एएसिं भव्वा कम्माण वि जाण तह भावा ॥३६॥**

रे भव्यजीव ! त्वमेवं जानीहि, यथा-पटादीनामष्टानां पदार्थानां भावा स्वभावास्तथा ज्ञानावरणीयादीनामष्टानां कर्मणां भावः । कथमित्याह-यथा-पटो लोचनमावृणोत्येवं ज्ञानावरणीयं ज्ञानमावृणोति १ । प्रतिहारो राजादर्शनमागच्छन्तं नरं रुणद्धि एवं दर्शनावरणीयं दर्शनं रुणद्धि २ । असिः-खड्गो यथा देहादि छिनत्त्येवं वेदनीयकर्माऽपि ३ । तथा मद्यं मदिरा मनुष्यं प्रतिमोहयति विकलं विह्वलं च करोत्येवं मोहनीयं कर्म ४ । हडिः खोड्डुकस्तत्र पतितो मनुष्यो यथा न निस्सरितुं शक्नोत्येवमायुर्बंधवधोऽपि जीवः ५ । तथा चित्रकरचित्राणि यथा नानाप्रकाराणि तथा नामकर्मापि ६ । कुलालः कुम्भकारः यथा नानाप्रकाराणि प्रशस्तान्यप्रशस्तानि भाण्डवस्तूनि निष्पादयत्येवं गोत्रकर्माऽप्युच्चैर्नीचैर्गोत्राणि ७ । तथा भाण्डाधिकारी राज्ञा न ददात्येवमन्तरायकर्माऽपि ८ इत्यष्टमं बन्धतत्त्वम् ८ ॥३६॥ अथ नवमं मोक्षतत्त्वं तस्य नव भेदास्तानाह –

**संतपयपरुवणया दव्वपमाणं च खित्तफुसणा य ।**
**कालो अ अंतरं भाग भावे अप्पाबहुं चेव ॥३७॥**

सत्पदप्ररूपणा १ द्रव्यप्रमाणं २ क्षेत्रप्रमाणं ३ स्पर्शना ४ कालः ५ अन्तरं ६ भागः ७ भाव ८ अल्पबहुत्वं च ॥३७॥ अथ प्रथमभेदस्य सत्पदप्ररूपणारूपस्य स्वरूपं प्ररूपयति –

**संतं सुद्धपयत्ता विज्जंतं खकुसुमव्व न असंतं ।**
**मुक्खत्ति पयं तस्स उ परूवणा मग्गणाईहिं ॥३८॥**

मोक्ष इति पदं सत् विद्यमानं कस्मात् शुद्धपदत्वादसंयुक्तपदत्वादेकपदत्वादित्यर्थः, आकाशकुसुमवत् असंत–अविद्यमानं न। अयम्भावः– समस्तलोके यस्य यस्य पदार्थस्यैकपदं नाम भवति स पदार्थोऽस्त्येव यथा घटपटलकुटादिरेवं मोक्षस्यापि मोक्ष इत्येकपदं नामातः कारणात् मोक्षोऽस्त्येव न पुनराकाशकुसुमवन्नास्ति यत आकाशकुसुमस्यैकपदनाम नास्ति किन्तु द्विपदं नामाऽस्ति। यद्यद् वस्तु द्विपदनामवाच्यं भवति तत्तदेकान्तेन विद्यमानं न भवति किन्तु किञ्चिद् गोशृंगमहिषशृंगादिवत् विद्यमानमस्ति किंचित् पुनः खरशृंगतुरंगमशृंगाकाशकुसुमादिवदविद्यमानं ततो मोक्ष इति पदमेकपदत्वादस्त्येवेत्यनुमानप्रमाणेन मोक्षसत्ता स्थापिता ॥३८॥ अथ तस्य मोक्षस्य सत्पदरूपस्य गत्यादिमार्गणाद्वारेण प्ररूपणा क्रियते, तथाहि –

नरगइपणिंदितसभव सन्नि अहक्खाय खइअ सम्मत्ते ।
मुक्खोऽणाहारकेवलदंसणनाणे न सेसेसु ॥३९॥

गतिश्चतुर्धा-मनुष्यगतिः १ तिर्यग्गतिः २ देवगतिः ३ नरकगतिश्च ४ तत्र मनुष्यगतावेव जीवानां मोक्षो भवति न शेषगतित्रये १ ।

इन्द्रियमार्गणायां जीवाः पञ्चधा सन्ति-एकेन्द्रियाः १ द्वीन्द्रियाः २ त्रीन्द्रियाः ३ चतुरिन्द्रियाः ४ पञ्चेन्द्रियाश्च ५ तत्र पञ्चेन्द्रिया एव मोक्षं यान्ति न पुनरेकेन्द्रियादिकाश्चत्वारः २ ।

कायमार्गणायां कायाः षट्-पृथिवीकायः १ अप्कायः २ तेजस्कायः ३ वायुकायः ४ वनस्पतिकायः ५ त्रसकायश्च ६ तत्र त्रसकाये स्थिता जीवा मोक्षं यान्ति न पुनः स्थावरकाये पृथिव्यादिपञ्चके ३ ।

भवसिद्धिमार्गणायां जीवा द्वेधा-भव्या अभव्याश्च, तत्र भवे सिद्धिर्येषां ते भव्यास्तेभ्यो विपरीता अभव्यास्तत्र भव्या एव मोक्षं यान्ति नाभव्याः ४ ।

संज्ञिमार्गणायां जीवा द्वेधा-संज्ञिनो येषां मनः संज्ञा विद्यतेऽसंज्ञिनो मनोरहिताः, तत्र संज्ञिन एव मोक्षं यान्ति नाऽसंज्ञिनः ५ ।

चारित्रमार्गणायां चारित्राणि पञ्च, तत्र यथाख्यातचारित्रे पञ्चमभेदे वर्तमानानां जीवानां मोक्षो भवति न सामायिकादिशेषचारित्रचतुष्के ६ ।

सम्यक्त्वं पञ्चधा वर्तते, तथाहि-औपशमिकं १ सास्वादनं २ क्षायोपशमिकं ३ वेदकं ४ क्षायिकं च, तेषां प्राप्तिश्चैवं-तत्रौपशमिकसम्यक्त्वस्य प्राप्तिरेवं-ज्ञानावरणीय-दर्शनावरणीय-वेदनीयान्तरायकर्मणां चतुर्णां त्रिंशत्कोटीकोटीसागरोपमस्थिति-प्रमाणानामेकोनत्रिंशत्कोटाकोटीसागरोपमस्थितिक्षये, मोहनीयकर्मणश्च सप्ततिकोटीकोटीसागरोपमस्थितिप्रमाणस्यैकोन-सप्ततिकोटीकोटीसागरोपमस्थितिक्षये नामगोत्रकर्मणोर्विंशतिकोटीकोटीसागरोपम-स्थितिप्रमाणयोरेकोनविंशतिकोटीकोटीसागरोपम-स्थितिक्षये सत्येवं सप्तानामपि कर्मणामेकैककोटीकोटीसागरोपमस्थितिमध्ये स्थितानां यथाप्रवृत्तिकरणेनाऽध्यवसायरूपेण जीवो निबिडरागद्वेषपरिमाणरूपां सुदुर्भेदां कर्मग्रन्थिं प्राप्नोति, ततोऽपूर्वकरणेनाऽध्यवसायरूपेण कर्मग्रन्थिं भित्त्वा प्रतिसमयं प्रतिसमयमनन्तविशुद्ध्या विशुद्ध्यमानो जीवस्तत्रान्तरकरणेन मिथ्यात्वस्यैककोटीकोटीसागरोपमस्थितिप्रमाणस्य स्थितिद्वयं करोति, तत्र प्रथमा स्थितिरान्तर्मुहूर्तिकी द्वितीया शेषास्थितिस्तदूना, प्रथमस्थितौ प्रतिसमयं मिथ्यात्वपुद्गलाननुभवन् क्षीणायां सत्यामन्तरकरणस्याद्यसमयेनैवौपशमिकं सम्यक्त्वं लभते तत्सम्यक्त्वमपौद्गलिकमन्तर्मुहूर्तकालं यावद्भवति १ ।

तथा या द्वितीया कर्मस्थितिर्मिथ्यात्वस्य वर्तते तस्याः पुञ्जत्रयं करोति जीवः शुद्धं १ अर्धविशुद्धं २ अशुद्धं ३ च, यथा कोद्रवाणां गोमयपानीयादिभिरुत्तारितमदनानां शुद्धः पुञ्जः १ अर्धोत्तारितानामर्धशुद्धः पुञ्जः २ अनुत्तारितमदनानामशुद्धः पुञ्जः ३ मिथ्यात्वदलिकस्यापि क्षपितमिथ्यात्त्वानुभावस्य यः पुञ्जः स शुद्धः क्षायोपशमिकरूपः कथ्यते, योऽर्धशुद्धः पुञ्जः स मिश्रः कथ्यते, योऽशुद्धपुञ्जस्तन्मिथ्यात्वं कथ्यते, तत्रौपशमिकसम्यक्त्वकालस्य जघन्यत एकसमये शेषे उत्कृष्टतः षडावलिकाशेषेऽनन्तानुबन्ध्युदयो भवति येन कृत्वोपशमसम्यक्त्वं कलुषीभवति तदा सम्यक्त्ववमनकाले सास्वादनं भवति २ ।

पूर्वोक्तपुञ्जत्रयमध्ये यदा शुद्धः पुञ्जोदयस्तदा क्षायोपशमिकसम्यक्त्वं भवति ३ ।

पुञ्जत्रयक्षपणकाले-क्षपणसमये वेदकसम्यक्त्वं भवति शुद्धसम्यक्त्वाणुवेदनाच्चरमसमये ४ ।

क्रोध-मान-माया-लोभानामनन्तानुबन्धिनां चतुर्णां क्षये मिथ्यात्वमिश्रपौद्गलिकसम्यक्त्वानां क्षये क्षायिकं भवति तदप्यपौद्गलिकं ५ । तत्र सम्यक्त्वानां पञ्चानां मध्ये क्षायिकसम्यक्त्वे सति मोक्षो भवति न शेषसम्यक्त्वचतुष्टये ७ ।

अनाहारकमार्गणायां-तत्रानाहारकस्य जीवस्य मोक्षो भवति नाऽऽहारकस्य ८ ।

ज्ञानमार्गणायां-केवलज्ञाने सति मोक्षो भवति न शेषे मतिज्ञानश्रुतज्ञानाऽवधिज्ञानमनःपर्यायज्ञानचतुष्टये ९ ।

दर्शनमार्गणायां-तत्र केवलदर्शने मोक्षो भवति न चक्षुर्दर्शन-अचक्षुर्दर्शन-अवधिदर्शनत्रये सति १० । इति मोक्षतत्त्वस्य नवभेदा वर्तन्ते तेषां मध्ये प्रथमः सत्पदप्ररूपणारूपो भेदो व्याख्यातः १ ॥३९॥ अथ द्रव्यप्रमाण-क्षेत्रद्वारद्वयं गाथयाऽऽह-

**दव्वपमाणे सिद्धाणं जीवदव्वाणि हुंति णंताणि ।**
**लोगस्स असंखिज्जे भागे इक्को य सव्वेवि ॥४०॥**

द्रव्यप्रमाणद्वारे चिन्त्यमाने सिद्धानां जीवद्रव्याण्यनन्तानि सन्तीति द्रव्यद्वारं समाप्तं २ ।



क्षेत्रद्वारे चिन्त्यमाने लोकाकाशस्याऽसंख्येयतमे भागे एकः सिद्धो वर्तते सर्वे वा सिद्धा लोकाकाशस्यासंख्येयतमे भागे वर्तन्ते परमेकसिद्धव्याप्तक्षेत्रापेक्षया सर्वसिद्धव्याप्तक्षेत्रमधिकप्रमाणं ज्ञेयं, क्षेत्रद्वारं समाप्तं ३ ॥४०॥ अथ स्पर्शना-काल-अन्तररुपं भेदत्रयं गाथयाऽऽह –

**फुसणा अहिआ कालो इगसिद्ध पडुच्च साइओणंतो ।**

**पडिवायाभावाओ सिद्धाणं अंतरं नत्थि ॥४१॥**

सिद्धानां स्पर्शना क्षेत्रादधिका भवति यथैकस्मिन्नाकाशप्रदेशे स्थितस्य परमाणोः सप्ताकाशप्रदेशस्पर्शना भवत्येवं सिद्धानामपि स्पर्शनाऽधिका भवतीति स्पर्शनाद्वारं ४ ।

कालद्वारमाह-एकं सिद्धं नामग्राहं प्रतीत्य कालः सादि-सहितः, अनन्तः अन्तररहितः सर्वसिद्धानामाश्रित्यानादिरनन्तश्चेति कालद्वारं पञ्चमं ५ ।

अथ षष्ठमन्तरद्वारमाह-प्रतिपातस्याभावात् सिद्धानामन्तरं नास्ति, यतोऽन्तरं तदुच्यते यत् तं भावं प्राप्य पुनरन्यत्र गत्वाऽऽगत्य तमेव भावं प्राप्नोत्येवंविधं सिद्धानामन्तरं नास्तीति षष्ठमन्तरद्वारम् ॥४१॥ अथ भागद्वारं-भावद्वारं च गाथयाऽऽह-

**सव्वजियाणमणंते भागे ते तेसिं दंसणं नाणं ।**

**खइए भावे परिणामिए अ पुण होइ जीवत्तं ॥४२॥**

तत्र भागद्वारमाह-सर्वजीवानामनन्ततमे भागे सर्वेऽपि सिद्धा वर्तन्ते, भागद्वारं सप्तमं ।

अथ भावद्वारमाह-तेषां सिद्धानां तेषु सिद्धेषु वा केवलज्ञानं केवलदर्शनं च क्षायिके भावे वर्तते, पुनः क्षयाभावेन शाश्वतत्वात् च । पुनः तेषां सिद्धानां जीवत्वं पारिणामिके भावे वर्तते इति भावद्वारं ८ ॥४२॥ अथाल्पबहुत्वद्वारं गाथयाऽऽह-

**थोवा नपुंससिद्धा थीनरसिद्धा कमेण संखगुणा ।**
**इय मुक्खतत्तमेअं नवतत्ता लेसओ भणिया ॥४३॥**

मोक्षगमनभवे ये नपुंसकत्वमनुभूय सिद्धास्ते स्तोकाः ।

ननु जन्मनपुंसकानां चारित्रमपि न भवति कुतो मोक्षगमनं ? उच्यते-एते जन्मनपुंसका न किन्तु ये पश्चाद्वर्द्धितादिकरणेन कृतास्ते ज्ञेयाः १ तेभ्यो नपुंसकेभ्यो ये स्त्रीवेदमनुभूय सिद्धास्ते संख्यातगुणा ज्ञेयाः २ तेभ्यः स्त्रीवेदसिद्धेभ्यो ये पुरुषवेदमनुभूय सिद्धास्ते संख्यातगुणा ज्ञेयाः ३ । इत्यल्पबहुत्वद्वारं समासं नवमं ९ । इत्यनेन ग्रन्थेन नवापि मोक्षतत्त्वस्य भेदा व्याख्याता इति मोक्षतत्त्वं ज्ञेयं ९ । मोक्षतत्त्वभणनेन च नवतत्त्वानि लेशतो भणितानि ॥४४॥ अथ नवतत्त्वानां परिज्ञाने फलमाह –

**जीवाइनवपयत्थे जो जाणइ तस्स होइ सम्मत्तं ।**
**भावेण सद्दहंतो अयाणमाणेवि सम्मत्तं ॥४४॥**

जीवादिनवपदार्थान् यो जानाति श्रद्धाति च तस्य सम्यक्त्वं भवत्यथ च भावेन 'तमेव सच्चं नीसंकं जं जिणेहिं पवेईयं' इत्यादिरूपेण श्रद्दधानोऽपि, कोऽर्थः ? श्रद्धानं कुर्वति जीवादि नवपदार्थान् अर्थादिकथनेनाजानन्नपि जीवादिनव-पदार्थज्ञानरहितेऽपि जीवे सम्यक्त्वं भवति ॥४४॥ अथ सम्यक्त्वस्य निश्चलतामाह –

**सव्वाइं जिणेसरभासिआइं वयणाइं नन्नहा हुंति ।**
**इय बुद्धि जस्स मणे सम्मत्तं निच्चलं तस्स ॥४५॥**

इति बुद्धिर्यस्य मनसि भवति तस्स सम्यक्त्वं निश्चलं ज्ञेयमिति, किं ? सर्वाणि वचनानि जिनेश्वरभाषितानि तीर्थंकरदेवकथितानि नान्यथा भवन्ति किन्तु सत्यान्येवेति ॥४५॥ अथ सम्यक्त्वस्पर्शने लाभमाह –

**अन्तोमुहुत्तमित्तं पि फासिअं हुज्ज जेहिं सम्मत्तं ।**
**तेसिं अवड्ढपुग्गलपरिअट्टो चेव संसारो ॥४६॥**

अन्तर्मुहूर्तमात्रमपि यैः सम्यक्त्वं स्पृष्टं भवति तेषां संसारोऽर्धपुद्गलपरावर्तो **जीवाभिगमादौ** देशोनः कथितस्ततो देशोनो ज्ञातव्यः, सम्यक्त्वप्राप्तेरनन्ताशातनाबहुलानामपि महाक्रूरकर्मणामपि जीवानां नाधिकः संसारः स्यात् ॥४६॥ पुद्गलपरावर्तः कियत्कालेन भवतीत्याह –

**उस्सप्पिणी अणंता पुग्गलपरिअट्टओ मुणेअव्वो ।**
**तेणंतातीअद्धा अणागयद्धा अणंतगुणा ॥४७॥**

अन्नती उत्सर्पिण्यः पुद्गलपरावर्तः ज्ञातव्यस्तेऽन्नता अतीताद्धा गतकालः, अनागतकालः अनागताद्धा तु गतकालादनंतगुणः निरन्तरं गमनत्वेऽप्यक्षुण्णत्वात् ॥४७॥ अथ सिद्धानां पञ्चदशभेदान् प्रक्षेपगाथयाऽऽह –

जिणअजिणतित्थतित्थागिहिअन्नसलिंगथीनरनपुंसा ।
**पत्तेयसयंबुद्धा बुद्धबोहिय इक्कणिक्काय ॥४८॥**

जिनाः तीर्थकरपदवीं प्राप्य सिद्धा १ अजिना ये तां पदवीं विना सिद्धा २ ये तीर्थे प्रवर्तिते सिद्धास्ते तीर्थसिद्धाः ३ ये तीर्थेऽप्रवर्तिते सिद्धास्तेऽतीर्थसिद्धा **मरुदेव्यादिवत्** ४ ये गृहिवेषेण सिद्धास्ते गृहिसिद्धा **मरुदेव्यादिवत्** ५ अन्यलिंगिनस्तापसादयः ६ ये स्वलिंगेन साधुवेषेण सिद्धाः ७ एवं स्त्रीवेद ८ पुरुषवेद ९ नपुंसकवेदैः सिद्धाः १० प्रतीत्य किञ्चिद् वृषभादिकं सिद्धाः प्रत्येकसिद्धाः ११ स्वयंबुद्धास्तीर्थंकराः १२ बुद्धबोधिता गुरुप्रतिबोधिताः १३ एकस्मिन् समये एकः सिद्धस्ते एकसिद्धाः १४ एकस्मिन् समये येऽनेकोऽष्टोत्तरशतपर्यन्ताः सिद्धास्तेऽनेकसिद्धाः १५ ॥४८॥

## (टीकाकृत्प्रशस्तिः)

संवत् वसुगजरसशशि (१६८८) समिते च दुर्भिक्षकार्तिके मासे ।
अमदावादे नगरे षटेलहाजाभिधप्रोल्यां ॥१॥

वृद्धोपाश्रयमध्ये चान्द्रकुले वृद्धे खरतरे गच्छे ।
श्रीजिनसागरसूरेर्विजयिनि राज्ये सुसाम्राज्ये ॥२॥
नवतत्त्वसूत्रवृत्तिर्विहिता श्रीसमयसुन्दरैः सुगमा ।
मुनिसहजविमलपंडितमेघविजयनामशिष्यकृते ॥३॥
वृत्तिं लिखित्वा मात्सर्यात् प्रशस्तिं न लिखिष्यति ।
जिनाज्ञालोपकृत् पापी नरके स पतिष्यति ॥४॥

॥ इति श्रीसमयसुन्दरोपाध्यायकृतं नवतत्त्वशब्दार्थव्याख्यानं सम्पूर्णम् ॥

श्रीसमयसुन्दरगणिविरचितवृत्तिसहितं

श्रीगजसागरमुनिविरचितं



# दण्डकप्रकरणम्

शान्तिं शान्तिकरं नत्वा गणिः समयसुन्दरः ।
दण्डकस्तोत्रसूत्रस्य वृत्तिं वक्ति प्रयत्नतः ॥

नमिउं चउवीसजिणे तस्सुत्तवियारलेसदेसणओ ।
दंडगपएहिं ते च्चिय थोसामि सुणेह भो भव्वा ॥१॥



भो भव्या ! यूयं शृणुत, अहमिति शेषः । तानेव जिना स्तोष्यामि, कैः कृत्वा ? दण्डकपदैः "नेरइआ असुराइं" इत्यादिभिः **श्रीभगवतीसूत्रोक्तैः** जीवस्थानैः, कुतः-केन प्रकारेण स्तोष्यामीत्याह 'तस्सुत्तवियारलेसदेसणउ' अयमर्थः-तेषां

तीर्थंकराणां सूत्रमागमः सिद्धान्तः इति यावत् तत्सूत्रं तस्य विचारस्तस्य लेशः एकदेशस्तस्य दर्शनं प्रकाशनं, तस्मात्, किं कृत्वा ? चतुर्विंशतिजिनान् नत्वा प्रणम्य इति गाथा संक्षेपार्थः ॥१॥ अथ चतुर्विंशतिदण्डकान् नामग्राहमाह –



**नेरइआ असुराई पुढवाई बेइंदियादओ चेव ।**
**गब्भयतिरिअमणुस्सा वंतरजोइसिअवेमाणी ॥२॥**

नेरइआ-नारकास्तेषां सप्तानामपि कथंचित् सूत्रे एक एव दण्डको गणितः १ । असुराई-असुरादयः दश दण्डकाः । असुरादयो दश ते चैते-असुरकुमाराः १ नागकुमाराः २ सुवर्णकुमाराः ३ विद्युत्कुमाराः ४ अग्निकुमाराः ५ द्वीपकुमाराः ६ उदधिकुमाराः ७ दिक्कुमाराः ८ वायुकुमारा ९ स्तनितकुमाराः १० इति ११ । पुढवाई इति पृथिव्यादयः पञ्च ते चैते-पृथिवी १ अप् २ तेजो ३ वायु ४ वनस्पतिरूपाः ५ । अत्र च सूक्ष्माश्चतुर्दशलोकव्यापिनः पृथिव्यादयः अपर्याप्ता न ग्राह्यास्तेषां पृथक् द्वाराभावात् जाताः षोडश १६ । पुनः बेइंदियादओ इति द्वीन्द्रियादयस्त्रयस्ते चैते-द्वीन्द्रियाः १ त्रीन्द्रियाः २ चतुरिन्द्रियाः ३ जाता एकोनविंशतिः १९ । पुनः गर्भजतिर्यग्मनुष्याः, अयमर्थः-गर्भजतिर्यंच १ गर्भजमनुष्याश्च २ ततो

जाता एकविंशतिः । पुनः वंतरजोइसिअवेमाणित्ति व्यन्तराः २२ ज्योतिषिका २३ वैमानिकाश्च २४ जाताः सर्वेऽपि चतुर्विंशतिः २४ ॥२॥ अथ चतुर्विंशतिदण्डकेषु यानि चतुर्विंशतिवक्तव्यस्थानानि तानि नामत आह –

**संखित्तयरी उ इमा सरीरमोगाहणा य संघयणा ।**
**सण्णा-संठाण-कसाय-लेस-इंदिय-दुसमुग्घाया ॥३॥**

**दिट्ठीदंसणनाणे जोगुवओगोववायचवणठिई ।**
**पज्जत्ति किमाहारे सन्निगइआगईवेए ॥४॥ (द्वारगाथा)**

इमा तु एषा गाथा संक्षिप्ततरा वर्तते, यतो नाममात्रेण चतुर्विंशति वक्तव्यानि सूचितानि न विस्तरतः । तत्र प्रथमं वक्तव्यं शरीरं, तत् शरीरं पञ्चधा वर्तते, तथाहि–औदारिकं १ वैक्रियं २ आहारकं ३ तैजसं ४ कार्मणं ५ च । अत्रायं भावार्थः– एतेषां पञ्चशरीराणां मध्ये कति शरीराणि कस्मिन् दण्डके लभ्यन्ते ? एवं सर्वत्र दण्डकेषु सर्वेषां वक्तव्यानां भावना कार्या १ ।

अवगाहना-शरीरमानं तत् त्रेधा-जघन्यं १ मध्यमं २ उत्कृष्टं ३ च २ ।

संहननं-**कर्मग्रन्था**भिप्रायेण अस्थिरचनारूपं तत् षोढा तथाहि-वज्रऋषभनाराचं १ ऋषभनाराचं २ नाराचं ३ अर्धनाराचं ४ कीलिका ५ सेवार्तं ६ च ३ ।

संज्ञाश्चतस्र-आहारसंज्ञा १ भयसंज्ञा २ मैथुनसंज्ञा ३ परिग्रहसंज्ञा ४ अथवा दश क्रोधसंज्ञा १ मानसंज्ञा २ मायासंज्ञा ३ लोभसंज्ञा ४ लोकसंज्ञा ५ ओघसंज्ञा ६ पूर्वोक्त ४ संज्ञामीलने जाता दश १० । तत्र ओघसंज्ञा का इत्याह-अव्यक्तोपयोगरूपा वल्लीवितानारोहणादिरूपा ज्ञानावरणीयाऽल्पक्षयोपशमसमुद्भव च इति **श्रीआचारांगवृत्तौ** षष्ठपत्रे शेषं सुगमं ४ ।

संस्थानानि षट्, तथाहि-समचतुरस्त्रसंस्थान १ न्यग्रोध २ सादि ३ वामन ४ कुब्ज ५ हुंड ६ रूपाणि ५ ।

'कषायाश्चत्वारस्ते च क्रोध १ मान २ माया ३ लोभ ४ रूपाः ६ ।

लेश्याः षट् ताश्चेमाः-कृष्णलेश्या १ नीललेश्या २ कापोतलेश्या ३ तेजोलेश्या ४ पद्मलेश्या ५ शुक्ललेश्या ६ च । अत्र तु द्रव्यरूपा अवस्थितरूपा विचार्या न भावलेश्याः ७ ।

इन्द्रियाणि पञ्च तानीमानि-स्पर्शन १ रसन २ घ्राण ३ चक्षुः ४ श्रोत्र ५ रूपाणि ८ ॥

समुद्घातौ द्वौ–एकः अजीवविषयोऽचित्तमहास्कन्धरूपः, तेनाचितमहास्कन्धरूपेण नात्र प्रयोजनं १। द्वितीयो जीवविषयः–स च सप्तधा, तथाहि–वेदनासमुद्घातः १ कषायसमुद्घातः २ मरणसमुद्घातः ३ वैक्रियसमुद्घातः ४ आहारकसमुद्घातः ५ तैजससमुद्घातः ६ केवलिसमुद्घातश्च ७। तत्र समुद्घातलक्षणं किमित्युच्यते, समवहननात् आत्मप्रदेशानां विकरणं समुद्घातः ९। ॥३॥

दृष्टिस्त्रेधा–सम्यग्दृष्टिः १ मिथ्यादृष्टिः २ मिश्रदृष्टि ३ १०। दर्शनं चतुर्धा–तथाहि–चक्षुर्दर्शनं १ अचक्षुर्दर्शनं २ अवधिदर्शनं ३ केवलदर्शनं ४ च ११।

ज्ञानं पञ्चधा, तथाहि–मतिज्ञानं १ श्रुतज्ञानं २ अवधिज्ञानं ३ मनःपर्यवज्ञानं ४ केवलज्ञानं ५ च। अत्र ज्ञानसहचारित्वात् अज्ञानत्रिकं अनुक्तमपि ग्राह्यं, तत्त्रयं यथा मत्यज्ञानं १ श्रुताज्ञानं २ विभंगज्ञानं ३ च १३।

योगाः पञ्चदश ते चेमे–औदारिकयोगः १ औदारिकमिश्रयोगः २ वैक्रिययोगः ३ वैक्रियमिश्रयोगः ४ आहारकयोगः ५ आहारकमिश्रयोगः ६ तैजसकार्मणयोगः ७ एते शरीरसंबन्धिनो योगाः सप्त, पुनश्चत्वारो मनोयोगास्तथाहि–सत्यमनोयोगः १ असत्यमनोयोगः २ सत्यामृषामनोयोगः ३ असत्यामृषामनोयोगश्च ४। एवं चत्वारो वचनयोगास्तथाहि–सत्यवचनयोगः (१) असत्यवचनयोगः (२) सत्यामृषावचनयोगः (३) असत्यामृषावचनयोगश्च (४)। प्रकारत्रयमीलने पञ्चदश योगा भवन्ति १४।

उपयोगो द्वेधा-साकारोपयोगः १ अनाकारोपयोगश्च २ । तत्र साकारोपयोगोऽष्टधा-पञ्चज्ञानानि ५ त्रीण्यज्ञानानि ३ । अनाकारोपयोगश्चतुर्धा-चक्षुर्दर्शनं १ अचक्षुर्दर्शनं २ अवधिदर्शनं ३ केवलदर्शनं ४ च सर्वमीलने द्वादश भेदा भवन्ति ॥१५॥

'उववाउत्ति'-एकसमये समकालं कियन्त उत्पद्यन्ते ? १६ ।

'चवणत्ति' एकसमये समकालं कियन्तः च्यवन्ते ? १७ ।

'ठिइत्ति' स्थितिः आयुः, कस्य कियद्भवतीति तदायुर्द्वेधा-जघन्यं १ उत्कृष्टं २ च १८ ।

'पज्जत्ति' पर्याप्तयो जीवशक्तिरूपाः कस्य कियत्यः ताश्चेमाः-आहारपर्याप्तिः १ शरीरपर्याप्तिः २ इन्द्रियपर्याप्तिः ३ श्वासोच्छ्वासपर्याप्तिः ४ भाषापर्याप्तिः ५ मनःपर्याप्तिः ६ १९ ।

'किमाहारेत्ति' के जीवाः कतिभ्यो दिग्भ्यः आगतमाहारं गृह्णन्ति २० ।

'संणीत्ति' संज्ञा-विशिष्टसंज्ञां ताश्च तिस्रः, तथाहि-दीर्घकालिकी १ हेतुवादोपदेशिकी २ दृष्टिवादोपदेशिकी ३ च । एतासां चार्थोऽयं-त्रिकालविषयेऽर्थं जानाति सा दीर्घकालिकी संज्ञा, सा च समनस्कानामेव भवति १ यश्च स्वदेहपालनाहेतोः इष्टवस्तुषु प्रवर्तते अहिताच्च निवर्तते वर्तमानकालविषये च यस्य चिन्तनं तस्य हेतुवादोपदेशिकी संज्ञा २ अथ यश्च

सम्यगदृष्टिः क्षायोपशमिकज्ञानयुक्तो यथाशक्ति रागादिनिग्रहपरस्तस्य दृष्टिवादोपदेशिकी संज्ञा ३ २१ ।

'गइ' इति गतिर्भवान्तरे गमनम् २२ ।

'आगइ' इति आगतिः परभवादागमनम् २३ ।

'वेए' इति वेदः, स च त्रेधा तथाहि–पुरुषवेदः १ स्त्रीवेदः २ नपुंसकवेदश्च ३ २४ । इति वक्तव्यानि ॥४॥ अथ यस्मिन् दण्डके यावन्त्येतानि वक्तव्यानि भवन्ति तानि प्रतिदण्डकं प्रतिपादयन्नाह –

**चउगब्भतिरियवाउसु मणुआणं पंच सेसतिसरीरा**

चत्वारि शरीराणि–औदारिक १ वैक्रिय २ तैजस ३ कार्मण ४ रूपाणि गर्भजतिर्यग्वाय्वोर्भवन्ति, आहारकं न भवति तस्य चतुर्दशपूर्वधरस्यैवकरणात् । अत्र 'दोवयणे बहुवयणं' इति प्राकृतसूत्रात् तिर्यग्वायुषु इति द्विवचनेऽपि बहुवचनं न दोषाय, 'मणुआणं पंच' इति मनुष्याणां पंचापि शरीराणि भवन्ति । शेषा एकविंशतिदण्डकाः त्रिशरीराः नारकाः त्रयोदशसंख्या देवाश्च तेषां वैक्रिय १ तैजस २ कार्मण ३ रूपं शरीरत्रयं भवत्यन्येषां पृथिव्यप्तेजोवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियदण्डकानां औदारिक १ तैजस २ कार्मण ३ रूपं शरीरत्रयं भवति इति प्रथमं द्वारम् १ । अथावगाहनामानरूपं द्वितीयं द्वारमाह –

**थावरचउगे दुहओ अंगुलअसंखभागतणू ॥५॥**

स्थावरचतुष्के पृथिव्यप्तेजोवायुरूपे दण्डकचतुष्के दुहओ त्ति द्वाभ्यां प्रकाराभ्यां जघन्योत्कृष्टरूपाभ्यां कृत्वा अंगुलस्यासंख्यभागा तनुः शरीरमानमित्यर्थः । इह यद्यपि एतेषां चतुर्णां बादरत्वात् वाताग्निजलपृथिवीरूपाणां परस्परमंगुलस्यासंख्यगुणवृद्धिरस्ति तथाप्यंगुलासंख्यभागमानं न व्यभिचरति ॥५॥

**सव्वेसिं पि जहन्ना साहाविय अंगुलस्स असंखंसो ।**

शेषाणां विंशतिदंडकानां स्वाभाविकस्य मौलस्य शरीरस्य उत्पत्तिसमये अंगुलस्यासंख्यातो भागो जघन्याऽवगाहना । अथोत्कृष्टामवगाहनां प्रतिदण्डकमाह पृथक् पृथक् –

**उक्कोस पणसयधणु नेरइआ ।**

उत्कृष्टतः नारकाः पञ्चशतधनुःप्रमाणाः सप्तमनरकापेक्षया ।

**सत्तहत्थ सुरा ॥६॥**

सुराः त्रयोदशदण्डकसत्काः सप्तहस्तप्रमाणाः भवनपतिव्यन्तरज्योतिष्कसौधर्मेशानान्ताः ततः परं शरीरहानि-सद्भावात् ॥६॥

**गब्भतिरिसहसजोयण ।**

गर्भजतिर्यञ्चः स्वयम्भुरमणसमुद्रमत्स्यादयः सहस्रयोजनाः ।

**वणस्सई अहिअजोयणसहस्सं ।**

वनस्पतिशरीरं साधिकयोजनसहस्रप्रमाणं तत्तु जलाश्रये ज्ञेयं । तदूर्ध्वं तु पृथिवीविकारः ।

**नरतेइंदि तिगाऊ**

नरा–मनुष्या युगलिकापेक्षया, त्रीन्द्रियाः कर्णशलाकादयः त्रिगव्यूतदेहमानाः ।

**बेइंदिय जोयणे बार ॥७॥**

द्वीन्द्रियाः शंखादयो द्वादशयोजनप्रमाणदेहाः ॥७॥

**जोयणमेगं चउरिंदिदेहमुच्चत्तणेण सुए भणिअं ।**

चतुरिन्द्रियदेहं पुनरुच्चत्वेन श्रुते **प्रज्ञापनादौ** योजनमेकं भणितं, एतन्मानं तु भ्रमरादीनामपेक्षया ।

**वेउव्वियदेहं पुण अंगुलसंखंसमारंभे ॥८॥**

प्रस्तावात् जघन्यतो वैक्रियदेहमानं इदमुक्तं किं तदाह–वैक्रियदेहं प्रारम्भे वैक्रियशरीरप्रारम्भसमये अंगुलस्य संख्यातो भागः ॥८॥ उत्कृष्टं तु वैक्रियशरीरं पृथक् पृथक् प्रसंगत आह –

**देवनरअहियलक्खं तिरिआणं नव य जोयणसयाइं ।**
**दुगुणं तु नारयाणं भणिअं वेउव्वियशरीरं ॥९॥**

देवानां मनुष्याणां चोत्कृष्टोत्तरवैक्रियशरीरं साधिकं योजनलक्षं भवति, च पुनः तिरश्चां नवयोजनशतानि, तु पुनः नारकाणां वैक्रियशरीरं द्विगुणं भणितं, कोऽर्थः ? निजनिजस्वाभाविकशरीरमानात् द्विगुणं स्यात् ॥९॥ अथ प्रसंगतः

उत्तरवैक्रियं कियत्कालं तिष्ठतीति कालमानमाह –

**अंतमुहुत्तं निरए मुहुत्तचत्तारि तिरियमणुएसु ।**

**देवेसु अद्धमासो उक्कोसविउव्वणाकालो ॥१०॥**

नरकेऽन्तर्मुहूर्तकालं यावत् उत्तरवैक्रियशरीरं कृतं सत् तिष्ठति पश्चाद्विनश्यति । पुनः तिर्यग्मनुष्ययोः चत्वारि मुहूर्तानि यावत् । देवेषु अर्धमासं यावत् उत्कृष्टो वैक्रियकाल इति द्वितीयं द्वारम् २ ॥१०॥ अथ तृतीयद्वारं संहननरूपमाह –

**थावरसुरनेरइया असंघयणा य विगलछेवट्ठा ।**

**संघयणछग्गं गब्भयनरतिरिएसु वि मुणेयव्वं ॥११॥**

स्थावराः पृथिव्यप्तेजोवायुवनस्पतिरूपाः पञ्च, सुराः देवाः, नैरयिकाः नारकाश्चैते एकोनविंशतिदण्डकाः असंहननाः संहननरहिताः । अयम्भावः–संहननमस्थिरचनारूपं भवति, एषां तु अस्थ्यभावात् न विवक्षितं **कर्मग्रन्थाभिप्रायेण**, परं **सिद्धान्ताभिप्रायेण** तु सुरनारकाः प्रथमसंहनना उक्ताः, तदभिप्रायं त एव विदन्तीति । तथा–द्वि–त्रि–चतुरिन्द्रियाः सेवार्ताः सेवार्त नाम षष्ठसंहननवन्तः, कथम् ? अस्थिरचनायाः सद्भावात् । तथा गर्भजनरतिरश्चाः संहननषट्कं ज्ञातव्यं, कोऽर्थः ?

षडपि संहननानि भवन्तीत्यर्थः, इति तृतीयं द्वारं संपूर्णम् ३ ॥११॥ अथ संज्ञाद्वारं चतुर्थमाह –

**सव्वेसिं चउ दह वा सण्णा ।**

सर्वेषां चतुर्विंशतिदण्डकानां चतस्र आहारसंज्ञा १ भयसंज्ञा २ मैथुनसंज्ञा ३ परिग्रहसंज्ञा ४ रूपा भवन्ति । अथवा इति पक्षान्तरे क्रोध १ मान २ माया ३ लोभ ४ लोक ५ ओघ ६ संज्ञाषट्कमीलने दश भवन्ति इति चतुर्थ द्वारम् ४ । अथ पञ्चमं संस्थानद्वारमाह –

**सव्वे सुरा य चउरंसा ।**
**नरतिरिय छ संठाणा हुंडा विगलिंदिनेरइया ॥१२॥**
**नाणाविहधयसूई बुब्बुअ वणवाउतेउअप्काया ।**
**पुढवीमसूरचंदाकारा संठाणओ भणिया ॥१३॥**

सर्वे सुराः त्रयोदशदण्डकमिताः चतुरस्त्रः समचतुरस्त्रसंस्थानाः, तथा नराः तिर्यञ्चः षट्संस्थानाः, तथा विकलेन्द्रियाः-

द्वि-त्रि-चतुरिन्द्रियाः-नैरयिका-नारकाश्च हुंडकसंस्थानाः ॥१२॥

तथा वणवाउतेउअप्काया-वनस्पतिवायुतेजोऽप्कायाः एते चत्वारः नाणाविहधयसूईबुब्बुय त्ति निर्विभक्तिको निर्देशः, अयमर्थः-वनस्पतिर्नानाविधाकारो नानाप्रकारदेहाकारः, वायुः ध्वजाकारदेहः, तेजोऽग्निः सूच्याकारदेहः, अप्कायः बुद्बुदाकारः, तथा पुहवीमसूरचंदाकारा पृथिवी मसूरनामधान्यदलाकारा संस्थानतः भणिताः कथिता **श्रीप्रज्ञापनादौ** इति पञ्चमद्वारम् ५ ॥१३॥ अथ षष्ठं कषायद्वारमाह –

**सव्वेवि चउकसाया ।**

सर्वेऽपि चतुर्विंशतिदण्डकाः चतुःकषायाः क्रोध-मान-माया-लोभसहिता भवन्तीति षष्ठं द्वारं सम्पूर्णम् ६ । अथ सप्तमं लेश्याद्वारमाह –

**लेसछगं गब्भतिरियमणुएसु ।**

**नारयतेऊवाऊविगला वेमाणिय तिलेसा ॥१४॥**

**जोइसिय तेउलेसा सेसा सव्वेवि हुंति चउलेसा ।**

गर्भजतिर्यग्-मनुष्येषु लेश्याषट्कं भवति। तथा नारक-तेजोवायु-विकलाः वैमानिकाश्च त्रिलेश्याः, अत्र विशेषतो विवेचनं क्रियते, तथाहि-प्रथमायां द्वितीयायां च नरकपृथिव्यां कापोता तृतीयस्यामुपरि कापोताऽधो नीला चतुर्थ्यां नीला, पञ्चम्यां नीला कृष्णा, षष्ठीसप्तम्यो, पृथिव्योः कृष्णैव। तेजोवायुविकलाः कृष्ण-नील-कापोतलेश्यावन्तः। वैमानिका अनेन प्रकारेण त्रिलेश्याः, **अयमर्थः** - सौधर्मेशानयोः तेजोलेश्या, ततः कल्पत्रये पद्मा, ततो लान्तकादिषु कल्पेषु एका शुक्लैव ॥१४॥

ज्योतिष्का तेजोलेश्याः, 'सेसा सव्वेवि हुंति चउलेसा' शेषा उक्तव्यतिरिक्ताः, के इत्याह-पृथिव्यप्वनस्पतिभवनपतिव्यन्तराः ते चतुर्लेश्याः, कथमित्याह-आदिलेश्यात्रयं स्वाभाविकं पृथिव्यप्वनस्पतिषु वर्तत एव, अथ केचित् तेजोलेश्यावन्तो देवा एतत्त्रयेषूत्पद्यन्ते तत् उत्पत्तिसमयेऽन्तर्मुहूर्तं पूर्वभविका तेजोलेश्या भवति, भवनपतिव्यन्तरास्तु स्वभावतश्चतुर्लेश्या एव इति सप्तमं द्वारं सम्पूर्णम् ॥७॥ अथाष्टमं द्वारं प्राह –

**इंदियदारं सुगमं ।**

एकेन्द्रिये पृथिव्यप्तेजोवायुवनस्पतिरूपे एकं स्पर्शनेन्द्रियं तथा द्वीन्द्रिये शंखप्रमुखे स्पर्शन-रसने द्वे इन्द्रिये, अथ त्रीन्द्रिये कीटिकाजूकादिके स्पर्शन-रसन-घ्राणानि त्रीणीन्द्रियाणि, चतुरिन्द्रिये भ्रमरादिके स्पर्शन-रसन-घ्राण-चक्षूरूपाणि चत्वारीन्द्रियाणि, पञ्चेन्द्रिये नारक-तिर्यग्-मनुष्य-देवरूपे स्पर्शन-रसन-घ्राण-चक्षुःश्रोत्राणि पञ्चेन्द्रियाणि भवन्ति इति अष्टमं इन्द्रियद्वारं सम्पूर्णम् ८ । अथ नवमं समुद्घातरूपद्वारमाह –

**मणुआण सत्त समुग्घाया ॥१५॥**

मनुष्येषु सप्त समुद्घाताः वेदना १ कषाय २ मरण ३ वैक्रिय ४ आहारक ५ तैजस ६ केवलि ७ रूपाः ॥१५॥ तथा-

**पणगब्भतिरिसुरेसु ।**

गर्भजतिर्यग्-सुरयोः पञ्च समुद्घाताः आहारक १ केवलि २ समुद्घातौ न भवतः । तथा -

**नारयवाउसु चउर ।**

नारकवाय्वोः चत्वारः समुद्घाताः आहारक १ तैजस २ केवलि ३ समुद्घातत्रयस्याभावात् । तथा -

**तिय सेसे ।**

शेषे पृथिव्यप्तेजोवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियरूपे दण्डके सप्तके त्रयो वेदना-कषाय-मरणरूपा भवन्ति इति नवमं द्वारं सम्पूर्णम् ९ ॥ अथ दशमं दृष्टिरूपं द्वारमाह –

**विगल दुदिट्ठी थावर मिच्छत्ति सेस तिअदिट्ठी ॥१६॥**

अयमर्थः-विकले द्वीन्द्रिय-त्रीन्द्रियचतुरिन्द्रियरूपे सम्यग्दृष्टि १ मिथ्यादृष्टि २ रूपं दृष्टिद्वयं भवति, तथा 'थावर मिच्छत्ती' स्थावराः पृथिव्यप्तेजोवायुवनस्पतयः मिथ्यात्विनः, तथा 'सेस तियदिट्ठी' शेषाः नारकसुरतिर्यग्मनुष्यरूपाः षोडश दण्डकाः दृष्टित्रयवन्तः इति दशमं द्वारं सम्पूर्णम् १० ॥१६॥ अथैकादशं दर्शनद्वारमाह –

**थावरबितिसु अचक्खू चउरिंदिसु तद्दुगं सुए भणियं ।**
**मणुआ चउदंसणिणो सेसेसु तिगं तिगं भणियं ॥१७॥**





स्थावराः पृथिव्यप्तेजोवायुवनस्पतिरूपाः पञ्च द्वीन्द्रियत्रीन्द्रियाश्चैतेषु सप्तदण्डकेषु एकं अचक्षुर्दर्शनं भवति, तथा चउरिंदिसु तद्दुगं चतुरिन्द्रियेषु तयोश्चक्षुर्दर्शनाऽचक्षुर्दर्शनयोर्द्विकं श्रुते **प्रज्ञापनादौ** भणितं, तथा मनुष्याश्चतुर्दर्शनिनः चक्षुर्दर्शन

१ अचक्षुर्दर्शन २ अवधिदर्शन ३ केवलदर्शनवंतो ४ भवन्ति, शेषेषु दण्डकेषु नारक-सुर-तिर्यग्रुपेषु पञ्चदशदण्डकेषु चक्षुर्दर्शन १ अचक्षुर्दर्शन २ अवधिदर्शन ३ रूपं दर्शनत्रयं भवति केवलं न स्यात् इति एकादशं द्वारम् ॥१७॥ अथ ज्ञानाज्ञानयोर्द्वारद्वयं द्वादशत्रयोदशरूपं सम्मिलितमेवाह –

**अन्नाणनाण तिअ तिअ सुरतिरिनिरए थिरे अनाणदुगं**
**नाणन्नाण दुविगले मणुए पणनाणतिअनाणा ॥१८॥**

सुर-तिर्यग्-नरके पञ्चदशदण्डके अज्ञानत्रिकं यथा-मत्यज्ञान-श्रुताज्ञान-विभंगज्ञानरूपं ज्ञानत्रिकं च मतिज्ञान-श्रुतज्ञान-अवधिज्ञानरूपं च भवति ।

ननु ज्ञानाज्ञानयोः परस्परं विरोधात् कथं द्वयमपि पञ्चदशदण्डकेषु एकत्वं भवति ? उच्यते-एतेषां मध्ये यस्मिन् दण्डके सम्यक्त्वं तत्र ज्ञानं यत्र च मिथ्यात्वं तत्राज्ञानं ततो न विरोधः ।

तथा स्थिरे पृथिव्यादिपञ्चकरूपे अज्ञानद्वयं मत्यज्ञानं श्रुताज्ञानं च । इह यद्यपि सिद्धान्ताभिप्रायेण पृथिवी-जल-वनस्पतिषु सम्यक्त्वं वमतां देवानामुत्पादे सास्वादनसद्भावाच्च मति-श्रुतज्ञाने भवतः परमत्र नाधिकृते, तथा नाणन्नाणदुविगले'

विकले द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियरूपे ज्ञानमज्ञानं च द्वयमपि स्यात् तेषां सम्यक्त्वे सति ज्ञानं मिथ्यात्वे सत्यज्ञानं, तथा मनुष्ये ज्ञानपञ्चकं परं सम्यक्त्वे सति, मनुष्येऽज्ञानत्रयमपि परं मिथ्यात्वे सति इति द्वादशं त्रयोदशं च द्वारम् १२-१३ ॥१८॥

अथ चतुर्दशयोगद्वारमाह –

**इक्कारस सुरनिरए तिरिएसु तेर पनर मणुएसु ।**
**विगले चउ पण वाए जोगतिगं थावरे होइ ॥१९॥**

'सुर-निरए' चतुर्दशदण्डके एकादशयोगा भवन्ति । औदारिक-औदारिकमिश्र-आहारक-आहारकमिश्राणां चतुर्णामभावात्। तथा तिरिएसु तेर-तिर्यक्षु त्रयोदशयोगाः आहारक-आहारकमिश्रयोः अभावात्, मनुष्येषु पञ्चदश योगाः भवन्ति, विकलेषु चत्वारो योगाः के इत्याह-औदारिक १ औदारिकमिश्र २ कार्मण ३ असत्यामृषाभाषारूपाः ४ तथा 'पण वाए' वायौ पञ्च योगाः । औदारिक १ औदारिकमिश्र २ वैक्रिय ३ वैक्रियमिश्र ४ कार्मण ५ रूपाः, तथा 'जोगतिअं थावरे होई' स्थावरे पृथिव्यप्तेजोवनस्पतिचतुष्टयरूपे योगास्त्रयः औदारिक १ औदारिकमिश्र २ कार्मण ३ रूपाः इति चतुर्दशं द्वारं १४ ॥१९॥

अथ पञ्चदशमुपयोगरूपं द्वारमाह –

**उवओगा मणुएसु बारस नव निरयतिरिअदेवेसु ।**

**विगलदुगे पण छक्कं चउरिंदिसु थावरे तिअगं ॥२०॥**

मनुष्येषु द्वादशापि उपयोगाः, तथा 'नवनिरयतिरिअदेवेसु' नारकतिर्यग्देवेषु नव उपयोगा स्युः, मनःपर्यायज्ञान-केवलदर्शनकेवलज्ञानरूपास्त्रयो न भवन्ति, तथा 'विगलदुगे पणछक्कं' कोऽर्थः ? द्वीन्द्रिय-त्रीन्द्रियविकले पञ्च उपयोगा, पञ्च के इत्याह-मतिज्ञान १ श्रुतज्ञान, २ मत्यज्ञान ३ श्रुताज्ञान ४ अक्षुर्दर्शन ५ रूपाः तथा चतुरिन्द्रियेषु 'छक्कं' षट् उपयोगा भवन्ति पञ्च पूर्वोक्त एव षष्ठः चक्षुर्दर्शनरूपः तथा स्थावरे पृथिव्यादिपञ्चके मत्यज्ञान १ श्रुताज्ञान २ अचक्षुर्दर्शन ३ रूपास्त्रय उपयोगाः इति पञ्चदशं द्वारं १५ ॥२०॥ अथ षोडशमुपपातद्वारमाह –

**संखमसंखा समए गब्भयतिरिविगलनारयसुरा य ।**

**मणुआ नियमा संखा वणणंता थावर असंखा ॥२१॥**

**असन्निनर असंखा ।**

गर्भजतिर्यञ्चःविकला-नारकाः-सुराश्चैते अष्टादश दण्डकाः एकस्मिन् समये संख्याता असंख्याताश्चोत्पद्यमाना लभन्ते, तथा मनुष्या नियमेन संख्याता एवोत्पद्यन्ते तेषां सत्तारूपेणापि संख्याततत्वात्, वणत्ति-वनस्पतयः अनन्ता उत्पद्यन्ते, तथा स्थावराः पृथिव्यादिपञ्चकरूपाः असंख्याता उत्पद्यन्ते ॥२१॥

असंज्ञिनो मनुष्याः **प्रज्ञापनायां** ये उच्चारादिचतुर्दशस्थानेषु कथितास्ते एकस्मिन् समये असंख्याता उत्पद्यन्ते इदं प्रसंगाल्लिखितमिति षोडशद्वारम् १६ । अथ सप्तदशं च्यवनरूपं द्वारमाह -

**जह उववाउ तहेव चवणेवि ।**

यथा चतुर्विंशतिदण्डकेषु उपपातद्वारं तथैव च्यवनद्वारमपि ज्ञेयं, ये संख्याताः असंख्याता अनंताश्चोत्पद्यमाना उक्तास्ते च्यवनेऽपि तथैव ज्ञातव्याः इति सप्तदशद्वारम् ॥७॥ अष्टादशं स्थितिद्वारमाह -

**बावीससगतिदसवाससहस्स उक्किट्ठ पुढवाई ॥२२॥**
**तिदिणग्गितिपल्ला ऊ नरतिरिसुरनिरयसागरतित्तिसा ।**
**वंतरपल्लं जोइस वरिसलक्खाहियं पलियं ॥२३॥**

असुराण अहिय अयरं देसूणदुपल्लयं नव निकाए ।
बारसवासुणपणदिण छमास उक्किट्ठ विगलाऊ ॥२४॥

पुढवाइ दसपयाणं अंतमुहुत्तं जहन्नआउठिई ।
दससहसवरिसठिइआ भवणाहिवनिरयवंतरिया ॥२५॥

वेमाणिअजोइसिया पल्लतयट्ठंसआउआ हुंति ।

पृथिव्यप्वायुवनस्पतीनां चतुर्णां दण्डकानामनुक्रमेण बावीसेत्यादि स्थितिरायुर्ज्ञातव्यं, अयम्भावः-पृथिव्याः द्वाविंशति-वर्षसहस्राण्युत्कृष्टमायुः, तथा सग त्ति-अपां सप्तसहस्रवर्षाणि, तथाऽग्नेरग्रे पृथक् वक्ष्यमाणत्वात्, वायोः त्रीणि वर्षसहस्राणि, तथा वनस्पतेः दशसहस्रवर्षाण्यायुः ॥२२॥

'तिदिणग्गि त्ति' अग्नेः त्रीण्यहोरात्राणि, तथा 'नरतिरि' इति नराणां तिरश्चां च त्रीणि पल्योपमानि देवकुरूत्तरकुरु-युगलिकापेक्षया तथा 'सुरनिरयसागर तित्तिसा' त्ति सुराणां नारकाणां चायुरुत्कृष्टं त्रयस्त्रिंशत्सागरोपमाणीदं च सर्वार्थविमान-

सप्तमनरकापेक्षं चानुक्रमेण ज्ञेयं, व्यन्तराणां पल्योपमं, ज्योतिषां वर्षलक्षाधिकं पल्यं चन्द्रापेक्षया ॥२३॥

तथा असुराणां चमरादीनां साधिकं सागरोपमं, तथा नवनिकाये उत्तरदिशि देशोनं पल्योपमद्वयं, दक्षिणदिशि तु सार्धं पल्योपमं, तथा 'बारसवासुणपणदिणछमासुक्किट्ठविगलाऊ' विकलानां द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणामुत्कृष्टमायुरनुक्रमेणैवं ज्ञातव्यं, तथाहि-द्वीन्द्रियाणां द्वादशवर्षाणि, त्रीन्द्रियाणामेकोनपञ्चाशद्दिनानि, चतुरिन्द्रियाणां षट्मासाः ॥२४॥

अथ चतुर्विंशतिदण्डकानां जघन्यां स्थितिमाह-'पुढवाईदसपयाणं' पृथिव्यादिदशपदानां पृथिव्यप्तेजोवायुवनस्पतिद्वीन्द्रिय-त्रीन्द्रियचतुरिन्द्रियगर्भजतिर्यग्मनुष्यरूपाणां जघन्यायुः स्थितिरेकमन्तर्मुहूर्तं, तथा भवनाधिपा नारका व्यन्तराश्च दशसहस्रवर्ष-स्थितिकाः एतेषां दशवर्षसहस्राण्यायुरित्यर्थः ॥२५॥

तथा 'वेमाणिअजोइसिअपल्लतयट्ठंसआउआ होंति' अयमर्थः-वैमानिकदेवानां जघन्यमायुः पल्योपमं, ज्योतिषां चानुक्रमेण पल्योपमस्याष्टमो भागः इत्यष्टादशं द्वारम् ॥१८॥ अथैकोनविंशतितमं पर्याप्तिरूपं द्वारमाह –

**सुरनरतिरिनिरएसु छ पज्जत्ती थावरे चउगं ॥२६॥**
**विगले पंच पज्जत्ती ।**

सुर-नर-तिर्यग्-नरकेषु षट्पर्याप्तयो भवन्ति तथा स्थावरे पृथिव्यादिपञ्चके भाषा-मनःपर्याप्तिद्वयरहिताश्चतस्रो भवन्ति ॥२६॥

तथा विकले द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियरूपे मनो विना पञ्च पर्याप्तयो भवन्ति इति एकोनविंशतितमं पर्याप्तिद्वारम् १९ । अथ विंशतितमं किमाहारे त्ति द्वारमाह –

**छद्दिसि आहार होइ सव्वेसिं ।**

**पणगाइपए भयणा ।**

सर्वेषां चतुर्विंशतिदण्डकानां षट्भ्यो दिग्भ्य आगतानां पुद्गलानामाहारो भवति, पंचदिगादिके आहारे भजना, अयं परमार्थः-लोकान्तवर्तिनां जीवानां पञ्चदिशो भवति, लोकनिष्कुटस्थानानां चतुर्दिक्कोऽपि भवति इति किमाहारद्वारं २० । अथैकविंशतितमं संज्ञारूपं द्वारमाह –

**अह सन्नितिअं भणिस्सामि ॥२७॥**

**चउविहसुरतिरिएसु नरएसु अ दीहकालिगीसन्ना ।**
**विगले हेउवएसा सन्नारहिया थिरा सव्वे ॥२८॥**



अथ ग्रन्थकर्ता वक्ति-अहं संज्ञात्रिकं चतुर्विंशतिदण्डकेषु वक्ष्यामि ॥२७॥

तथाहि-चतुर्विधसुरेषु तिर्यक्षु नरकेषु च दीर्घकालिकी संज्ञा भवति, यस्यां दीर्घकालोऽतीतोऽनागतो वर्तमानो विषयो ज्ञेयतया इति व्युत्पत्तेः, तथा विकले-द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियरूपे हेतूपदेशिकी संज्ञा अव्यक्तकिंचिन्मनोज्ञानसहिता वर्तमानविषया इत्यर्थः, तथा स्थावराः पञ्चापि सर्वे संज्ञारहिताः विशिष्टैतत्संज्ञारहिता इत्यर्थः ॥२८॥

**मणुआण दीहकालियदिट्ठिवाओवएसिया केवि ।**



मनुष्याणां दीर्घकालिकी संज्ञा, केचित् पञ्चेन्द्रिया द्रष्टिवादोपदेशिकीसंज्ञासहिता भवन्ति क्षायोपशमिकादिसम्यक्त्वसहिताः, पञ्चेन्द्रियतिर्यंचोऽपि केऽपि द्रष्टिवादोपदेशिकीसंज्ञासहिता भवन्ति परमल्पत्वान्न विवक्षिताः इति एकविंशतितमं द्वारं २१ । अथ द्वाविंशतितमं त्रयोविंशतितिमं च द्वारद्वयं संलग्नमेवाह –

**पज्जपणतिरिमणुअ च्चिय चउव्विहदेवेसु गच्छंति ॥२९॥**

**संखाउ पज्जपणिंदि तिरिनरेसु तहेव पज्जत्ते ।**
**भूदगपत्तेअवणे एएसु च्चिअ सुरागमणं ॥३०॥**

पर्याप्तास्तिर्यंचो मनुष्याश्च चतुर्विधदेवेषु गच्छन्ति न शेषजीवाः, एतावता एतयोर्द्वयोर्देवेषु गतिरुत्पत्तिः इति गतिः ॥२९॥

अथ देवाश्च्युत्वा कुत्र गच्छन्ति इति आगतिमाह-संख्यातायुष्केषु तिर्यग्नरेषु तथैव पर्याप्ते भूदकप्रत्येकवने-पृथिवी-जल-प्रत्येकवनस्पतिरूपे एतावता एतेषु दण्डकपञ्चकेषु सुराणां आगमनमयमर्थः-गर्भजपर्याप्तास्तिर्यंचो मनुष्याश्च देवाः भवन्ति, देवाश्च्युत्वा पञ्चेन्द्रियतिर्यग्मनुष्यपृथिव्यप्वनस्पतिषु आगच्छन्ति इति देवानां गत्यागती इति त्रयोदशदण्डका देवसम्बन्धिनो जाताः ॥३०॥ अथ तिर्यग्नरयोर्गत्यागती आह –

**पज्जत्तसंखगब्भय तिरियनरा निरयसत्तगे जंति ।**

पर्याप्ताः संख्यायुषो गर्भजास्तिर्यंचो नराश्च नरकसप्तके यान्ति, 'असन्नी खलु पढमं' इति वचनात् असंज्ञिनोऽपि प्रथमां पृथिवीं यावत् यान्ति परं तेषां नात्राऽधिकारः इति नारकाणां गतिः, तथा -

**निरयउवट्टा एएसु उववज्जंति न सेसेसु ॥३१॥**

दंडक

नरकेभ्य उद्वृत्ता निर्गता एतयोरेव तिर्यग्-नरयोरेव विषये गच्छन्ति न शेषेषु द्वाविंशतिदण्डकेषु इत्यागतिः, इति नारकाणां गत्यागती, दण्डका जाताश्चतुर्दश ॥३१॥ अथ पृथिव्यप्वनस्पतीनां त्रयाणां दण्डकानां गत्यागती आह -

**पुढवी आउवणस्सइ मज्झे नारयविवज्जिया जीवा ।**
**सव्वे उववज्जंति नियनियकम्माणुमाणेणं ॥३२॥**



सर्वे जीवा नारकविवर्जिताः त्रयोविंशतिदण्डकाः पृथिव्यप्वनस्पतिमध्ये उत्पद्यन्ते परं निजनिजकर्मानुमानेन इति वदता सूत्रकारेण इति सूचितं स्वकृतं कर्म भुज्यते सर्वैः जीवैः न परकृतं इति पृथिव्यप्वनस्पतीनां गतिः ॥३२॥ आगतिमाह -

**पुढवाइदसपएसु पुढवीआऊवणस्सई जंति ।**

पृथिव्यप्वनस्पतयः पृथिव्यादिदशपदेषु आगच्छन्ति, पृथिव्यादिदश पदानीमानि पृथिव्यप्-तेजो-वायु-वनस्पति-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-गर्भजतिर्यग्-गर्भजमनुष्याः, इति पृथिव्यादित्रयाणां गत्यागती, दण्डका जाताः सप्तदश । अथ तेजोवाय्वोर्गत्यागती आह –

दंडक

**पुढवाइदसपएहिं तेउवाउसु उववाओ ॥३३॥**

**तेउवाऊ गमणं पुढवीपमुहंमि होइ पयनवगे ।**

पृथिव्यादिदशपदानां तेजोवाय्वोर्विषयेषूपपातः गतिरित्यर्थः, तेजोवाय्वोर्गमनं-आगतिः पृथिव्यादिपदनवके भवति गर्भजमनुष्ये तयोरागते अभावात् इति तेजोवाय्वोर्गत्यागती दण्डका जाता एकोनविंशतिः ॥३३॥ अथ विकलानां गत्यागती आह –

**पुढवाइठाणदसगा विगला इंति अ तहिं जंति ॥३४॥**

विकला द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियाः पृथिव्यादिदशकात् पूर्वोक्तात् 'इंति' आगच्छन्ति इति विकलानां गतिः पुनस्तत्रैव मृत्वा यान्ति इति विकलानां गत्यागती, दंडका जाताः द्वाविंशतिः । अथ तिरश्चां गंत्यागती आह –



**गमणागमणं गब्भयतिरिआणं सयलजीवठाणेसु ।**

गर्भजतिरश्च सकलजीवस्थानेषु चतुर्विंशतिदण्डकेषु गमनं-गतिः आगमनं च भवतीति तिरश्चां गत्यागती, दण्डका जातास्त्रयोविंशतिः। अथ मनुष्यस्य गत्यागती आह –

**सव्वत्थ जंति मणुआ तेउवाउर्हिं नो इंति ॥३५॥**



मनुष्याः सर्वत्र चतुर्विंशतिदण्डकेषु मृत्वा यान्ति, संहनन-कालादिसद्भावे मुक्तावपि यान्ति इति गतिः, तेजोवायुभ्यां सकाशात् नागच्छन्ति इति मनुष्याणां गत्यागती, इति गत्यागती आश्रित्य इति चतुर्विंशतिदण्डकलापनिका ।



अत्र संमूर्च्छिममनुष्याणामधिकारो नास्ति तथापि सोपयोगत्वेन तेषां गत्यागती अनया गाथया ज्ञेये, तथाहि –

**जंति संमुच्छि मणुआ पुढवाइदसपएसु नियमेण ।**

**आगच्छंति अडए (?) तेउवाउहिंतो न हुंति नरा ॥**

इदं त्रयोविंशतितमं द्वारं २३ ॥३५॥ अथ चतुर्विंशतितमं वेदद्वारमाह –



**वेअतिअतिरिनरेसु इत्थिपुरिसो अ चउविहसुरेसु ।**

**थिरविगलनारएसु नपुंसवेओ हवइ एगो ॥३६॥**

तिर्यग्नरेषु वेदत्रिकं पुं-स्त्री-नपुंसकरूपं, स्त्री-पुरुषश्चेति वेदद्वयं चतुर्विधदेवेषु, स्थिराः पृथिव्यप्तेजोवायुवनस्पतिरूपाः पञ्च विकलाः द्वि-त्रि-चतुरिन्द्रियाः नारका एतेषु एका नपुंसकवेद एव इति वेदद्वारं, इत्यनेन जातानि चतुर्विंशतिद्वाराणि सम्पूर्णानि २४ ॥३६॥ अथात्रानुक्तमपि अल्पबहुत्वद्वारमाह –



**पज्जमणुबायरग्गिवेमाणिअभवण निरय वंतरिआ ।**

**जोइसचउपणतिरिआ बेइंदितेइंदिभूआऊ ॥३७॥**

**वाऊवणस्सइ च्चिअ अहिआ अहिआ कमेणिमे हुंति ।**
**सव्वेवि इमे भावा जिणा ! मएऽणंतसो पत्ता ॥३८॥**

पर्याप्ता मनुष्याः सर्वस्तोकाः, कथं ? सर्वस्तोकसंख्यात्वात्, तेभ्यो बादराग्निरसंख्यातगुणः, तस्मात् वैमानिका असंख्यातगुणाः, तेभ्यो भवनपतय असंख्यातगुणाः, तेभ्यो नारका असंख्यातगुणाः, तेभ्यो व्यन्तरा असंख्यातगुणाः, तेभ्यो ज्योतिष्काः संख्यातगुणाः, तेभ्यश्चतुरिन्द्रियाः संख्यातगुणाः, तेभ्य पञ्चेन्द्रियास्तिर्यंचो विशेषाधिकाः, तेभ्यो द्वीन्द्रियाः विशेषाधिकाः, तेभ्यः त्रीन्द्रिया विशेषाधिकाः, तेभ्यः पृथिवीकायिका जीवा असंख्यातगुणाः, तेभ्यः अप्कायिका जीवा असंख्यातगुणाः ॥३७॥

तेभ्यो वायुकायिका संख्यातगुणा, तेभ्यो वनस्पतिजीवा अनंतगुणाः । एते पञ्चदशप्रकारा जीवभेदा अनुक्रमेण अधिका ज्ञेयाः । तत्र केचित् संख्यातगुणाः, केचिदसंख्यातगुणाः, केचित् विशेषाधिकाः, केचिदनंतगुणाः इति ।

अथ स्तोत्रकर्ता स्वकीयस्वरूपं प्रार्थनां च कुर्वन्नाह–'सव्वेवि इमे भावा जिणा ! मएऽणंतसो पत्ता' हे जिनाः ! सर्वेऽपि पूर्वोक्ताश्चतुर्विंशति दण्डका मया अनंतशोऽनंतान् वारान् प्राप्ताः ॥३८॥

**संपइ तुम्ह भत्तस्स दंडगपयभमणभग्गहिययस्स ।**
**दंडतिअविरइ सुलहं लहु मम दिंतु मुक्खपयं ॥३९॥**

संप्रत्यथ हे जिना ! इति शेषः, मम मह्यं लघु शीघ्रं मोक्षपदं ददतु । किं विशिष्टाय मह्यं ? तुम्ह भत्तस्स-युष्माकं भक्तस्य, पुनः किंविशिष्टस्य ? मम दंडगपयभमणभग्गहिययस्स दण्डकपदेषु भ्रमणं तेन भग्नं हृदयं यस्य स तस्य, किं विशिष्टं मोक्षपदं ? 'दंडतिअविरइसुलहं' दंडा मनोवचःकायदंडास्तेषां त्रयं दण्डत्रयं तस्माद् या विरतिर्विरमणं तया सुलभं सुप्राप्यम् ॥३९॥

**सिरिजिणहंसमुणीसररज्जे सिरिधवलचंदसीसेण ।**
**गजसारेण लिहिया एसा विन्नत्ति अप्पहिआ ॥४०॥**

**श्रीजिनहंससूरिमुनीश्वर**राज्ये **गजसारेण** एषा विज्ञप्तिर्लिखिता, किंविशिष्टा विज्ञप्तिः ? आत्महिता-आत्मनः हिता हितकारिका उपलक्षणत्वात्परेषां च, किंविशिष्टेन गजसारेण ? **श्रीधवलचन्द्र**नामाप्राग्वाटवंशीयोपाध्यायस्तस्य शिष्येणेति ॥३५॥

दुर्घटं दण्डकस्तोत्रं व्याख्यातुं येन तेन च ।
न शक्यते स्फुरद्बोधाभावेन भविनां पुरः ॥१॥
प्रयाति सुगमं तस्माद् व्याख्यानं विहितं स्फुटं ।
स्वयं व्याख्यानयन्तु द्राक् श्रीगुरोर्वाचनां विना ॥२॥
संवतिरस्य (स) निधिगुहमुखसोम (१६१६) मिते नभसि कृष्णपक्षे च ।
**अमदावादे हाजापटेल**पोलीस्थशालायां ॥३॥
श्रीमत्खरतरगच्छाधीश्वर**जिनचन्द्रसूरि**शिष्योऽभूत् ।
गणिः **सकलचन्द्रनामा रीहडगोत्री** च पुण्यात्मा ॥४॥
तच्छिष्य**समयसुन्दर** एतां वृत्तिं चकार चारुतया ।
अतिसुगमां सुबोधां पठन्तु भो ! पाठयन्तु द्राक् ॥५॥

इति **श्रीसमयसुन्दरो**पाध्यायकृता दण्डकस्तोत्रवृत्तिः ।' श्रीरस्तु कल्याणमस्तु ॥ श्री ॥

श्री हरिभद्रसूरिविरचिता

# जंबूद्वीपसंग्रहणी

## ( श्रीप्रभानंदसूरिविरचितवृत्तिसहिता. )

नत्वा श्रीवीरजिनं संदर्शितविश्वविश्ववस्तुचयम् ।
श्री क्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्ति ॥१॥

दत्तैकांतवादिसंदोहापारसादानां गिरास्वर्गापगानादानुवादानां श्रीहरिभद्रसूरिपादानां कृतेर्व्याचिख्यासायां मादृशस्याल्पमेधसः कोऽवकाशः ? तथाप्यर्थनिपुणप्रकरणरागात् स्वशक्तिमजानानोऽप्युपचक्रमे । इह तावत् सूत्रकारः प्रथमं चतुरतिशयस्वरूप-भगवन्नमस्कारमंगलाभिधायिकां शिष्टोपदिष्टमार्गानुसरणार्थमाद्यगाथामाह ।

**नमिय जिणं सव्वन्नुं, जगपुज्जं जगगुरुं महावीरं ।**

**जंबूद्दीवपयत्थे, वुच्छं सुत्ता सपरहेउं ॥१॥**



नमियजिणेत्यादि-महावीरं नत्वा जंबूद्वीपपदार्थान् वक्ष्ये इति संबंधः । तत्र कर्मविदारणादिगुणाद्वीरः । उक्तं च- "**विदारयति यत्कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ॥१॥** ततो महांश्चासौ वीरश्च महावीरः चरमतीर्थंकरः तं नत्वा प्रणम्य, किंविशिष्टमित्याह, रागादीनष्टादशांतरंगारीन् जयत्यभिभवति इति जिनः तं तथोक्तं, इत्यनेनापायापगमातिशयः अपायरूपान्तरारिक्षयात् । तथा सर्वज्ञं सर्वं जीवाजीवगतिस्थित्यादिकं जानाति वेत्तीति सर्वज्ञः तं तथाविधं, इह ज्ञानग्रहणेन दर्शनमपि गृहीतं तेन सर्वदर्शिनमित्यपि प्रत्येतव्यं, तन्नांतरीयकत्वात्, एतेन तु ज्ञानातिशयः सूचितः । तथा जगत्पूज्यं अत्र जगच्छब्देन भिन्नग्रंथिकभव्यसंज्ञिपर्याप्तपंचेन्द्रियग्रहः ततो जगतः पूज्योऽर्चनीयो जगत्पूज्यः तं तथाप्रकारं, अनेन तु विशेषणेन पूजातिशयः । पुनः कीदृशं ? जगद्गुरुं इह जगच्छब्देन चतुर्दशरज्ज्वात्मकलोकपरिग्रहः, ततो जगच्चराचरं गृणाति कथयति जगद्गुरुः तं, अनेकद्वीपसागरसुरालयनैरयिकालयादिपूर्णजगद्व्यकारमित्यर्थः, मूककेवलिनो हि सर्वज्ञाः सर्वदर्शिनोऽपि वचनसामर्थ्याभावान्न विश्वस्वरूपं निरूपयितुमलंभूष्णवो भवंत्यनेन तद्व्यवच्छेदाद्वचनातिशयः

प्रत्यपादि । एवं गाथार्द्धेन भगवन्नमस्काररूपं मंगलमुक्तं । अपरार्द्धे तु अभिधेयादीनाह, – "**जंबूद्दीवपयत्थि** त्ति" जंबूर्वृक्षविशेषस्तेन उपलक्षितो द्वीपो जंबूद्वीपः, उत्तरकुरुक्षेत्रे हि नीलवद्वर्षधरमाल्यवद्वक्षस्कारशीतानदीनां बहुमध्यदेशभागे बहुतद्वृक्षलक्षलक्षितो जंबूवृक्षोऽस्ति, तन्नाम्नायं जंबूद्वीपः । **उक्तं च भगवत्यंगे**–"से केणट्ठेणं भंते ! एवं वुच्चइ, जंबूद्दीवे दीवे, गोयमा ! जंबूद्दीवेणं दीवे मंदरस्स पव्वयस्य उत्तरेणं लवणस्स दाहिणेणं जाव तत्थ बहवे जंबूरुक्खा जंबूवन्ना जाव उवसोहेमाणा चिट्ठंति से तेणट्ठेणं गोयमा ! एवं वुच्चइ जंबूद्दीवे दीवे इति" तत्र पदार्थाः क्षेत्रपर्वतनदीवनादयोऽभिधेयवस्तुरूपाः तान्, किं करिष्यामि ? इत्याह, '**वुच्छं**' वक्ष्याम्यभिधास्यामि, इहाऽस्मदर्थक्रियायोगात्सूत्रेऽनुक्तोऽप्यहमित्यात्मनिर्देशो ज्ञातव्यः, जंबूद्वीपपदार्थान् वक्ष्यामि, अनेन त्वभिधेयं निगदितं । न भगवतोऽतिशायिज्ञानमंतरेण चक्षुरगोचरैतावत्क्षेत्र-स्वरूपप्ररूपणप्रवीणतास्तीत्यादिपरप्रश्ननिराकरणायाह–'**सुत्त त्ति**' सूत्रं सिद्धांतो गणधरादिरचितजंबूद्वीपप्रज्ञप्तिक्षेत्रसमासादि तस्मात्, न स्वमत्यनुसारेण । किमर्थमेतावान् प्रयासः क्रियते ? इत्याह '**सपरहेउ त्ति**' स्व आत्मा परोऽन्यस्तयोर्हेतुर्निमित्तं तदर्थमित्यर्थः, एतेन संबंधोऽभिहितः, स च स्वपरभेदाद् द्विधा, पुनरैकैकोऽनंतरपरंपरभेदाद् द्विधा, तत्रानंतरः कर्तुर्भव्यसत्त्वानुग्रहः परस्य श्रोतुस्त्वेतदर्थावगमो जंबूद्वीपविचारज्ञानरूपः, परंपरस्तु द्वयोरपि परमपदावाप्तिरिति । अभिधानं तूत्तरत्र गाथायां

स्वयमेव सूत्रकारो भणिष्यति ॥१॥ इदानीमभिधेयरूपदशद्वारपुरस्सरं कविः प्रकरणाभिधानमाह –

**खंडा[१] जोयण[२] वासा[३], पव्वय[४] कूडा[५] य तित्थ[६] सेढीओ[७] ।**
**विजय[८] दह[९] सलिलाओ[१०], पिंडेसिं होइ संघयणी ॥२॥**

तत्र खंडानि विस्तारेण भरतप्रमाणानि, योजनानि घनीकृतरूपाणि, वर्षाणि भरतक्षेत्रादीनि, पर्वता वैताढ्यादयः कूटानि वैताढ्यादिपर्वतशिरःस्थितानि शृंगरूपाणि सिद्धायतनकूटादीनि, तीर्थानि मागधादीनि, श्रेणयो दीर्घवैताढ्येषु पार्श्वद्वयेऽपि विद्याधरनगराभियोगिकदेवनिवासश्रेणयः, विजयाः कच्छादयः, ह्रदाः पद्मादयो महाह्रदाः, सलिला गंगाद्या महानद्यः । इह समास एवं कर्त्तव्यो योजनानि च वर्षाणि च योजनवर्षाणि प्राकृतत्वाल्लिंगव्यत्ययः, एवमग्रेऽपि, नवरं तीर्थानि च श्रेणयश्च तास्तीर्थश्रेणयः, "स्त्रीपुंनपुंसकानां सहवचने स्यात्परं लिंगमिति वचनात्" स्त्रीत्वमेवमग्रेऽपि विज्ञेयं । "पिंडेसिं होइ–संघयणि त्ति" । एषां दशानां वर्णनीयपदार्थानां पिंडः समवायः संग्रहणिर्भवति, पिंडशब्दः समूहेऽप्यस्ति, यदाह हैमानेकार्थः–"पिंडो वृंदे जपापुष्पे गोले बोलेऽगसिहयोरिति" । एतानि खंडादीनि दशापि परमार्थतः क्षेत्रमेव, ततः एवं निरुक्तिः, क्षेत्रं जंबूद्वीपलक्षणं संगृह्यते उपादीयतेऽनयेति क्षेत्रसंग्रहणिः अवयवे समुदायोपचारात् । इमानि दश द्वाराण्यत्र प्रकरणेऽभिधास्यंत इति ॥२॥ अथ यथोद्देशस्तथा निर्देश इति

न्यायमाश्रित्य प्रथमं गाथात्रयेण खंडान्याह –

**नउयसयं खंडाणं, भरहपमाणेण भाइए लक्खे ।**
**अहवा नउयसयगुणं, भरहपमाणं हवइ लक्खं ॥३॥**



**नउयसयेत्ति**–समस्तमपि जंबूद्वीपं नवत्युत्तरं शतं खंडानां भणिष्यमाणप्रकारेण भवतीति शेषः । क्षेत्रपर्वतविस्तारमाश्रित्य खंडानि ज्ञातव्यानि न पुनर्दीर्घत्वेन, यतः–धनुष्पृष्ठाकारत्वादाद्यं भरतक्षेत्रं लघीयस्ततः पराणि क्रमेण दीर्घतराणि यावन्महाविदेहो मध्यविभागे योजनलक्षदैर्घ्यः । कियत्प्रमाणानि खंडानि भवंति ? इत्याह–"भरहपमाणेण" इत्यादि भरतं प्रथमं वर्षं तस्य प्रमाणं मानं षड्विंशत्यधिकपंचयोजनशतानि सयोजनैकोनविंशषड्भागानि तेन भाजिते भागे हृते सति यल्लभ्यते तत्समानि खंडानि भवंति । तद्यथा–जंबूद्वीपविष्कंभो योजनलक्षं, एक एककस्तदग्रे पंच शून्यानि ध्रियंते १०००००, एष भाज्यराशिः, भरतमानं तु प्राक् कथितं ५२६ योजन, कला ६, अयं च भागहारः, ततो लब्धं नवत्युत्तरं शतं १९०, एतानि सर्वजंबूद्वीपखंडानि पुनर्विधानांतरेण खंडानयनायोपायमाह–'अहवे' त्यादि, – अथवा प्रकारांतरेण भरतप्रमाणमुक्तस्वरूपं नवत्यधिकेन शतेन गुणितं जंबूद्वीपविष्कंभमानं लक्षयोजनरूपं भवति । तथाहि–भरतमानं ५२६ यो. कला ६, एष मूलराशिः, नवत्युत्तरं शतं

च १९०, गुणकारः ततो गुणिते लब्धं योजनानि लक्षं १००००० एतत्पुनर्जंबूद्वीपमानमिति ॥३॥ पुनर्मुग्धावबोधनार्थं वर्षाणि वर्षधरांश्चाश्रित्य तृतीयं प्रकारमाह –



**अहवेग खंडे भरहे, दो हिमवंते य हेमवइ चउरो ।**
**अट्ठ महाहिमवंते, सोलस खंडाइं हरिवासे ॥४॥**

**बत्तीसं पुण निसढे, मिलिया तेसट्ठि बीयपासेवि ।**
**चउसट्ठी उ विदेहे, तिरासिपिंडे उ नउयसयं ॥५॥**





**अहवेत्यादि**–अथवेति विकल्पांतरे भरतनाम्नि क्षेत्रे एकमेकसंख्याकं खंडं भवतीत्यादि शेषोऽध्याहार्यः, खंडप्रमाणत्वात्तस्य । **यदुक्तं**–"पंचसये छव्वीसे छच्च कलावित्थडं भरहवासं" इति । तथा "दो हिमवंति त्ति" हेमवति वर्षधरे द्वे द्विसंख्ये खंडे भवतः । यतो भरतक्षेत्रात् पराणि वर्षधरवर्षाणि क्रमेण द्विगुणद्विगुणविस्ताराणि । तदुक्तं "भरहेरवयप्पभिई, दुगुणा दुगुणा य होइ विक्खंभे । वासा वासहराणं, जावय वासं विदेहंति ॥१॥ तथा "हेमवइ चउरो" इति हैमवते द्वितीये क्षेत्रे चत्वारि

चतुःसंख्याकानि खंडानि । 'अट्ठेत्यादि' महाहिमवति द्वितीये वर्षधरेऽष्टौ खंडानि । हरिवर्षे तृतीये क्षेत्रे षोडश खंडानि । तथा 'बत्तीसमिति' निषधे तृतीयवर्षधरे पुनर्द्वात्रिंशत् खंडानि भवंति इति सर्वत्र संबध्यते । इति महाविदेहव्यतिरिक्तेषु दक्षिणदिग्वर्त्तिषु वर्षवर्षधरेषु सर्वमीलने त्रिषष्टिखंडानि जातानि । इदानीमुत्तरदिग्व्यवस्थितक्षेत्रवर्षधरखंडानि निरूपयति-'मिलियेत्यादि' एवमेव मिलितानि समुदितानि त्रिषष्टिः खंडानि द्वितीयपार्श्वेऽपि भवेयुस्तद्यथा-एकं खंडमैरवते, द्वे शिखरिगिरौ, चत्वारि हैरण्यवतक्षेत्रे, अष्टौ रुक्मिपर्वते, षोडश रम्यक्क्षेत्रे, द्वात्रिंशत्तु नीलवति वर्षधर इति । 'चउसट्ठी' इत्यादि, इह पदैकदेशेऽपि पदसमुदायोपचाराद्विदेहे इति महाविदेहे सर्ववर्षधरमध्यवर्त्तिनि क्षेत्रे चतुःषष्टिः खंडानि भवंति । एतावता सर्वसंख्यया किं जातमित्याह-'तिरासीत्यादि' त्रयश्च ते राशयश्च त्रिराशयः तेषां पिंडः समूहः, यद्वा त्रयाणां राशीनां समाहारस्त्रिराशिः तस्य पिंडस्तस्मिन्, तुः पुनरर्थे नवत्यधिकं शतं खंडानि स्युरिति गाथाद्वयार्थः ॥४-५॥ अथ जंबूद्वीपे योजनपरिमाणानि खंडानि कियंति भवंति ? इत्यादिकं घनीकृतयोजनद्वारं गाथापंचकेनाह –

**जोयणपरिमाणाइं, समचतुरंसाइं इत्थ खंडाइं ।**
**लक्खस्स य परिहीए, तप्पाय गुणे य (ते) हुंतेव ॥६॥**

**जोयणेत्ति**-खंडप्रमाणमजानानं शिष्यं प्रति गुरुस्तत्प्रमाणमाचष्टे-अत्रास्मिन् जंबूद्वीपे प्रक्रांतप्रकरणे वा घनीकृतयोजनपरिमाणानि समचतुरस्राणां खंडानि योजनानि भण्यंते । समास्तुल्यप्रमाणाश्चत्वारोऽस्राः कोटयो येषां तानि तथोक्तानि । तथाहि- कल्पनया किल कश्चिद् देवः सकलमपि जंबूद्वीपं योजनप्रमाणेष्टिकाचितं करोति, प्रतरविस्तारेण तत्प्रमाणा यावत्य इष्टिका भवंति तावंत्येव योजनखंडानि भवेयुः । तदानयनाय करणमाह-'लक्खस्से' त्यादि, लक्षस्येति योजनलक्षप्रमाणं वृत्तक्षेत्रं तस्य परिधिर्बाह्यपरिमंडलं भणिष्यमाणप्रमाणं तस्य 'तप्पायगुणं' त्ति, तस्य लक्षस्य यः पादश्चतुर्थोऽशः पंचविंशतिसहस्ररूपः तेन गुणो गुणकारः तस्मिन् कृते सति, चः समुच्चये, किं भवतीत्याह,-'ते हुंति त्ति' प्राकृतत्वात् लिंगव्यत्ययः । ततस्तानि योजनपरिमाणानि खंडानि भवंति संपद्यंते । तथाहि- लक्षस्य परिधौ पंचविंशत्या सहस्रैर्गुणिते वांछितांको लभ्यत इति भावः, स चोत्तरत्र प्रपंचेन भणिष्यति ॥६॥ अधुना यदुक्तं 'लक्खस्स य परिहीए' इति परिधेर्नामकीर्त्तनं तस्यानयनाय करणगाथामाह —

**विक्खंभवग्गदहगुण, करणि वट्टस्स परिरओ होइ ।**
**विक्खंभपायगुणिओ, परिरओ तस्स गणियपयं ॥७॥**

**विक्खंभेति**-इह जंबूद्वीपपरिधिना प्रयोजनं, स च वेदिकाशिरःकटकजालकबाह्यदिग्भागवर्त्ती ग्राह्यः, अतो मूले द्वादशयोजनानि पृथुला वेदिका तस्याश्च मध्यान्यष्टौ योजनानि जंबूद्वीपे ज्ञातव्यानि, योजनचतुष्टयमानो बाह्यप्रदेशो लवणसमुद्रमध्ये गण्यते 'विष्कंभे' त्यादि विष्कंभो विस्तारः तस्य वर्गः तावतैव गुणनं, यथा चत्वारश्चतुर्भिर्गुणिताः षोडश भवंतीत्यादि स च दशगुणो दशकेन गुणितः तस्य करणिर्विषमसमेत्यादिना वर्गमूलानयनं, एवं कृते किं भवति ? इत्याह-'वट्टस्सेत्यादि' वृत्तस्य वर्तुलक्षेत्रस्य परिरयः परिधिर्भवति स्यात् । विष्कंभस्य पादेन चतुर्थांशेन गुणितः सन् परिरयो गणितपदं भवति । किंच सर्ववृत्तक्षेत्राणां परिधिगणितपदयोरानयनायायमेव करणविधिरिति गाथाक्षरार्थः । भावार्थस्त्वयं- यथा जंबूद्वीपस्य विष्कंभो योजनलक्षमानः तत एको न्यस्यते तदग्रे पंच शून्यानि १००००० तस्य वर्गो विधीयते एककस्याग्रे दशशून्यानि १०००००००००० पुनर्दशगुणने एकशून्यवृद्धिः १००००००००००० एतस्य राशेर्मूलमेतदार्याद्वयानुसारेणानेतव्यं, यथा- विषमात्पदतस्त्यक्त्वा वर्गस्थानच्युतेन मूलेन । द्विगुणेन भजेच्छेषं लब्धं विनिवेशयेत् पंक्त्यां ॥१॥ तद्वर्गं संशोध्य, द्विगुणीकुर्वीत पूर्ववल्लब्धं । उत्सार्य ततो विभजेत्, शेषं द्विगुणं कृतं दलयेत् ॥२॥ ततो लब्धांकस्य छेदराशिः, षट् लक्षाणि, द्वात्रिंशत्सहस्राणि, चत्वारि शतानि, सप्तचत्वारिंशदधिकानि, ६३२४४७ एतानि च प्रांतवर्त्तिसप्तकं मुक्त्वा सर्वाण्यर्द्धीक्रियंते

ततो जातानि त्रीणि लक्षाणि षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके ३१६२२७, शेषमुपरीदमुद्धरति चत्वारि लक्षाणि, चतुरशीतिसहस्राणि, चत्वारि शतानि, एकसप्तत्यर्गलानि ४८४४७१, अमूनि च योजनानि गव्यूतं योजनस्य चतुर्थांशः, ततश्चतुर्भिर्गुणितानि जाता एकोनविंशतिर्लक्षाः, सप्तत्रिंशत्सहस्रा, अष्टौ शतानि, चतुरशीति युतानि, गव्यूतानां १९३७८८४, ततश्छेदराशिना षड्लक्षादिना नवरमंत्यसप्तकमपि द्विगुणं कृत्वा भागे हृते लब्धं गव्यूतत्रितयं शेषमिदमुपरिष्टात्तिष्ठति, चत्वारिंशत्सहस्राणि, पंचशतानि, द्वाविंशत्यधिकानि ४०५२२, एकेन गव्यूतेन धनुःसहस्रद्वयं भवति, तावता च गव्यूतरूप उद्धरितराशिर्गुण्यते, तद्यथा - अग्रे शून्यत्रयं दत्वा मूलराशिर्द्विगुणो विधीयते, जाता अष्टौ कोटयो दशलक्षाश्चतुश्चत्वारिंशत् सहस्राः ८१०४४०००, पूर्वोक्तच्छेदराशिना भागो ह्रियते लब्धमष्टाविंशत्यधिकं धनुःशतं १२८ शेषमिदमुपरिधनूरूपं तिष्ठति। एकोननवतिः सहस्राण्यष्टाशीत्यधिकान्यष्टौ शतानि ८९८८८ ततोऽगुलानयनाय षण्णवत्या एतस्य गुणकारे दत्ते जातानि षण्णशीतिलक्षाण्येकोनत्रिंशत्सहस्राणि द्वे शतेऽष्टचत्वारिंशदधिके ८६२९२४८ प्राक्तनरीत्या छेदराशिमधो विहाय भागे हृते लब्धानि त्रयोदशांगुलानि १३, उपरीदमवशिष्यते, चत्वारि लक्षाणि, सप्त सहस्राणि, षट्चत्वारिंशदधिकानि, त्रीणि शतानि ४०७३६, अर्द्धांगुलानयनाय एष राशिर्द्विगुणीक्रियते, जातान्यष्टौ लक्षाणि, चतुर्दश सहस्राणि, षट्शतानि, द्विनवत्यर्गलानि

८१४६९२, प्राक्तनेन च्छेदराशिना भक्ते लब्धमर्द्धमंगुलं शेषमुद्धरति, एका लक्षा, द्व्यशीतिः सहस्राणि, द्वे शते अष्टात्रिंशदधिके १८२२३७, एष जंबूद्वीपस्य परिधिरिति ॥७॥ अमुमेवार्थं स्पष्टतरमाह –

**परिही तिलक्ख सोलस, सहस्स दोय सय सत्तवीसहिया ।**
**कोसतिगट्ठावीसं, धणुसय तेरंगुलद्धहिअं ॥८॥**

**परिहि** त्ति–योजनानां तिस्रो लक्षः, षोडश सहस्राः, द्वे शते सप्तविंशत्यधिके, क्रोशत्रयमष्टाविंशं धनुःशतं त्रयोदशांगुलान्यर्द्धं चांगुलं साधिकं जंबूद्वीपस्य परिधिः परिक्षेपो भवति । इहाधिकग्रहणादेका यूका लिक्षा चैका लभ्यत इत्यादि विशेषार्थिना स्वयमेवाभ्यूह्यं, सूत्रकारेणोपेक्षितत्वान्मयापि न लिखितमिति ॥८॥ अधुना जंबूद्वीपस्य गणितपदे कृते यत्संपद्यते तदभिधित्सुराह–

**सत्तेव य कोडिसया, नउआ छप्पन्न सयसहस्साइं ।**
**चउणउयं च सहस्सा, सयं दिवड्ढं च साहीयं ॥९॥**

**गाउयमेगं पनरस, धणूसया तह धणूणि पन्नरस ।**
**सट्ठिं च अंगुलाइं, जंबूद्दीवस्स गणियपयं ॥१०॥**

**सत्तेव य त्ति**–एवोऽवधारणे सप्त कोटिशतानि नवतिकोटय: षट्पंचाशल्लक्षाणि चतुर्नवतिसहस्राणि, द्वितीयार्द्धं शतं च द्वितीयं शतं अर्द्धं यत्र तत् द्वितीयार्द्धं सार्द्धं शतमित्यर्थ: । च: समुच्चये । कीदृशमित्याह–साधिकमधिकेन सहितं, आधिक्यमेवाविष्करोति, 'गाउय त्ति' एकमेकसंख्याकं गव्यूतं क्रोशं, पंचदशधनु:शतानि पंचदशोत्तराणीत्यर्थ: । च: समुच्चयार्थ: स च भिन्नक्रमस्तत एवं योज्यते, षष्टिरंगुलानि च जंबूद्वीपस्य गणितपदं भवतीति शेष:, इदमुक्तं भवति – यदि समचतुरस्राणि समस्तजंबूद्वीपस्य योजनप्रमाणानि खंडानि क्रियंते तदा यथोक्तसंख्यानि गव्यूताद्यधिकानि भवंति । तद्यथा – जंबूद्वीपस्य परिधिर्योजनानां तिस्रो लक्षा: षोडश सहस्राणि सप्तविंशशतद्वयाधिकानीत्येवंरूप: पंचविंशत्या सहस्रैर्गुणनीय:, ततो भवंति सप्तकोटीशतानि नवति: कोटय: षट्पंचाशल्लक्षाणि पंचसप्तति: सहस्राणि ७९०७६७५०००, पुनर्गव्यूतत्रितयं पंचविंशत्या सहस्रैर्गुणितं जातानि पंचसप्तति: सहस्राणि क्रोशानां ७५०००, एषां चतुर्भिर्भागे हृते लब्धा अष्टादश सहस्रा: सप्तशती पंचाशदधिका योजनानां १८७५०, एषोंऽकराशिर्मूलराशौ मीलनीय:, ततोऽष्टाविशं धनु:शतं पंचविंशत्या सहस्रैर्गुणनीयं

जातानि द्वात्रिंशद्धनुषां लक्षाणि ३२०००००, अष्टभिर्धनुःसहस्रैर्योजनं भवतीति कृत्वा तदानयनायाष्टभिरेव सहस्रैर्भागो ह्रियते, लब्धाश्चत्वारो योजनशता: ४००, एतेऽपि मूलराशिमध्ये प्रक्षेप्तव्या:, ततः सार्द्धत्रयोदशांगुलेषु पंचविंशत्यैव सहस्रैर्गुणितेषु लब्धानि त्रीणि लक्षाणि सप्तत्रिंशत्सहस्राणि पंचशताधिकानि ३३७५००, एषां धनुरानयनार्थं षण्णवत्या भागो ह्रियते, जातानि त्रीणि धनुःसहस्राणि पंचदशोत्तरपंचशताधिकानि ३५१५, षष्टिरंगुलानि चोपरिष्टात्। पुनर्गव्यूतानयनाय धनुःसहस्रद्वयेन भागे हृते लब्धं गव्यूतमेकं, षट्पंचाशल्लक्षाणि, चतुर्नवतिः सहस्राणि, सार्द्धशताधिकानि समचतुरस्राणां योजनप्रमाणखंडानां, तथैकं गव्यूतं पंचदशोत्तराणि पंचधनुःशतानि षष्टिरंगुलानि च, ७९०५६९४१५०, गव्यू. १ धनुः १५१५ अंगुल ६०, इति सर्वजंबूद्वीपगणितपदं प्रपञ्चितं तत्प्रपञ्चितेन समर्थितं द्वितीयं योजनद्वारम् ॥९-१०॥ संप्रति क्रमायातं तृतीयं क्षेत्रद्वारं गाथायाः प्रथमपादेनाह –

**भरहाइ सत्तवासा,**

"भरहाइ त्ति," वर्षाणि क्षेत्राणि मनुष्यनिवासस्थानानीत्यर्थः, तानि कियत्संख्यानि ? किंनामानि च भवंति इत्याह, सत्त त्ति सप्तसंख्यानि नामतस्तु भरतादीनि, आदिशब्दाद्धैमवतहरिवर्षमहाविदेहरम्यकैरण्यवतैरवतानां ग्रहः, तथा वर्षशब्दो

नपुंसकलिंगः पुंस्त्वे प्रयुक्तोऽपि प्राकृतत्वात् न दोषाय, "लिंगं व्यभिचार्यपि' इति वचनात्, अमूनि च सर्वक्षेत्राणि स्वाधिष्ठातृदैवतसमाननामानि । तथाहि-भरताधिपतिर्यो यो देव उत्पद्यते तं तं तत्सामानिकाद्या देवा 'भरत' इत्याह्वयंति, ततस्तन्नाम्ना तदधिष्ठितं क्षेत्रमपि भरतमिति कथ्यते । **तथाचागमः**-"से केणट्ठेणं भंते ! भरहे वासे इति ? गोयमा, भरहे देवे महड्डीए, महज्जुए जाव पलिओवमट्ठिइए परिवसइ, से एएणट्ठेणं गोयमा, एवं वुच्चइ भरहे वासे" इति एवं हैमवतादिष्वपि भावनीयमिति संक्षेपार्थः । विस्तरार्थस्त्वयं-सर्वद्वीपसमुद्राणां मध्ये परिपूर्णचंद्रमंडलसंस्थानः सर्वतो लक्षयोजनमानो जंबूद्वीपोऽस्ति । **यदागमः**-से णं जंबूद्दीवे एगा जगईए, सव्वओ समंता सपरिखित्ते साणं जगई अट्ठजोअणाइं उड्ढं उच्चत्तेणं, मूले बारसजोयणाइं विक्खंभेणं, मज्झे अट्ठजोअणाइं विक्खंभेणं, उवरिं चत्तारि जोअणाइं विक्खंभेणं, मूले विच्छिन्ना, मज्झे संखित्ता, उवरिं तणुआ, गोपुच्छसंठाणसंठिया, सव्ववइरामया, अच्छा सण्हा जाव पडिरुव त्ति" । तस्याश्चोपरिष्टादर्द्धयोजनोच्चः पंचधनुःशतविस्तीर्णो गवाक्षकटकः, तथा तस्या एव बहुदेशमध्यभागे गवाक्षकटकप्रमाणोच्छ्रयदैर्ध्या परिक्षेपेण जगतीसमाना, नानारत्ननिर्माणा, विविधपद्ममंडिता, पद्मवरवेदिकास्ति । **यदुक्तं राजप्रश्नीयोपांगे** - "से केणट्ठेणं भंते! एवं वुच्चइ, पउमवरवेइया ? गोयमा ! पउमवरवेइयाणं तत्थ तत्थ देसे तहिं तहिं वेइयासु, वेइयाबाहासु य,

वेइयाफलएसु य, वेइयापुडंतरेसु य, खंभेसु, खंभबाहासु, खंभफलएसु, खंभपुडंतरेसु, सूईसु, सूईमुहेसु, सूईफलएसु, सूईपुडंतरेसु, पक्खेसु, पक्खबाहासु पक्खफलएसु, पक्खपुडंतरेसु, बहुयाइं, पउमाइं, कुमुयाइं, नलिणाइं, सुभगाइं, सोगंधियाइं, पुंडरीयाइं, सयवत्ताइं, सहस्सवत्ताइं, सव्वरयणामयाइं, अच्छाइं, पडिरूवाइं, महयावासिक्कयछत्तसमाणाइं, पण्णत्ताइं समणाउसो से एएणं अट्ठेणं गोयमा, एवं वुच्चइ पउमवरवेइया" इति । तस्याः पार्श्वद्वयेऽपि द्वौ वनखंडौ वेदिकामानदैर्ध्यौ विद्येते, नवरं विस्तारेणाभ्यंतरः सार्द्धधनुःशतद्वयोनयोजनयुग्मप्रमाणो, बाह्यस्तु वनखंडोऽर्द्धाष्टमधनुःशतहीनयोजनयुग्ममानो, यतस्तत्र अन्यान्यप्यभ्यंतरात् वनखंडादधिकानि पंचधनुःशतानि जालकटकेनावरुद्धानि, परं श्रीमलयगिरिपादैर्नैतद्विवक्षितं, द्वयोरपि वनखंडयोरेकमेव मानमुक्तं, तत्त्वं तु बहुश्रुता विदंति । तस्यां च वेदिकायां मेरुपर्वतात्पंचचत्वारिंशद्योजनसहस्राणि दक्षिणस्यां दिश्यतिगत्य अष्टयोजनोच्छ्रायं चतुर्योजनविस्तारं प्रत्येकमेकैकक्रोशविस्तारया द्वारशाखया कलितं, ततः सामस्त्येन सार्द्धयोजनचतुष्टयविस्तारं वैडूर्यमयाभ्यां कपाटाभ्यां वज्रमय्या परिघया निर्जटितं, अनेकसामानिकसुरादिदेवाग्रमहिष्यादिदेवीकृत-सेवार्द्धपल्योपमायुर्वैजयंतदेवाधिष्ठितं वे(वै)जयंताभिधानं द्वारमस्ति । तथा अमुतो द्वारात् उदीच्यां हिमवंतं पूर्वापरयोस्तु लवणोदन्वंतं यावद्गतं भरतनामकं विजयक्षेत्रं तच्च बहुमध्यदेशभागे पूर्वापरयोर्लवणसमुद्रप्राप्तेन पंचाशद्योजनविस्तीर्णेन

तदर्द्धोच्चेन रजतमयेन वैताढ्यपर्वतेन द्विधा कृतं, तेन दक्षिणभरतार्द्धमुत्तरभरतार्द्धं चेति भण्यते । हिमवत्पर्वतोर्ध्वतलस्थितात् पद्महृदान्निर्गताभ्यां प्रथमं पूर्वापरयोर्गत्वा स्वस्वनामधेयकूटादावृत्य दक्षिणां दिशमनुश्रित्य विजयाढ्यपर्वतं विभिद्य दक्षिणलवणोदधिं प्रविष्टाभ्यां गंगासिंधुभ्यां तच्च कृतषट्खंडं, तत्र च प्राणिप्राणव्यपरोपणप्रवणांतःकरणम्लेच्छव्याप्तत्वादनार्याणि पंच खंडानि । एकं च वैताढ्यात् दक्षिणस्यां दिशि एकादशकलाधिकं चतुर्दशोत्तरं योजनशतमतिगत्य नवयोजनविस्तीर्णया द्वादशयोजनदीर्घया अयोध्यया नगर्या विराजितं, गंगासिंधुवैताढ्यदक्षिणसमुद्राणां मध्यस्थितं जिनचक्र्यर्द्धचक्रि-प्रमुखोत्तरपुरुषाध्यासितमार्यं । **उक्तं च** - आर्यावर्तो जन्मभूमिर्जिनचक्र्यर्द्धचक्रिणामिति । तथा वैताढ्यऽपाच्यां तमिस्त्रा गुहास्ति, सा च द्वादशयोजनायामा पंचाशद्योजनदैर्ध्या कृतकृतमालदेवनिवासा वेजयंतसमानद्वारा, तस्याश्च बहुमध्यदेशे द्वियोजनांतराले प्रत्येकं त्रियोजनविस्तारे उन्मग्नजलानिमग्नजले नद्यौ स्तः । एवं प्राच्यां नृत्तमालदेवाधिष्ठिता खंडप्रपातगुहा । तस्य च गिरेर्मूलाद्दशयोजनान्युत्प्लुत्य वेदिकावनखंडमंडितं पर्वतप्रमाणदैर्ध्यं प्रत्येकं दशदशयोजनविस्तारं विद्याधरनगरश्रेणिद्वयं विद्यते, किंच दक्षिणदिग्वर्त्तिन्यां श्रेणौ सुप्रजोभिर्जनपदैर्विराजितानि रथनूपुरचक्रवालपुरःसराणि पंचाशद्विद्याधरनगराणि, उत्तरश्रेणौ तु गगनवल्लभादीनि षष्टिः पुराणि, तेषु धरणेंद्रप्रकाशिताष्टाचत्वारिंशत्सहस्त्रमहाविद्याप्रसादोपनतप्रकम-

समस्तमनोरथातिथिपदार्थसमासादितपरमानंदसंदोहा, गगनगमनसामर्थ्यसमन्विता विद्याधराः सुखमासते । पुनर्दशयोजनान्युपरिष्टादारुह्य विद्याधरश्रेणिसमाऽविषमोन्नतभूमिरिंद्राभियोगिकदेवकृतनिवासा श्रेणिद्वयी समस्ति । ततोऽपि पंचसु योजनेषूपरि दशयोजनानि विस्तीर्णं, वेदिकावनखंडमनोहरं, अनल्पकल्पवासिदेवक्रीडायोग्यं स्थानमास्ते । तत्र सपादषट्योजनोच्छ्रयाणि तावन्मूलविस्ताराणि उपरिष्टात् सार्द्धद्वादशक्रोशायामानि नव कूटानि । तथाहि, [1]सिद्धायतन-[2]दक्षिणार्द्धभरत-[3]खंडप्रपात-[4]माणिभद्र-[5]विजयाढ्या-[6]पूर्णभद्र-[7]तमिस्त्रागुह-[8]उत्तरार्द्धभरत-[9]वैश्रमणनामानि, तेषु माणिभद्रविजयाढ्यपूर्णभद्रकूटानि हिरण्यमयानि, अपराणि षट् रत्नमयानि, प्रथमे पूर्वदिग्वर्त्तिनि (कूटे) क्रोशदैर्ध्यं क्रोशार्द्धविस्तीर्णं चत्वारिंशदर्गलचतुर्दशधनुःशतोच्छ्रयं सिद्धायतनं, तस्मिन् पंचधनुःशतोच्चानि तदर्द्धविस्ताराणि त्रीणि द्वाराणि तिसृषु दिक्षु । तद्यथा-प्राच्यां प्रथमं द्वारं, द्वितीयं दक्षिणस्यां, तृतीयमुदीच्यां, प्रतीच्यां तु न किंचिदिति । किंच-सर्वेषु सिद्धायतनेषु प्रासादेषु च जंबूद्वीपमध्येऽयमेव द्वारदिग्विभागः, तस्य हि बहुमध्यदेशे क्रोशचतुर्थांशायामविष्कंभा तदर्द्धपृथुला मणिपीठिका, तस्या उपरि पंचधनुःशतायामविस्तारः तदधिकोच्छ्रायो देवच्छंदकः, तत्राष्टोत्तरं शतं प्रतिमाः, ता हि जघन्यतः सप्तहस्तप्रमाणा उत्कर्षतः पंचधनुःशतोच्चा ऋषभवर्द्धमानचंद्राननवारिषेणाख्याः संति । पूर्णकलशनागदंतशालभंजिकाजालकटकादिरचना-

विशेषाः सर्वचैत्येषु ज्ञेयाः । ततः परं भरतार्द्धकूटं, तत्र भरतदेवस्य सिद्धायतनप्रमाणः प्रासादः, खंडप्रपाततमिस्रा-गुहयोर्नृत्तमालकृतमालौ देवौ, अन्येषु पंचसु स्वनामानो देवाः प्रासादेषु विलसंति । तथा- हिमवन्नितंबे दक्षिणदिशि मूले द्वादश योजनानि उपरि चत्वारि विस्तीर्णोऽष्टयोजनोच्छ्रय ऋषभदेवनिवासो रत्नमय ऋषभकूटनामा पर्वतोऽस्ति । स च 'भूमिकूट' इति इह प्रकरणे प्रसिद्धः, चक्री षट्खंडां वसुंधरां विजित्यास्मिन् स्वनाम लिखति ।

भरतमुत्तरेण पूर्वापरयोर्लवणसमुद्रं प्राप्तो भरताद् द्विगुणविस्तारो योजनशतोच्छ्रयो हेममयो हिमवान् वर्षधरः, तदुपरि बहुमध्यदेशमागे योजनसहस्त्रदैर्ध्यः तदर्द्धविस्तरो दशयोजनावगाढो जलपूर्णः पद्मह्रदः, तस्य रजतमयं कूलं, वज्रमयपाषाणाश्चतुर्दिशि मणिसोपानाः, तन्मध्ये योजनायामविस्तारं अर्द्धयोजनपिंडं दशयोजनोच्चनालं गव्यूतद्वयं जलादुपरि स्थितं पद्मं विद्यते, वज्रमयं तस्य मूलं, अरिष्टमयः कंदः, वैडूर्यमयो नालः बाह्यपत्राणि च, मध्यानि तु जांबूनदमयानि, कनकमयीकर्णिका, स्वर्णमयानि केसराणि, विविघमणिमयं पुष्करं, सा च कर्णिका द्विगव्यूतप्रमाणा पृथुला त्वेकं गव्यूतं, तस्या उपरि पीठिकादेवच्छंदकादियुतं श्रीदेवीभवनं, एतादृशेनार्द्धप्रमाणेन कमलानामष्टशतेन वृतं, तत्र श्रीदेव्या आभरणानि, तद्बाह्येषु वायव्यौदीच्यैशानेषु दिग्भागेषु चत्वारि कमलसहस्राणि ४०००, तेषु तावंत एव सामानिका देवा देव्यो वा । पूर्वस्यां

दिशि चतुर्षु पद्मेषु चतसृणां महामंत्रिसदृशीनां स्थानानि, आग्नेय्यामष्टसु पद्मसहस्रेषु श्रीदेव्या अभ्यंतरायां पर्षदि देवानामष्टौ सहस्राः ८०००, दक्षिणस्यां दिशि दशसु पद्मसहस्रेषु १०००० तावंत एव मध्यपर्षदि मित्रस्थानीया देवाः, नैर्ऋत्यां द्वादशसु पद्मसहस्रेषु १२००० तावंत एव किंकरस्थानीयाः सुराः बाह्यपर्षदि । पश्चिमायां सप्तसु पद्मेषु सप्तानामनीकाधिपतीनामाश्रयाः, तथा चतसृषु दिक्षु पूर्वादिकासु षोडशसु पद्मसहस्रेषु १६००० आत्मरक्षकदेवानां स्थानानि, एतद्वेष्टनकत्रयं मध्यं । अपरेऽपि बाह्याः त्रयः परिरयाः, तेष्वभ्यंतरे परिक्षेपे द्वात्रिंशल्लक्षाणि ३२०००००, मध्यमे चत्वारिंशच्छतसहस्राणि ४००००००, अष्टाचत्वारिंशल्लक्षाणि ४८००००० पद्मानां बाह्ये भवन्ति। एवं सर्वाग्रेण एका कोटी, विंशतिलक्षाणि, पञ्चाशत्सहस्राणि, विंशत्यधिकमेकं शतं च १२०५०१२० पद्महृदे पद्मानि । महापद्मादिष्वप्येषैव कमलानां संख्येति । तस्मात्तु हृदात् पूर्वद्वारतोरणात् पंचयोजनशतानि, पूर्वस्यां पर्वतोपरि गत्वा गंगावर्त्तकूटादावर्त्त्य दक्षिणाभिमुखं पंचयोजनशतानि त्रयोविंशानि साधिकाऽध्युष्टकलायुतानि अतिक्रम्य द्विगव्यूतदीर्घान्मकरमुखान्निःसृत्य गंगाप्रपातकुंडे निपतति । तच्च कुंडं षष्टियोजनायामविस्तारमुपरिष्टात्, अधस्तु दशयोजनन्यूनं दशयोजनावगाढं वज्रमयतलं त्रिद्वारतोरणसोपानादियुतं, तन्मध्ये गंगाद्वीपोऽष्टयोजनायामविष्कंभो गव्यूतद्वयं जलादुपरि गतः, तन्मध्ये भवनं, तत्र पीठिकायां गंगादेव्याः शय्येति । तदा

दक्षिणतोरणाद्विनिर्गत्य विजयाढ्यपर्वतं जगतीं च विभिद्य चतुर्दशनदीसहस्रपरीता जलधिं प्रविवेश गंगा । तस्या ह्रदाद् विनिर्गमे मकरमुखे कुंडात्प्रवाहे च सक्रोशानि षट् योजनानि विस्तारः क्रोशार्द्धमुद्वेधः मुखप्रस्तारः प्रवाहाद् दशगुणः । **उक्तं च**–"जो जीसे वित्थारो, सलिलाए होइ आढवंतीए। सो दसहिं पडिपुन्नो मुहवित्थारो मुणेयव्वो" ॥१॥ उद्वेधस्तु सर्वत्र प्रस्तारात्पंचाशत्तमो भागः । **यत उक्तं**–"जो जत्थ उ वित्थारो, सलिलाए होइ जंबुदीवंमि । पन्नासइमं भागं तस्सुव्वेहं वियाणाहि" ॥१॥ तथाऽस्या अपि द्वे तटे वेदिकावनखंडवती, न चैतद्यादृच्छिकं । **यदागमः**–"गंगाणं महानइ उभओ पासेहिं दोहि य पउमवरवेइयाहिं दोहि य वणसंडेहिं संपरिखित्ता" । एवं पश्चिमतोरणद्वारान्निर्गता सिंध्वावर्त्तकूटादावर्त्य विवृतमुखाकारात् नालान्निपत्य सिंधुदेवीनिवासं कुंडं मध्येकृत्य तथैव जलधिं गता सिंधुनदी । तथोत्तरतोरणाद्विनिर्गता गंगाद्विगुणमानपरिवारा स्वनामकुंडे निपत्य शब्दापातिनं गव्यूतद्वयेनास्पृशंती हैमवतं क्षेत्रं मध्येकृत्यापरोदधिं गता रोहितांशा। हिमवति सर्वरत्नमयान्येकादश कूटानि । तद्यथा–सिद्धायतन[१] क्षुल्लहिमवत्[२] भरत[३] इला[४] गंगा[५] श्री[६] रोहितांशा[७] सिंधु[८] सुरा (देवी)[९] हैमवत[१०] वैश्रमणाख्यानि[११] तेषां मूलविस्तार उच्चत्वं च पंचयोजनशतानि, शिखरविस्तारस्तु तदर्द्धमानः, प्रथमकूटे (क्षुल्लनाम्नि) सिद्धायतनं पंचाशद्योजनानि दीर्घं तदर्द्धं पृथुलं षट्त्रिंशद्योजनोच्छ्रयं, तस्मिन् त्रीणि द्वाराणि, तेषामायामोऽष्टौ योजनानि,

तदर्द्धं विष्कंभः, अष्टयोजनायामविष्कंभा तस्य मध्ये मणिपीठिका, सा च चत्वारि योजनानि पृथुला, तदुपरि देवच्छंकस्ततप्रमाणः आयामोच्छ्रयाभ्यां किंचिदधिकः । तत्र प्रतिमा यथा वैताढ्याद्यकूटे प्रोक्ताः । शेषेषु दशसु कूटेषु सार्द्धद्वाषष्टियोजनोच्छ्रयाः सक्रोशैकत्रिंशद्योजनविस्ताराः सिंहासनादियुताः प्रासादाः संति ।

हिमवन्महाहिमवतोरंतराले भरताच्चतुर्गुणविस्तारं पूर्वापरयोर्लवणसमुद्रं प्राप्तं स्वनामदेवाधिष्ठायकं दशविधकल्पपादप-प्रभावोपढौकिताभिलषिताहारनेपथ्याभरणशयनीयावासादिलालितवपुर्भिर्युगलिकैर्विराजितं हैमवतनामकं द्वितीयं क्षेत्रमस्ति । तत्र ते युगलधर्मिणश्चतुःषष्टिपृष्ठकरंडभ्राजितमेकगव्यूतोच्चं चतुर्थभक्तांते कृतमनोऽभिलषिताहारं रोगजरापमृत्युदुःखदौर्मनस्यादि-रहितमेकपल्योपमायुर्देहं दधानाः पर्यंते एकोनाशीतिदिनान्यपत्यानि पालयित्वा स्वस्य समस्थितिष्वल्पस्थितिषु वा देवेषूत्पद्यंते । अत्र च केचिदेतेषां चणकबदरामलकप्रमितमाहारमेकद्वित्रिगव्यूतप्रमाणशरीराणां क्रमेण, अपरे चाष्टादशव्यंजनाकुलां रसवतीं भोजनतयाभिदधति । तत्र सकर्णानां कर्णमवतंसयति, यतः शर्कराजित्वररसा पृथ्वी कल्पवृक्षाणां फलानि च तेषामाहारतयोपयुज्यंते । **आह चागमः**-"पुढवीपुष्फफलाहारा ते णं मणुआ पन्नत्ता।" तत्र च सिंहव्याघ्रसर्पबिडालादयो दुष्टतिर्यंचोऽपि क्षेत्रस्वाभाव्यान्मिथो हिंस्यहिंसकभाववर्जिताः प्रतनुकषायतयावतिष्ठंते । अतस्तद्भावभावितत्वादपि

देवगतिमेवाश्नुवते । दंशमशकयूकामत्कुणप्रमुखाः शरीरसंतापकारिणः क्षुद्रजंतवस्तु मूलतोऽपि न भवंति । कालस्तत्र सुषमदुषमारूप एक एव । तन्मध्ये पंचवर्णरत्नमयः सर्वतः सहस्रयोजनप्रमाणः पल्याकारः शब्दापाती वृत्तवैताढ्यपर्वतः, येऽमुं रजतमयमभिदधति, तेषां जंबूद्वीपप्रज्ञप्त्या सह विरोधः । तत्र **ह्येवमुक्तं**–"कहि णं भंते ! हेमवए वासे सद्दावईनामं वट्टवेयड्ढपव्वए पन्नत्ते ? गोयमा, रोहियाए महानईए पच्चच्छिमेणं रोहिअंसाए महानईए, पुरच्छिमेणं हेमवयवासस्स बहुमज्झदेसभागे इत्थ णं सद्दावई नामं वट्टवेयड्ढे पव्वए पन्नत्ते, एगं जोयणसहस्सं उड्ढं उच्चत्तेणं, अड्ढाइयाइं जोयणसयाइं उव्वेहेणं, सव्वत्थसमे, पल्लगसंठाणसंठिए, एगं जोयणसहस्सं आयामविक्खंभेणं तिन्नि जोयणसहस्साइं एगं च बावट्ठं जोयणसयं (३१६२) किंचि विसेसाहियं परिखेवेणं सव्वरयणामए अच्छे इत्यादि" । **उमास्वातिवाचकोऽप्येवमेवाह** तथा च तद्वाक्यं- "वृत्तो विविधरत्नमयः सर्वतः साहस्रः शब्दापातिगिरिरिति" अत एतद्वर्णके यत्क्षेत्रसमासे 'रययमया' इत्युक्तं, तन्न संवादीति, किंतु 'रयणमया' इति संवादी पाठ इति । तथा तदुपरि स्वाभिधानदेवभवनं हिमवत्कूटप्रासादसदृशं ।

तदुत्तरो हैमवतक्षेत्राद् द्विगुणविस्तारोऽर्जुनमयो योजनशतद्वयोच्चो महाहिमवान्, तत्र बहुमध्ये पद्महृदाद् द्विगुणायामविष्कंभो महापद्महृदः कृतह्रीदेवीनिवासः पद्मानि पद्महृदसंख्यासंनिभान्यत्र, एतद्दक्षिणतोरणान्निःसृत्य पंचकलाधिकानि पंचोत्तराणि

षोडशयोजनशतानि पर्वतमुल्लंघ्य रोहितादेव्यधिष्ठिते गंगाप्रपातकुंडाद् द्विगुणायामविष्कंभे दशयोजनोद्वेधे रोहिताप्रपातकुंडे निपत्य शब्दापातिनं चतुर्थांशेन परिधाय गव्यूतद्वयेनास्पृशंत्यष्टाविंशत्या नदीसहस्रैः समं रोहितांशासमविस्तारा रोहिता पूर्वोदधिं प्राविशत् । तथोत्तरद्वारान्निर्गत्य प्रवाहे पंचविंशतियोजनायामा मुखे तु दशगुणविस्तारा स्वनाम्नि कुंडे निपत्य एकयोजनास्पृष्टगंधापातिका प्रवाहे मुखे च क्रमेणार्द्धपंचयोजनोद्वेधा षट्पंचाशन्नदीसहस्रसहिता हरिकांता पश्चिमोदधिं गता । तस्मिन् पर्वतेऽष्टौ कूटानि, तद्यथा-सिद्धायतन[1]-महाहिमवत्[2]-हैमवत[3]-रोहिता[4]-ह्री[5]-हरिकांता[6]-हरिद्[7]-वैडूर्य[8]नामानि, हिमवत्कूटतुल्यानि स्वनामधेयदैवतानि ।

तस्मादुत्तरस्यां दिशि हरिवर्षं क्षेत्रं तत्र युगलिनः प्रागुक्तयुगलिकेभ्यो द्विगुणविशेषणाः केवलं कृतचतुःषष्टिदिनापत्यपालनाः षष्ठप्रांते विहिताहाराश्च, तस्य बहुमध्यदेशभागेऽरुणदेववसतिः शब्दापातिविशिष्टो गंधापाती । कालस्तु तत्र सुषमारूपः सदैव।

तदुत्तरो हरिवर्षक्षेत्राद् द्विगुणविस्तारश्चतुःशतयोजनोच्छ्रयस्तपनीयमयो निषधगिरिः, तदुपरि महापद्माद् द्विगुणायामविष्कंभो दशयोजनावगाढः पद्महृदविशिष्टपद्मपूर्णः कृतधृतिदेवीनिवासः तिगिंछिहृदः, तद्दक्षिणदिग्भागे सैककलानि सप्तसहस्राणि चत्वारि शतानि एकविंशानि योजनानां पर्वतमुल्लंघ्य स्वनामकुंडं मध्येकृत्य हरिकांतावत् केवलं पूर्वोदधिं गता हरित्सलिला ।

उत्तरेण शीतोदा निर्गता, तस्याः प्रवाहो जिह्विका च पंचाशद्योजनानि, हरिन्नदीकुंडाद् द्विगुणकुंडा, निषेध[१]-देवकुरु[२]-सूर्य[३]-सुलस[४]-विद्युत्प्रभ[५]हृदान् विभिद्य चतुरशीत्या नदीसहस्रैरन्विता, भद्रशालवनमध्यप्रवृत्ता, योजनद्वयांतरे मंदरमलगंती, अपरदिगभिमुखं विद्युत्प्रभविदारिकाऽपरविदेहं द्विधा विधाय एकैकस्माद्विजयादष्टाविंशतिनदीसहस्रानुगता, जयंतद्वारादधो जगतीं विदार्य पंचशतयोजनायामा, दशयोजनोद्वेधा, पश्चिमजलधिं (जलधिमधि) गता । तस्मिन् पर्वते नव कूटानि, तद्यथा-सिद्धायतन[१]-निषेध[२]-हरिवर्ष[३]-प्राग्विदेह[४]-हरित्[५]-धृति[६]-शीतोदा[७]-ऽपरविदेह[८]-रुचक[९]ाभिधानानि, हिमवत्कूटसदृशानि ।

निषधादुत्तरो वैडूर्यमयस्तिगिंछिप्रतिच्छंदः केशरिहृदमध्यो नीलवान् वर्षधरः, तत्र नव कूटानि तथाहि-सिद्धायतन[१]-नील[२]-प्राग्विदेह[३]-शीता[४]-कीर्त्ति[५]-नारी[६]-अपरविदेह[७]-रम्यक्[८]-उपदर्शन[९]कूटाख्यानि निषधकूटमानानि । ततः केसरिहृदाद् दक्षिणदिशि सैककलानि सप्तयोजनसहस्राणि चत्वारि शतान्येकविंशत्यधिकानि पर्वताधित्यकामुल्लंघ्य, स्वनामदैवतकुंडं मध्येकृत्य, नील[१]ोत्तरकुरु[२]-चंद्र[३]-ऐरवत[४]-माल्यवत्[५] हृदान् विभिद्य, भद्रशालसत्कचतुरशीतिनदी सहस्रपरीता, माल्यवद्विदेहविजयद्वारच्छेदिनी, पूर्वोदधिं गता शीता, शेषं शीतोदावत् ।

निषधनीलवदंतरा महाविदेहो लक्षयोजनानि तस्य मध्यदैर्घ्यं विष्कंभस्तु निषधाद् द्विगुणः ।

तन्मध्ये सहस्रयोजनावगाढो नवनवतियोजनसहस्रोच्चः भूमितले दशसहस्रविस्तारः उपरि सहस्रयोजनायामः रत्नमध्यः स्वर्णमयो मेरुगिरि। तदुपत्यकायां पूर्वापरयोर्द्वाविंशतियोजनसहस्रायामं उत्तरदक्षिणयोस्तु प्रत्येकं सार्द्धयोजनशतद्वयविस्तारं, नानावृक्षकलितं भद्रशालवनं । तन्मध्ये मेरुपर्वतात् पंचाशता योजनैर्हिमवत्सिद्धायतनप्रमाणानि चतुर्दिश्यानि चत्वारि सिद्धायतनानि । तावतैव विदिक्षु पंचाशत्पंचाशद्योजनायामास्तदर्द्धविष्कंभा दशदशयोजनावगाढाश्चतस्रश्चतस्रो वाप्यः । तन्नामापि यथा-पद्मा[१]-पद्मप्रभा[२]-कुमुदा[३]-कुमुदप्रभा[४], उत्पलगुल्मा[१]-नलिनी[२]-उत्पला[३]-उत्पलोज्ज्वला[४], भृंगा[१]-भृंगनिभा[२]-अंजना[३] कज्जलप्रभा[४], श्रीकांता[१]-श्रीमहिता[२]-श्रीचंद्रा[३]-श्रीनिलया[४]: पूर्वोत्तरक्रमादवगंतव्याः, तन्मध्ये प्रासादाः पंचशतयोजनोच्चास्तदर्द्धविस्ताराः सिंहासनरुचिराश्चत्वारः, तेषु दाक्षिणात्यौ सौधर्मेन्द्रस्य, औदीच्यौ त्वीशानेंद्रस्य । शीताशीतोदयोर्नद्योः कुलद्वयेऽपि द्वौ द्वौ कूटपर्वतौ दिग्गजनामानौ, तन्नामानि शीतानद्या उत्तरदिग्भागाद्दक्षिणावर्त्तनेन गण्यानि, तानि चेमानि-पद्मोत्तर[१]-नील[२]-सुहस्त[३]-अंजन[४]-कुमुद[५]-पलाश[६]-अवतंस[७]-रोचन[८](ना) इति एते कूटगिरयः स्वनामदेवाः । ततो मेरुमूलादुत्पत्य योजनानां पंचशत्या नंदनं वनं । तत्र दिक्षु चतसृष्वपि हिमवत्कूटसमानि चत्वारि सिद्धायतनानि, विदिक्षु प्राग्वत् प्रासादान्विताः पुष्करिण्यः, तथाहि-नंदोत्तरा[१]-नंदा[२]-सुनंदा[३]-नंदिवर्द्धना[४], नंदिषेणा[१]-अमोघा[२]-गोस्तूपा[३]-सुदर्शना[४], भद्रा[१] विशाला[२]-कुमुदा[३]-पुंडरीकिणी[४], विजया[१]-

वेजयंती[२]-जयंती[३]-अपराजिता[४] । अस्यां मेखलायामष्टौ दिक्कुमारीणां कूटानि, तथाहि-नंदन[१]-मंदर[२]-निषध[३]-हैमवत[४]-रजत[५]-रुचक[६]-सागरचित्र[७]-वज्रनामानि[८], । एतेष्वष्टौ दिक्कुमार्योऽवतिष्ठंते, ताश्चेमाः-मेघंकरा[१]-मेघवती[२]-सुमेघा[३]-मेघमालिनी[४]-सुवत्सा[५]-वत्समित्रा[६]-वारिषेणा[७]-बलाहकेति[८] । एता देव्यो जिनजन्मनि मेघवर्षं विदधति । तथेशानकोणे सहस्रयोजनोच्छ्रायविस्तारमुपरिष्टादर्द्धायामं बलकूटं स्वनामदैवतं, तच्च पंचयोजनशतानि नंदनवनाद्बहिर्निःसृतं। **उक्तं च**-
"नंदणवणरुंभेत्ता, पंचसए जोयणाइं नीसरिउं । आयामे पंचसए, रुंभेत्ता ठाइ बलकूडे" ॥१॥ ततो द्विषष्टिसहस्राणि पंचशताधिकानि योजनानामुपरिष्टादारुह्य सौमनसं वनं नंदनवनसदृशं, केवलं कूटानि तत्र न संति । वाप्यो यथा-सुमना[१]ः सौमनसा[२]-सौमनांता[३]-मनोरमा[४], उत्तरकुरु[१]-देवकुरु[२]-वीरसेना[३]-सरस्वती[४], विशाला[१]-माधभद्रा[२]-अभयसेना[३]-रोहिणी[४], भद्रोत्तरा[१]-भद्रा[२]-सुभद्रा[३]-भद्रवती[४] । शेषं तथैव । ततः षटत्रिंशत्सहस्राणि योजनानामुपरि गत्वा सौमनसविशिष्टं पंडकवनं, तद्विस्तारः सहस्रं योजनानि, बहुमध्यदेशभागे चूला चास्य, सा उपर्यधो द्वादशचतुर्योजनायामा चत्वारिंशद्योजनोच्चा वैडूर्यमयी, तस्या उपरि सिद्धायतनं विजयार्द्धसदृशं मध्येवनं, विदिक्षु षोडश पुष्करिण्यः, तद्यथा-पुंड्रा[१]-प्रभा[२]-सुरक्ता[३]-रक्तवती[४], क्षीररसा[१]-इक्षुरसा[२]-अमृतरसा[३]-वारुणी[४], शंखोत्तरा[१]-शंखा[२]-शंखावर्त्ता[३]-बलाहका[४], पुष्पोत्तरा[१]-पुष्पवती[२]-सुपुष्पा[३]-पुष्पमालिनी[४] । प्रासादाः

सिद्धायतनानि च प्राग्वत् । वनांते चतसृषु दिक्षु एकैका जिनाभिषेकशिला, तद्यथा–प्राच्यां पांडु[1]शिला, दक्षिणस्यामतिपांडु[2]शिला, अपाच्यां रक्त[3]शिला, उत्तरायामतिरक्ताशिला इति । ताश्च सर्वार्द्धचंद्रसंस्थानसंस्थिताः पंचयोजनशतायामास्तदर्द्धविस्तारा-श्चतुर्योजनोत्सेधाः अर्जुनकनकनिर्माणाः, तासु पांडुकंबलारक्तकंबलयोरुपरि द्वे सिंहासने, शेषयोस्त्वेकैकं, सिंहासनानां च सर्वेषामायामो विष्कंभश्च पंचधनुःशतानि, तदर्द्धं पृथुत्वं प्राच्यापाच्येषु विजयोद्भवा जिना अभिषिच्यंते । इतरयोस्तु भरतैरवतोत्पन्नाः तीर्थंकरा इति ।

तथा चतसृष्वपि मेरोर्विदिक्षु गजदंताकारवक्षस्कारनामानः पर्वताः संति । इदमुक्तं भवति–यथा गजस्य दंता मूले स्थूलास्ततः क्रमेण हीयमाना यावदंते सूक्ष्माः, एवमेतेऽपि, आदौ निषधनीलवंतौ निकषा चतुर्योजनशतोच्चाः पंचयोजनशतविस्ताराः, तत उच्चत्वे क्रमेण वर्द्धमाना विस्तारे तु हीयमानास्तुरगकंधराकृत्यो यावन्मेरु[4]समयाः । पंचयोजनशतान्युच्चा अंगुलासंख्येयभागविस्तारा भवंति । ते चामी–आग्नेय्यां रजतमयः सप्तकूटपरिष्कृतः सौमनसः १. नैर्ऋत्यां तपनीयमयो नवकूटान्वितो विद्युत्प्रभः । २.वायव्यां हिरण्यमयः सप्तकूटो गंधमादनः । ३. ऐशान्यां वैडूर्यमयो नवकूटांकितो माल्यवान् । ४. प्रत्येकमेतेषां त्रिंशद्योजनसहस्राणि नवोत्तरं शतद्वयं कलाषट्कं चायामः, सर्वेषु प्रथमे प्रथमे

कूटे सिद्धायतनं, कूटानि चामूनि हिमवत्कूटप्रमाणानि, एतेषां नामानि मेरुदिग्विभागाद् गणनीयानि, तथाहि-सौमनसे वक्षस्कारगिरौ सिद्धायतन[१]-सौमनस[२]-मंगलापाति[३]-देवकुरु[४]-विमल[५]-कांचन[६]-वशिष्टानि[७], पंचमषष्ठयोस्तोयधाराविचित्रदेवते । तथा विद्युत्प्रभे सिद्धायतन[१]-विद्युत्प्रभ[२]-देवकुरु[३]-पद्म[४]-कनक[५]-स्वस्तिक[६]-शीतोदा[७]-सदाजल[८]-हरिनामानि[९], कनकस्वस्तिककूटयोः पुष्पमालाअनिंदितदेवते । तथा गंधमादने सिद्ध[१]-गंधमादन[२]-गंधलावत्[३]-उत्तरकुरु[४]-स्फाटिक[५]-लोहित[६]-आनंदानि[७] । पंचमषष्ठयोर्भोगंकराभोगवत्यौ देव्यौ । तथा मालवति-सिद्ध[१]-माल्यवत्[२]- उत्तरकुरु[३]-कच्छ[४]-सागर[५]-रजत[६]-शीता[७]-पूर्णभद्र[८]-हरित्सहानि[९], सागररजतयोस्सुभोगाभोगमालिन्यौ देव्यौ । शेषाणि स्वनामतुल्यदैवतानि । एतेषु हरिस्सहहरिकूटे सहस्रयोजनोच्छ्रायायामे उपरिष्टात्तु पंचयोजनशतविस्तारे, शेषाणि प्राक्कथितप्रमाणानि ।

मंदरगंधमादननीलवन्माल्यवतां मध्ये उत्तरकुरुक्षेत्रं, तच्चैकादशयोजनसहस्राणि द्विचत्वारिंशान्यष्टौ शतानि च कलाद्वयाधिकानि विस्तीर्णं, तत्र मिथुनधर्माणो युगलिनस्त्रिगव्यूतोच्चा अष्टमभक्तावसानकृताहारास्त्रिपल्यपरमायुषः षडधिकार्द्धतृतीयशतपृष्टकरंडकाङ्कितततनवः सुषमसुषमाकालमनुभवंतः कल्पद्रुफलसंतुष्टा एकोनपंचाशद्दिनान्यपत्यानि पर्यंते प्रतिपाल्य सुखमृत्यवो देवेषूत्पद्यंते ।

अथ शीतायाः प्राच्यामपाच्यां च नीलवतस्तु याम्यायामष्टौ शतानि चतुस्त्रिशानि यादृशैः सप्तभिर्योजनं भवति तादृशांश्चतुरो भागांश्चातिक्रम्य द्वौ यमकपर्वतौ, तयोर्मूलविस्तार उच्चत्वं च सहस्रं योजनानि, उपरि तदर्द्धविस्तारः, तयोरुपरि कनकमयौ प्रासादौ, हिमवद्वत् तावति च । दक्षिणदिशि नीलाद्या ह्रदाः । **उक्तं च**-"जावइयंमि पमाणंमि हुंति जमगा नीलवंताओ । तावइयमंतरं खलु, जमगदहाणं दहाणं च" ॥१॥ ते च उदग्दक्षिणयोर्दीर्घाः पूर्वापरयोस्तु विस्तीर्णाः पद्मह्रदप्रमाणाः स्वनामदेवनिवासाः, तेषां प्रागपरयोर्दिशोरेकैकस्य दश दश कांचनगिरयः स्वनामदेववसतयः, तेषां उच्चत्वं मूलविस्तारश्च शतं शतं योजनानि, उपरि तु पंचाशद्योजनानि, परस्परं शिखरव्यवधानं शतं शतं योजनानां, मूले तु नास्त्यंतरं ।

तथा शीतायाः प्राच्यां पंचशतयोजनायामविस्तारं अभ्यंतरे द्वादशयोजनपृथुलं क्रमेण हीयमानं यावदंतेऽर्द्धयोजनमानं जंबूनदमयं जंबूपीठमस्ति, तच्च द्विगव्यूतोच्चया पंचधनुःशतविस्तीर्णया पद्मवरवेदिकया परिक्षिप्तं, तस्य चतसृष्वपि दिक्षु द्विक्रोशोच्छ्रयाणि तदर्द्धविस्ताराणि ध्वजतोरणवंदनमालाविभासितानि चत्वारि द्वाराणि । तथा च बहुमध्ये चतुर्योजनोच्छ्रया अष्टयोजनायामा मणिपीठिका, तस्या उपरिष्टाद् जंबूवृक्षः, स चाष्टयोजनविष्कंभोच्छ्रयः वज्रमयमूलः, तस्यावगाहः स्कंधश्च द्वे योजने, षड्योजनदैर्घ्याः अष्टयोजनदैर्घ्याः शाखाः ताश्च सौवर्णाः, स्कंधः पत्राणि च वैडूर्यमयानि, प्रवालमयाः पल्लवाः,

रत्नमयानि फलानि । प्राच्ये शाले भवनं, तत्र मणिपीठिकायामनादृतदेवस्थानं, शेषेषु प्रासादाः, मध्ये सिद्धायतनं, सर्वाणि विजयार्द्धप्रमाणानि, तत्परिवेष्टनेऽष्टोत्तरं शतं जंबूनां, परिवारजंबूसंख्या पद्मह्रदवत्, एतदधिपतिरनादृतो देवः, ततः पंचाशतं योजनान्यतिगम्य प्रथमवनखंडे चतसृषु दिक्षु भवनानि, विदिक्षु चतसृणां पुष्करिणीनां मध्ये प्रासादाः, भवनप्रासादमध्येऽष्टौ कूटानि ऋषभकूटप्रमाणानि जांबूनदानि, तेषु सिद्धायतनानि शालिवनपूर्वोत्तरादिप्रासादेषु सिंहासनानि ।

मंदराद्दक्षिणे देवकुरुः, निषधोत्तरौ चित्रविचित्रौ यमकवत्, ह्रदास्तु निषधादयः, तदपरार्द्धे गरुडावासः शाल्मलितरुः जंब्वा सदृशवर्णकः।

प्रागपरयोर्द्वात्रिंशद्विजयाः । तथाहि–प्राग्विदेहः शीतया अपरविदेहस्तु शीतोदया द्विधाकृतः, पुनरेकैको विभागश्चतुर्भिर्वक्षस्कारैः तिसृभिस्तिसृभिश्चांतर्नदीभिरंतरा निपत्याष्टधा कृतः, ततोऽष्टभिश्चत्वारो गुणिता जाता यथोक्तसंख्या विजयाः, तथा दाक्षिणात्या गंगासिंधुभ्यां नदीभ्यां, औदीच्यास्तु रक्तारक्तोदाभ्यां विभज्य त्रिधा कृताः । पुनः प्रतिविजयं वैताढ्येन निपत्य षट् खंडानि कृतानि । **उक्तं च** "विजयं पडिवेयड्ढो, गंगासिंधुसमादुदुन्नि नई । तेहिं कया छखंडा, विदेह बत्तीस विजयाणं" ॥१॥ तत्रैकस्य विजयस्यायामः षोडशयोजनसहस्राणि द्विचत्वारिंशान्यष्टौ शतानि कलाद्वयाधिकानि, तया विस्तारो द्वाविंशतिशतानि

त्रयोदशोत्तराण्यर्द्धगव्यूतानि निषधनीलवतोर्नितंबे प्रतिविजयमेकैकमृषभकूटं, शीताशीतोदयोर्गंगासिंधुसंगमे क्रमेण मागधप्रभासौ तीर्थे, वरदामतीर्थे तु तयोर्बहुमध्यदेशभागे इति । इह भद्रशालमुखवनयोर्मध्ये चत्वारो वक्षस्कारास्तदंतरे तिस्रो नद्यः, तासामंतरालेऽष्टौ विजयाः, सर्वेऽपि चतुर्भिर्गुणिता जातान्यष्टौ वनानि, षोडश वक्षस्काराः, द्वादशांतर्नद्यः, द्वात्रिंशद्विजयाः । प्रतिविजयं च द्वे द्वे महानद्यौ, निषधसविधवर्त्तिकुंडाद्विनिर्गते गंगासिंधुनाम्न्यौ, केवलमौदीच्येषु षोडशसु विजयेषु माल्य (नील)वदुपकंठस्थितकुंडात् निःसृते नामतो रक्तारक्तवत्यौ सरितौ विद्येते । तत्र वक्षस्काराणां नामानि यथा-चित्र[१]-पद्म[२]-नलिन[३]-एकशैलाः[४], त्रिकूट[१]-वैश्रमण[२]-सुदर्शन[३]-अंजनाः[४], अंकवत्[१]-पद्मवत्[२]-आशीविष[३]-सुखावहाः[४], चंद्र[१]-सूर्य[२]-नाग[३]-देवगिरयः[४] इति । प्रतिवक्षस्कारं चत्वारि चत्वारि कूटानि सिद्धायतन[१]-स्वनाम[२]-पूर्वविजय[३]-अपरविजयाख्यानि[४] । तथांतर्नद्यः कुंडनिर्गमाः कुंडमध्यद्वीपाः स्वनामदेवीवसतयः शीताशीतोदानुगामिन्यः प्रत्येकं पंचविंशत्यधिकशतयोजनविस्तारा दशगव्यूतावगाहाः, ताश्च द्वादश नामतो यथा-ग्राहवती[१]-ह्रदवती[२]-वेगवती[३], तप्तजला[१]-मत्तजला[२]-उन्मत्तजलाः[३], क्षीरोदा[१]-सिंहस्रोतोऽ[२]तर्वाहिन्यः[३], ऊर्मिमालिनी[१]-गंभीरमालिनी[२]-फेनमालिन्य[३] इति । विजया यथा कच्छ[१]-सुकच्छ[२]-महाकच्छ[३]-कच्छवत्[४]-आवर्त्त[५]-मंगलावर्त्त[६] पुष्कर[७]-पुष्करवंतः[८], वच्छ[१]-सुवच्छ[२]-महावच्छ[३]-वच्छवत्[४]-रम्य[५]-रम्यक[६]-रमणीय[७]-मंगलवंतः[८], पद्म[१]-सुपद्म[२]-महापद्म[३]-पद्मवत्[४]-

शंख[5]-कुमुद[6]-नलिन[7]-सलिलवंतः[8], वप्र[1]-सुवप्र[2]-महावप्र[3]-वप्रवंत्[4]-वल्गु[5]-सुवल्गु[6]-गंधिल[7]-गंधिलवंतः[8], गिरिभिर्नदीभिश्च विभक्ताः। प्रतिविजयं चैकैका नगरी, तद्यथा-क्षेमा[1]-क्षेमपुरी[2]-अरिष्टा[3]-अरिष्टवती[4]-खड्गी[5]-मंजूषा[6]-औषधी[7]-पुंडरीकिण्यः[8], सुसीमा[1]-कुंडला[2]-अपराजिता[3]-प्रभाकरी[4]-अंकवती[5]-पद्मावती[6]-शुभा[7]-रत्नसंचयाः[8], अश्वपुरी[1]-सिंहपुरी[2]-महापुरी[3]-विजयपुरी[4]-राज्या[5]-विराज्या[6]-अशोका[7]-वीतशोकाः[8], विजया[1]-वैजयंती[2]-जयंती[3]-अपराजिता[4]-चक्रपुरी[5]-खड्गपुरी[6]-अवध्या[7]-अयोध्याः[8], एताः सर्वाः पूर्यो भरतायोध्याप्रतिकृतयः इति । इह वक्षस्कारांतर्नदीविजयपुरीणां सर्वेषां गणनाक्रमो माल्यवद्वक्षस्कारादवगंतव्यः । तथा विजयादीनां वैताढ्येषु प्रत्येकं पार्श्वद्वयेऽपि पंचपंचाशत्पंचपंचाशन्नगराणि संति । यतो नितंबद्वयमपि समानदैर्घ्यं, भरतैरावतयोस्तु धनुष्पृष्ठाकारत्वान्मध्यबाह्ययोः पार्श्वयोर्महदंतरमतः तत्रैकस्यां दिशि पंचाशदन्यस्यां तु षष्टिः सजनपदानि पुराणीति ।

नीलवतः परतो रम्यकं क्षेत्रं हरिवर्षवत् केवलं, नाम्ना माल्यवानिह वृत्तवैताढ्यः,

ततः परो महाहिमवत्प्रतिच्छायो रुक्मी शैलः, तदुपरि बुद्धिदेवीनिवासो महापद्मप्रतिरूपो महापुंडरीको ह्रदः, कूटानि अष्टावत्र तानि चामूनि सिद्ध[1]-रुक्म[2]-रम्यक[3]-नरकांत[4]-बुद्धि[5]-रौप्य[6]-हैरण्यवंत[7]-मणिकांचन[8]नामानि । तत्र दक्षिणानरकांतापूर्वगा-हरिकांतावत् रूप्यकूलोत्तराऽपरदिग्गामिनी रोहितावत् ।

तदनंतरं हैमण्यवतक्षेत्रं हैरवतप्रख्यं, नवरं तन्मध्ये नामतो विकटापाती वृत्तवैताढ्यः प्रभासदेवाधिवासः, किं च सर्वेऽपि वृत्तवैताढ्या एकप्रमाणवर्णाः

तदुत्तरः स्वर्णमयः शिखरिवर्षधरः लक्ष्मीनिवासः पद्मविशिष्टः पुंडरीको ह्रदस्तत्र, तस्माद् दक्षिणां दिशमाश्रित्य रोहितांशासदृशी सुवर्णकूला, रक्तारक्तवत्यौ तूत्तरगे गंगासिंधू इव प्रमाणतः । तदुपरिष्टाच्चैकादशकूटानि, तद्यथा-सिद्धायतन[1]-शिखरि[2]-हैरण्यवत[3]-सुरादेवी[4]-रक्ता[5]-लक्ष्मी[6]-सुवर्णा[7]-रक्तोदा[8]-गंधापाति[9]-ऐरवत[10]-तिगिंछिसंज्ञा[11]नि हिमवतकूटसदृशि, सर्वक्षेत्राणामुत्तरदिग्व्यवस्थितं भरतप्रतिकलमैरवतं, वैताढ्यस्तु व्यत्ययनगरसंख्य इति । तथाऽस्माज्जंबूद्वीपादसंख्येषु द्वीपसमुद्रेष्वतिक्रांतेषु कश्चिद् जंबूद्वीपाभिधानो द्वीपोऽस्ति, तस्मिन् सर्वे विजयादिद्वारवर्षधरपर्वतकूटनदीद्रहवृक्षविजयाद्यधिष्ठातृणां देवानां राजधान्यः संति । **उक्तं च जंबूद्वीपप्रज्ञप्तौ** "रायहाणीओ जंबूदीवे मंदरस्स पव्वयस्स दाहिणेणं तिरियं असंखिज्जे दीवसमुद्दे वीइवइत्ता अन्नंमि जंबूद्दीवे बारसजोयणसहस्साइं उगाहेत्ता इत्थ णं रायहाणीओ भाणियव्वाओ ।" तासां विशेषवर्णनं क्षेत्रसमासबृहद्वृत्तेरवसेयमिति समस्तप्रकरणसमुदायार्थः । अथ पुनरक्षरार्थो भणिष्यते, तत्र व्याख्यायमानक्रमागतं चतुर्थं पर्वतद्वारमाह –

**वियड्ड चउ चउरतीस वट्टियरे ।**
**सोलस वक्खारगिरी, दो चित्तविचित्त दो जमगा ॥११॥**
**दोसय कणयगिरीणं, चउ गयदंता य तह सुमेरू य ।**
**छ वासहरा पिंडे, एगुणसत्तरी सया दुन्नि ॥१२॥**

एषां क्षेत्राणां द्वात्रिंशतो विजयानां च मध्यवर्त्तिनो वैताढ्याः, ते च क्रमेण चत्वारश्चतुस्त्रिंशच्च वृत्ता वर्त्तुलाकारा इतरे तद्विपरीता दीर्घा इत्यर्थः, इदमुक्तं भवति- चत्वारो वृत्तवैताढ्यास्तेषां स्थानं प्रमाणं च प्रागेवोक्तं क्षेत्रसमासानुसारेण, सिद्धांतस्त्वनाद्यानां त्रयाणां स्थानकथनेन व्यवस्थितः, तथाहि-शब्दापाती, तद्वद् हरिवर्षे विकटापाती, रम्यके गंधापाती, हैरण्यवते माल्यवानिति । **तथा च तद्ग्रंथः**–"कहि णं भंते ! हरिवासे वियडावई नामं वट्टवेयड्ढे पन्नते, गोयमा, हरिसलिलाए महानईए पच्चच्छिमेणं हरिकंताए महानईए पुरिच्छीमेणं, हरिवासस्स बहुमज्झदेसभागे, इत्थ णं वियडावई णामं वट्टवेयड्ढे पन्नते, तथा कहि णं भंते ! रम्मएवासे गंधावई नामं वट्टवेयड्ढे पन्नते, गो. नरकंताए पच्चच्छिमेणं, नारीकंताए पुरिच्छीमेणं, रम्मयवासस्स बहुमज्झदेसभागे गंधावई नामं वट्टवेयड्ढे पन्नते तथा कहि णं भंते ! एरण्णवए वासे मालवंतपरियाए

नामं वट्टवेयड्ढे पन्नत्ते" इति, तत्त्वं पुनः केवलिनो विदंति । दीर्घवैताढ्यास्तु द्वात्रिंशत् विदेहेषु प्रतिविजयमेकैकस्य भावात्, द्वौ च भरतैरावतयोः, सर्वमीलने चतुस्त्रिंशत्, वक्षस्कारगिरयः षोडश चित्रादयो ये विजयच्छेदिनः, तथा द्वाविति द्विसंख्यौ, कावित्याह–'चित्तविचित्तेति' प्राकृतशैल्या विभक्तिलोपः । ततः चित्रश्च विचित्रश्च चित्रविचित्रौ, एतयोर्हि निषधमुत्तरेण शीतोदाया अपरस्यां चित्रगिरिः प्राच्यां तु विचित्रः, तथान्यौ द्वौ यमकौ नीलवतो दक्षिणतः शीतायाः प्रागपरस्थितौ, एतेषां चतुर्णां समुदितानामपि 'यमका' इति क्वचित्संज्ञा दृश्यते । कनकगिरयः कांचनगिरयः तेषां द्वे शते शतद्वयं, तद्यथा–कुरुषु समुदिता नीलवदादयो दश ह्रदाः, एकैकस्य ह्रदस्य वामतो दक्षिणतश्च प्रत्येकं दश दश कनकनगाः ततः पार्श्वद्वयेऽपि विंशतिः विंशतिः सर्वमीलने जातं शतद्वयं, तथा गजदंताकारत्वात् गजदंता विद्युत्प्रभादयश्चत्वारः, ते हि मेरोर्विदिक्षु स्थिताः, तथेति सादृश्योपन्यासार्थः, चः समुच्चये, सुष्ठु मनोहरः सुवर्णरत्नमयत्वात्, मेरुर्मंदरः, वर्षधरा हिमवदादयः षट् । सर्वसंख्यामाह–'पिंडेत्यादि' पिंडे सर्वसमूहे एकोनसप्तत्यधिके द्वे शते भवत इति शेषः ॥१२॥ उक्तं पर्वतद्वारमधुना कियत्सु पर्वतेषु कियंति कूटानि भवंति ? इति पंचमद्वारमाह –

**सोलसवक्खारेसु, चउचउकूडा य होंति पत्तेयं ।**
**सोमणस गंधमायण सत्तट्ठ य रुप्पिमहहिमवे ॥१३॥**

**सोलसेत्ति**-षोडशसु चित्रादिषु वक्षस्कारनगेषु चत्वारि चत्वारि कूटानि पर्वतस्योपरिष्टादुच्चैर्गतानि शृंगाणि, 'कूटानीति सामयिकी संज्ञा । तथा सौमनसगंधमादनयोः सप्त सप्त, इह विभक्तिलोपो वीप्सा तूत्तरत्रापि प्राकृतशैल्या विज्ञेया । चः पुनरर्थे । रुक्मिमहाहिमवतोर्वर्षधरयोरष्टावष्टौ, एकमेकं प्रति प्रत्येकं, ततः प्रत्येकं कूटानि भवंतीति सर्वत्र योज्यं ॥१३॥

**चउतीस वियड्ढेसु, विज्जुप्पहनिसढनीलवंतेसु ।**

**तह मालवंतसुरगिरि, नव नव कूडाइं पत्तेयं ॥१४॥**

**चउतिसेत्ति**-चतुस्त्रिंशति वैताढ्येषु विजयभरतैरवतविच्छेदकेषु दीर्घवैताढ्येषु, तथा विद्युत्प्रभश्च निषधश्च नीलवांश्च ते तथोक्ताः तेषु, तथेति सादृश्ये, माल्यवांश्च सुरगिरिश्च माल्यवत्सुरगिरी, तयोस्तथोक्तयोः प्राकृतशैल्या विभक्तिलोपः, एतेषु प्रत्येकमेकोनचत्वारिंशति पर्वतेषु नव नव कूटानि भवंति ॥१४॥ तथा-

**हिमसिहरिसु इक्कारस, इय इगसट्ठी गिरिसु कूडाणं ।**

**एगत्ते सव्वधणं, सय चउरो सत्तसट्ठी य ॥१५॥**

**हिमेत्ति**-हिमेति पदैकदेशेऽपि पदसमुदायोपचारात् हिमवान्, यथा भीमो भीमसेनः दृष्टश्च, हिमवांश्च शिखरी च

हिमवच्छिखरिणौ तयोस्तथोक्तयो:, इह प्राकृतत्वात्सूत्रे बहुवचनं । **यत उक्तं**-"दुव्वयणे बहुवयणमिति" । प्रत्येकमेकादशैकादश कूटानि भवंति । समस्तकूटगिरीणां कूटानां च सर्वाग्रमाह-"इय इगसट्ठीत्यादि" । इति वक्ष्यमाणप्रकारेण एकेनार्गला षष्टिरेकषष्टि: तस्यामेकषष्टौ गिरिषु आधारभूतेषु पर्वतेषु एकत्वे सर्वांके सर्वधनं निखिलसमुदाय: सप्तषष्ट्यर्गलानि चत्वारि शतानि ४६७ कूटानां भवंतीति शेष: ॥१५॥ अथ सर्वकूटसंख्यानयनाय करणमाह –

**चउसत्तअट्ठनवगेगारसकूडेहिं गुणह जहसंखं ।**

**सोलसदुदुगुणयालं, दुवे य सगसट्ठि सय चउरो ॥१६॥**

**चउसत्तेति**-चतु:सप्ताष्टनवकैकादशभि: कूटै: यथाक्रमं यथोपन्यासमिति यावत् गुणयत गुणकारप्रवृत्तान् कुरुत, हे गणितज्ञा इति गम्यते । कानित्याह- 'सोलसेत्यादि' षोडश द्वौ द्वौ एकोनचत्वारिंशतं द्वौ चेति, तद्यथा- षोडशानां चतुर्भिर्गुणने चतु:षष्टिं, द्वयोस्तु सप्तभिर्गुणने चतुर्दश, तथा द्वयोरेवाष्टभिर्हनने षोडश, एकोनचत्वारिंशतो नवभिरभ्यासे सैकपंचाशानि त्रीणि शतानि, द्वयो: पुनरेकादशानां गुणकारे जाता द्वाविंशतिरिति । एतावता सर्वांकेन का संख्या भवतीत्याह-'सगसट्ठे' त्यादि, सप्तषष्ठ्यधिकानि चत्वारि शतानि कूटानां भवंतीति गाथार्थ: ॥१६॥ इदानीं गिरिशिर:स्थितानि कूटान्यभिधाय भूमिस्थकूटसंख्यानमाह –

**चउतीसुं विजयेसु, उसहकूडा अट्ठ मेरू जंबुमि ।**
**अट्ठ य देवकुराए, हरिकूडहरिस्सहे सट्ठी ॥१७॥**

**चउतीसुं** इति-ऋषभकूटानि प्रागुक्तस्थानानि विजयेषु जिनाद्युत्तमपुरुषोत्पत्तिक्षेत्रेषु चतुस्त्रिंशत् भवंति । तथा मेरौ मंदरगिरौ जंब्वामनादृतदेवनिवासवृक्षे प्रत्येकमष्टावष्टौ, चः समुच्चये, देवकुराविति, तदाधेये शाल्मलिवृक्षेऽष्टावष्टसंख्यानि तथाहि-मेरुकूटानि शीताशीतोदोभयकूलवर्त्तीनि दिग्गजनामानि, उत्तरकूरौ जंबूवृक्षसत्कवनमध्ये प्राक् प्रपंचितान्यष्टौ कूटानि, एवमेव देवकुरौ शाल्मलिवनमध्येऽष्टावेव, हरिकूटहरिस्सहकूटे विद्युत्प्रभमाल्यवतोर्वक्षस्कारयोरुपरिस्थिते, सामस्त्येन किं जातमित्याह-'सट्ठीति' षष्टिस्तिस्त्रो विंशतय इति गाथार्थः ॥ इह यत् हरिकूटहरिस्सहौ भूमिस्थकूटानां मध्ये निबद्धौ तन्न घटते, तयोर्वक्षस्कारयोरुपरिभावात्, **तदुक्तं**-"विज्जुप्पहे हरिकूडो हरिस्सहो मालवंतवक्खारे" इति । तथैतादृशाभिधानं भूमिकूटमपरं जंबूद्वीपमध्ये न दृश्यते, बृहत्क्षेत्रसमासाद्यनुसारतः, ये तु वक्षस्कारशिरःस्थे हरिकूटहरिस्सहकूटे, ते गिरिकूटप्रस्तावे सप्तषष्ट्यधिकचतुःशतकूटमध्ये पठिते, तत "इय अडवन्नं धरणिकूटो" इति पाठो युक्तः, एतदर्थमाह, इत्युक्तप्रकारेण धरणिस्थानि कूटानि धरणिकूटानि अष्टापंचाशद् भवंति । तथा च यद्यपि भूमिस्थिताः शिलोच्चयाः सर्वेऽपि पर्वता भण्यंते, तथाप्येषां क्षेत्रसमासादिषु कूटानीति

संज्ञा । इयं गाथा पुराणपुस्तकेषु न दृश्यते परमुपयोगिनीति कृत्वा व्याकृतेति । गतं पंचमं पर्वतद्वारं ॥१७॥ अधुना षष्टं तीर्थसंख्याद्वारमाह –

**मागहवरदामपभासतित्थ विजएसु एरवयभरहे ।**
**चउतीसा तीहिं गुणिया, दुरुत्तरसयं तु तित्थाणं ॥१८॥**

**मागहत्ति**–मागधश्च वरदाम च प्रभासश्च मागधवरदामप्रभासाः त एव तीर्थानि मागधवरदामप्रभासतीर्थानि, प्राकृतशैल्या सूत्रे विभक्तिलोपः, तथा तीर्थशब्दः प्रत्येकं संबंधनीयः, तेन मागधतीर्थं[१] वरदामतीर्थं[२] प्रभासतीर्थं[३] चेति, क्व चैतानि संति? इत्याह–विजया महाविदेहमध्यवर्तिनः खंडविशेषाः, ते च सर्वसंख्यया द्वात्रिंशत् तेषु, तथा ऐरवतं च भरतं चेति समाहारद्वंद्वः, तस्मिन्नैरवतभरते, श्रोतारमनुलक्ष्य चरणे प्रथमे च क्षेत्रे संतीति शेषः । उत्तरार्द्धेन सर्वसंख्यानयनाय करणमाह–'चउतीसे' त्यादिः, तीर्थानां सर्वाग्रे द्वाभ्यामुत्तरमधिकं शतं दश दशकलक्षणं द्व्युत्तरशतं, तुः पादपूरणे भवतीत्यध्याह्रियते । कथमित्याह–चतुर्भिरधिका त्रिंशत्, त्रिभिर्गुणिता गुणकारविषयीकृता सतीति गाथार्थः ॥१८॥ अथ सप्तमं श्रेणिद्वारमाचिख्यासुराह–

**विज्जाहर अभिओगिय, सेढीओ दुन्नि दुन्नि वेयड्ढे ।**
**इय चउगुण चउतीसा, छत्तीससयं तु सेढीणं ॥१९॥**

**विज्जहरेत्ति**-विद्याधराः खेचराः अभियोगः पारवश्यं तत्र नियुक्ता आभियौगिकाः ते चेह संप्रदायात् सौधर्मेशानयोर्देवलोकयोः प्रेष्यप्रायाः सुरा ज्ञेयाः तेषां श्रेणयः प्रागुक्तस्वरूपाः वैताढ्ये विजयाढ्यपर्वते एकैकस्मिन्निति गम्यते, द्वे द्वे प्रत्येकं ज्ञातव्ये इति शेषः । तथाहि-एकैकस्मिन् वैताढ्ये एकस्यामेकस्यां दिशि एकैका विद्याधरश्रेणिः, एकैका चाभियौगिकदेवनिवासश्रेणिः समुदिता, पार्श्वद्वयेऽपि चतस्रश्चतस्रो भवंति । अपरार्द्धेन संख्यानयनाय करणमाह-'इयेत्यादि' इत्यनेन प्रकारेण चतुस्त्रिंशत् चतुर्गुणा चतुर्भिर्गुणिता किं भवति ? इत्याह-श्रेणीनां षट्त्रिंशदधिकं शतं भवति । गतं श्रेणिद्वारं ॥१९॥ अधुना गाथार्द्धेनाष्टमं विजयद्वारमाह-



**चक्की जेयव्वाइं, विजयाइं इत्थ हुंति चउतीसं ।**



**चक्कीत्ति**-इत्थेत्यत्र जंबूद्वीपेऽस्मिन् प्रकरणे वा विजयाश्चतुस्त्रिंशद् भवंति । किंविशिष्टाः ? इत्याह-चक्कीत्यादि, चक्रं सहस्रयक्षाधिष्ठितः प्रहरणविशेषः, तदस्त्यस्येति चक्री सार्वभौमः, यः षट्खंडां भुवं भुनक्तीत्यर्थः तेन जेतव्या वशमानेतव्या इति।

तथा चतुस्त्रिंशदिति वदता सूत्रकारेण भरतैरवते क्षेत्रे अपि विजयत्वेनारोपिते, उत्तमपुरुषनिषेवितत्वात्, न चैतदनागमिकं, **यदुक्तं समवायांगे** "जंबूद्दीवे णं दीवे चउतीसं चक्कवट्टिविजया पन्नत्ता, तं जहा बत्तीसं महाविदेहे भरहेरवईत्ति"। इह सूत्रे सविशेषणस्य विजयशब्दस्य नपुंसकत्वं प्राकृतत्वान्न दोषायेति ॥ अथ नवमं ह्रदद्वारं गाथापाश्चात्यार्द्धेनाह-

**महदह छ प्पउमाई, कुरुसु दसगंति सोलसगं ॥२०॥**

**महदहेत्ति**-पद्मो हिमवद्गिरिशिरःस्थ आदिर्येषां ते पद्मादयः, छेति षट्संख्याकाः, आदिग्रहणान्महापद्मतिगिंछिकेसरि-महापुंडरीकपुंडरीकाणां ग्रहः। क एते ? इत्याह-'महदहत्ति' महांत इतरह्रदापेक्षया गुरुकाः ह्रदाः नदाः महाह्रदाः, तथा कुरवो देवकुरव उत्तरकुरवश्च तेषु दशसंख्यामानमेषां, दशकं ह्रदानामिति गम्यते, पंच ह्रदा देवकुरुषु, पंचोत्तरकुरुषु चेत्यर्थः। अथ सर्वाग्रमाह, समासः प्राग्वत्, षोडशकमिति मिलिताः सर्वेऽपि षोडश इह भवंतीति ॥२०॥ इदानीं दशमं नदीद्वारमाह-

**गंगा सिंधु रत्ता रत्तवई चउ नइउं पत्तेयं ।**
**चउदसहिं सहस्सेहिं, समगं वच्चंति जलहिंमि ॥२१॥**

**गंगेत्ति**-गंगासिंधुरक्तारक्तवत्यः प्रागुक्तस्वरूपाः चतुःसंख्याका नद्यः सरितः प्रत्येकं पृथक् पृथक् चतुर्दशभिश्चतुर्दश -

भिर्नदीसहस्रैः सममेव समकं सार्द्धं जलधिं व्रजंति गच्छंति प्रविशंतीति यावत् ॥२१॥

**एवं अब्भंतरगा, चउरो पुण अट्ठवीससहस्सेहिं ।**
**पुणरवि छप्पन्नेहिं, सहस्सेहिं जंति चउसलिला ॥२२॥**

**एवमिति**-एवमित्यनेन प्रकारेण यथा एता गंगाद्या एकप्रमाणाश्चतस्रो जलधिं प्रविशंति, तथा अभ्यंतरं गच्छंतीत्यभ्यंतरगाः, मध्यवर्त्तिन्यश्चतस्रो नद्यो रोहितांशारोहितारूप्यकूलासुवर्णकूलालक्षणाः, पुनर्विशेषणे, किं विशिनष्टि ? तदाह-प्रत्येकमष्टाविंशत्या नदीसहस्रैः समन्विता जलधिं प्रविशंतीति प्राच्यगाथासंबंधोऽध्याहार्यः । तत्र रोहितांशारोहिते हैमवतक्षेत्रं रूप्यकूलासुवर्णकूले हैरण्यवतं च मध्येकृत्य प्रवहंति । तन्मध्यवर्तिनीनां पुराधिक्यं दर्शयति-'पुणरवीत्यादि' पुनरपि प्रागुक्तनदीभ्यो मध्यगामिन्यश्चतस्रो हरिकांताहरित्सलिलानारीकांतानरकांताभिधानाः सरितः पृथक् पृथक् षट्पंचाशता नदीसहस्रैः सह यांति जलनिधिमिति शेषः । तथा हरिकांताहरित्सलिले हरिवर्षं, नारीकांतानरकांते पुना रम्यकं द्विधा विदधते । एवं महाविदेहव्यतिरिक्तेषु षट्सु क्षेत्रेषु त्रीणि लक्षाणि द्विनवतिसहस्राणि ३९२००० नद्यो भवंति ॥२२॥ इदानीं महाविदेहनदीनां संख्यामाह-

**कुरुमज्झे चउरासी, सहस्साइं तह य विजयसोलससु ।**
**बत्तीसाणनईणं, चउदस सहस्साइं पत्तेअं ॥२३॥**

**कुरुत्ति**-कुरव इत्युत्तरकुरवः, पदैकदेशेऽपि पदसमुदायोपचाराद्यथा भामा सत्यभामेति । तेषां मध्ये विचाले चतुरशीतिसहस्त्राणि नद्यः। तथेतिशब्दो विशेषद्योतकः, चः पादपूरणे । विजयेषु प्राग्विदेहमध्यवर्त्तिषु षोडशसु, द्विरष्टसंख्यावच्छिन्नेषु द्वात्रिंशतो गंगासिंधुप्रायाणां प्रत्येकं चतुर्दशसहस्त्राणि भवंति । तथाहि-एकस्मात् कच्छदेशविजयात् प्रत्येकं चतुर्दशभिश्चतुर्दशभिः सहस्त्रैः सह द्वे नद्यौ रक्तारक्तवतीनाम्न्यौ शीतायां प्रविशतः । प्राक् सामस्त्येन तत्राष्टाविंशतिसहस्त्राणि नद्यो भवंति । एष एव क्रमः सर्वेषु विजयेषु । यथा पूर्वविदेहेषु विजयाः षोडश (१६), प्रतिविजयं चाष्टाविंशतिसहस्त्राणि नद्यः । अपरविदेहमाश्रित्योक्तं च-'विजयावि य इक्केका, अट्ठावीसाइ नइसहस्सेहिं । आउरमाणसलिला, अवरेणुदहिं समणुपत्ता' ॥१॥ इति । ततोऽष्टाविंशतेः सहस्त्राणां षोडशभिर्गुणकारे जाताश्चतस्त्रो लक्षा अष्टाचत्वारिंशत्सहस्त्राधिकाः ४४८००० नद्यः । पूर्वोक्ताश्चतुरशीतिसहस्त्रा उत्तरकुरुमध्यगा नद्यः एतासां मध्ये प्रक्षिप्यंते, जातानि द्वात्रिंशत्सहस्त्राधिकानि पंचलक्षाणि ५३२००० नदीनां । तथाऽनेनैव पर्यायेण देवकुरुष्वपरमहाविदेहानां संबंधिषु विजयेष्वपि एतावत्य एव

५३२००० सरितः । ततोऽस्यांकराशिद्वयस्य मीलने जातानि दशलक्षाणि चतुःषष्टिसहस्राधिकानि १०६४००० । तथैतदंकराशिमध्ये पूर्वोक्तानि त्रीणि लक्षाणि द्विनवतिसहस्राधिकानि क्षिप्यन्ते, ततो भवंति समस्तजंबूद्वीपे षट्पंचाशत्सहस्राधिकानि चतुर्दशलक्षाणि १४५६००० सर्वाग्रेण नद्य इति ॥२३॥

एवं व्याख्याने कृते विजयच्छेदिनीनां ग्राहवत्यादीनां षण्णां नदीनां प्ररुपणा उपेक्षिता भवत्यतस्तद्वर्णनाय वाचनांतरेण द्वितीयं प्रकारमाह-

**चउदस सहस्सगुणिया, अडतीसनईउ विजयमज्झिल्ला ।**
**सीओयाए निवडंति तह य सीयाइ एमेव ॥२४॥**

**चउदसेत्ति**-अन्ये आचार्या एवमाचक्षते-अष्टात्रिंशद्विजयमध्यवर्त्तिन्यः शीतोदायां निपपंति प्रविशंति, किंविशिष्टास्ताः ? इत्याह-चतुर्दशभिर्नदीसहस्रैर्गुणिता अभ्यस्ताः, पुनः कीदृश्यस्ताः ? तद्यथा-द्वात्रिंशद्रक्ताद्या नद्यः, तथा षट् ग्राहवत्याद्याः, एवं सामस्त्येन अष्टात्रिंशत् षोडशविजयेषु संति । ततश्चतुर्दशसहस्रैर्गुणिताः अष्टात्रिंशत् जातानि पंचलक्षाणि द्वात्रिंशत्सहस्राधिकानि ५३२००० । तथेति सादृश्ये, यथा शीतोदायामेवमेवेति । अनेनैव प्रकारेण पंचलक्षाणि द्वात्रिंशत् सहस्राधिकानि ५३२०००

शीतायामपि भवंतीति । ततो राशिद्वयस्याप्येकीकरणे चतुःषष्टिसहस्राधिकानि दशलक्षाणि १०६४००० सरितो भवंति ॥ इत्थं च व्याख्यायमाने कुरुमध्यगाश्चतुरशीतिसहस्राणि सरितो न गृहीताः, तासां स्थाने ग्राहवत्यादयः षडंतर्नद्यः प्रत्येकं चतुर्दशनदीसहस्रसमन्विताश्चतुर्दशषट्कानि चतुरशीतिरिति गणनाक्रमेण चतुरशीतिनदीसहस्रसंख्यां पूरयित्वा यथोक्ता संख्या समाहिता । परमयमपि प्रकारो न संभवति, यतोऽतर्नद्यो गंगादिभ्यः सकाशाद् द्विगुणविस्ताराः प्रतीयंते, 'पणवीससयं च सलिलाओ' इति वचनात्, ततो द्विगुणोऽष्टाविंशतिनदीसहस्रलक्षणः प्रत्येकमासां परिवारो न्याय्यः । **आह चोमास्वाति वाचकः**-नद्यो विजयच्छेदिन्यो रोहितावत्कुंडद्वीपा स्वनामदेवीवासाः अष्टाविंशतिनदीसहस्रानुगाः प्रत्येकं सर्वत्र समाः पंचविंशत्यधिकं योजनशतम् विस्तृताः अर्द्धतृतीययोजनावगाहाः ग्राहह्रदपंकवत्य इत्यादि" । अतः षण्णामप्येतासामष्टषष्टि-सहस्राधिकं लक्षमेकं सरितः परिवारः, तथा पंचलक्षाणि सद्वात्रिंशत्सहस्राणि पुनः सकुरूणां विजयानामंतर्नदीरहितानां भवंति एवं राशिद्वयस्य मीलने पूर्णानि सप्तलक्षाणि सरितः एतावत्य एवापरविदेहे देवकुरुसमन्विते, ततः समस्तमहाविदेहे चतुर्दशलक्षाणि १४००००० सलिलाः । पुनस्त्रीणि लक्षाणि द्विनवतिसहस्राधिकानि भरतादीनां शेषाणां, एवं सर्वांके सप्तदशलक्षाणि द्विनवतिहस्राधिकानि १७९२००० नद्यो भवंतीति । **उक्तं च सूत्रे**-'चउदसलक्खा छपन्नसहसजंबुदीवंमि ।

हुंति उ सत्तरसलक्खा बाणवइसहस्स सलिलाओ ॥१॥' इति । तथा सिद्धांतानुसारेण पुनरेवं ज्ञायते, यद् ग्राहवत्यादीनां द्वादशनदीनां परिवारो न संभवति । यत एतद्व्यतिरिक्ता जंबूद्वीपे या अन्याः सरितः संति, तासां प्रवाहान्मुखे सर्वासां दशगुणो विस्तारः सुप्रतीत एव । **उक्तं च वाचकमुख्येन**–'सर्वा नद्यः प्रवाहदशगुणा मुखे विस्तारपंचाशद्भागावगाहा इति।' एतासां तु तथा न किंतु प्रवाहमध्ये मुखे चैकरूपः पंचविंशत्यधिकयोजनशतलक्षणः प्रत्येकं विस्तारः, नान्यः कश्चिद्विशेषो न च परिवारोऽप्यासां दृश्यते क्षेत्रसमासबृहद्वृत्त्यनुसारेण, अतः प्रतीयते, यद्येतास्वन्या अनेकानि सहस्राणि नद्यः प्रविशेयुस्तदा कथं क्रमेण परतः परतो गच्छंतीनां विस्तारविशेषो गंगादीनामिव न संपद्येतेति ? अन्यच्च पूर्वविदेहे भद्रशालवनसमीपवर्त्तिनोः कच्छमंगलावतीविजययोस्तथा मुखवनोपकंठस्थयोः पुष्कलावतीवच्छनाम्नोश्च विजययोरंतर्नदीनामभाव एवास्ति, अत एतेषु चतुर्ष्वपि प्रत्येकं सामस्त्येनाष्टाविंशतिरष्टाविंशतिसहस्राणि नद्यः संति । गंगासिंधुसंबंधिन्यो नापराः यावती च कच्छविजये भूमिरंतर्नदीमतां सुकच्छादीनां द्वादशानामप्यन्येषां च तावत्येव नाधिका, अतः कथं तेषु बहुतरा नद्यो ग्राहवत्याद्यंतर्नदीसंयोगेऽपि विशेषभूमेरभावात्संभवंति ? अत्राह–नैतत्संवादकोटीमाटीकते, यतो जंबुद्वीपप्रज्ञप्तावप्यंतर्नदीनां प्रत्येकमष्टाविंशतिनदीसहस्रलक्षणः परिवारो भणितस्तथा **च तद्वाक्यं**–'गाहावई महानई पवूढासमणीसुकच्छमहाकच्छविजये दुहा विभयमाणी २ अट्ठावीसाए

सलिला सहस्सेहिं समग्गा दाहिणेणं सीयमहानई समुप्पेई' । अपरे अनूचानाः पुनरित्थं प्रवदंति-यथा अष्टाशीतिग्रहाश्चंद्रस्यैव परिवारतया प्रसिद्धा अपि सूर्यस्य एत एव परिवारः न पुरन्यः पृथक् प्रतीयते । **उक्तं च समवायांगवृत्तौ**-'अष्टाशीतिमहाग्रहा एते यद्यपि चंद्रस्यैव परिवारोऽन्यत्र श्रूयते तथापि सूर्यस्यापींद्रत्वादेव एव परिवारतयाऽवसेया इति' । तथा गंगासिंधुसंबंधिन्य एवाष्टाविंशतिरष्टाविंशतिर्नदीसहस्राणि अंतर्नदीनामपि परिवार इति । एवमपरविदेहेऽपि ज्ञातव्यमिति ॥२४॥ अत्र सूत्रकारोऽमुमेवार्थं स्पष्टयन् सकलजंबूद्वीपनदीनां संख्यामाह-

**सीयासीओया विय, बत्तीस सहस्स पंचलक्खेहिं ।**
**सव्वे चउदसलक्खा, उप्पन्नसहस्स मेलविया ॥२५॥**

**सीया इति**-शीता नदी पंचभिर्लक्षैर्द्वात्रिंशता सहस्रैर्नदीभिः समं जलधिं व्रजंतीति पूर्वतरगाथायाः संबंधो गृह्यते । तथा शीतोदापि पृथगेतावतैव परिवारेणावगंतव्या, ततः सर्वसंख्याया किं जातमित्याह-'सव्वेत्यादि' सर्वे नदीवाचिनोऽका इति गम्यते, यदि वा प्राकृतत्त्वाल्लिंगव्यत्यये सर्वा नद्यः, 'मेलवियत्ति' मेलिता इति णिगंतोऽपि मूलार्थद्योतकः, यथा रामो राज्यमकारयदकरोदित्यर्थः, ततो मिलिताः समुदिताश्चतुर्दशलक्षाणि षट्पंचाशत् सहस्राणि अष्टसप्ततेर्नदीनां परिवारः, ताश्चेमाः-

चतुर्दश गंगाद्या ह्रदसंभवाः तथा कुंडप्रभवा गंगासिंधुप्रमाणाः प्रतिविजयं द्वे द्वे इति कृत्वा द्वात्रिंशति विजयेषु चतुःषष्टिः, ग्राहवत्याद्या द्वादश तु परिवारहीना अंतर्नद्य एवमेता नवतिर्महानद्यो भवंति जंबुद्वीपे। परं पूर्वोक्तात् षट्पंचाशत्सहस्राधिक-चतुर्दशलक्षलक्षणात् परिवारादेताः समधिका विज्ञेया न पुनस्तन्मध्ये गणनीयाः, यतो 'गंगासिंधुरत्ता रत्तवई' इति गाथया चतुर्दशसहस्रसंख्यः परिवारो मूलनदीव्यतिरिक्त उक्त इत्यादि। आशांबरमतानुसारिणोऽप्यमेवाहुः, **तथा च तद्ग्रंथः** 'जंबूद्दीवनराहिव, संखा सव्वनइ चउदहं य लक्खा। उप्पन्नं च सहस्सा, नवइ नईओ कहंति जिणा' ॥१॥ ॥२५॥ संप्रति महानदीनां प्रवहमुखयोर्विस्तारमाह-

**छज्जोयणे सकोसे, गंगासिंधूण वित्थरो मूले ।**
**दसगुणिओ पज्जंते, इय दुदु गुणणेण सेसाणं ॥२६॥**

**छज्जोयणेत्ति**-गंगासिंध्वोः सादृश्याद्रक्तारक्तवत्योरपि मूले प्रवहे ह्रदान्निःसारे इति यावत्, सक्रोशानि सगव्यूतानि षट् योजनानि विस्तरः प्रपंचः, पर्यंते समुद्रादिप्रवेशे दशगुणितो दशगुणः सार्द्धद्वाषष्टियोजनरूपो विस्तारो भवति। तथाभ्यंतराणां रोहितांशादीनां स्वरूपमाह-'इय' इत्यादि। इत्यनया दिशा शेषाणां द्वाभ्यां द्वाभ्यां गुणनं तेन द्विद्विगुणनेन विस्तारः

शेषाणामवशिष्टानामनुक्तानामिति यावत् लभ्यते इति शेषः । तद्यथा- रोहितांशारोहितारूप्यकूलासुवर्णकूलानां प्रवहे सार्द्धद्वादश पर्यंते पंचविंशं शतं योजनानि विस्तारः । तथा तन्मध्यानां हरिकांताहरित्सलिलानारीकांतानरकांतानां ह्रदतोरणान्निर्गमे पंचविंशतिः, जलधिप्रवेशो तु सार्द्धशतद्वयं योजनानि । पुनः शीताशीतोदयोस्तोरणान्निःसारे पंचाशत्पर्यंते पंचशतानि योजनानां प्रपंच इति गाथार्थः ॥२६॥ इदानीं सूत्रकारः स्वयमेव मुग्धावबोधार्थं वर्षधराणामुच्चत्ववर्णावाह-



**जोयणसयमुव्विद्धा, कणयमया सिहरि चुल्लहिमवंता ।**

**रूप्पि महाहिमवंता, दुसउच्चा रुप्पकणयमया ॥२७॥**

**जोयणेत्ति**-शिखरी पर्यंतवर्त्ती वर्षधरः, चुल्ल इति क्षुल्लो महाहैमवतापेक्षया लघुःहिमवान् क्षुल्लहिमवान् एतौ योजनशतमुद्विद्धावुच्छ्रितौ कीदृशावित्याह-कनकं स्वर्णं तन्मयौ तद्वर्णावित्यर्थः । तथा 'रुप्पीत्यादि' रुक्मिमहाहैमवंतौ द्वे शते योजनानामिति गम्यते, उच्चावुच्छ्रितौ, द्विशतोच्चौ, तथा रूप्यकनकमयौ क्रमेण । तथाहि-रुक्मी रूप्यमयः, महाहिमवांस्तु हिरण्यमय इति । इह यद्यप्यवगाहो नोक्तः सूत्रकारेण, तथाप्युच्छ्रयस्य चतुर्थांशमानोऽवगम्यः । **उक्तं च**-'सव्वेवि पव्वयवरा, समयखित्तंमि मंदरविहूणा । धरणितले अवगाढा, उस्सेह चउत्थयं भायं' ॥१॥ इति ॥२७॥

**चत्तारि जोयणसए, उव्विद्धो निसढनीलवंतो य ।**
**निसढो तवणिज्जमओ वेरुलिओ नीलवंतगिरि ॥२८॥**

**चत्तारित्ति**-निषधः चत्वारि योजनशतानि उद्विद्ध उच्चः, न केवलमयं, नीलवांश्च तावदेवोच्चः । चः समुच्चये । तथा निषधस्तपनीयमयो जात्यस्वर्णनिर्माणो रक्तवर्ण इत्यर्थः । माल्य(नील)वान् गिरिस्तु वैडूर्यमयो नीलवर्ण इति ॥२८॥ संप्रति स्वाभिधानप्रकाशनपुरस्सरं सूत्रकारोऽर्थकरणोपसंहारमाह-

**खंडाई गाहाए, दसहिं दारेहिं जंबूदीवस्स ।**
**संघयणी सम्मत्ता, रइया हरिभद्दसूरिहिं ॥२९॥**

**खंडाइत्ति**-जंबूद्वीपस्याद्यद्वीपक्षेत्ररूपस्य संग्रहणिः समाप्ता इष्टार्थकथनेन पूर्णा । कैः ? इत्याह-दशभिः दशसंख्यावच्छिन्नैः द्वारैरुक्तस्वरूपैः, किंविशिष्टैः ? 'खंडाईत्ति' खंडादीनामुद्देशका गाथा खंडादिगाथा, तया तथोक्तया, 'दीर्घह्रस्वौ मिथो वृत्तौ' इति दीर्घत्वं 'ई' 'खंडा जोयणवासा' इत्यनया सूत्रादिकथितया गाथया उपलक्षितैरिति । कैः कृतेयं ? इत्याह-श्री हरिभद्रसूरिभिः रचिता सूत्रतया निबद्धेति भद्रम् ॥२९॥

## अथ वृत्तिकारस्य प्रशस्तिः ।

नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुतज्ञानश्रीसमलंकृताः सुविशदाचारप्रभाभासुराः ।
येषां वाक्प्रपया प्रसन्नतरया शास्त्रांबुसंपूर्णया, भव्यस्येह न कस्य कस्य विदधे संतापलोपोऽवनौ ॥१॥
वित्ते श्रीकृष्णगच्छे श्रमणपरिवृढः श्रीप्रभानंदसूरिः, क्षेत्रादेः संग्रहिण्या अकृत समयगैः संवदंतीं सदर्थैः ।
एतां वृत्तिं खनंदज्वलनशशिमिते विक्रमाद्वे चतुर्थ्यां, भाद्रस्य श्यामलायामिह यदनुचितं तद्बुधाः शोधयंतु ॥२॥

## इति क्षेत्रसंग्रहणिवृत्तिः समाप्ता ।


શ્રી પ્રેમસૂરિ-સ્વર્ગારોહણ અર્ધશતાબ્દિ
(૨૦૨૪-૨૦૭૪)
વૈશાખ વદ-૧૧



# जीवविचारादि-प्रकरणचतुष्टयम्

BHARAT GRAPHICS - Ahmedabad-1
Ph. : 079-22134176, M : 9925020106